नं. १०ग-१
तत्वचिन्तामणौ
शब्दविवेक [illegible]
१०१ पत्राणि
[illegible] | जीर्णानि
सं. [illegible] | [illegible]

१३५०

त॰चि॰म॰ ॐ श्रीगणेशाय नमः अथ शब्दो निरूप्यते प्रयोगहेतुभूतार्थतत्वज्ञानजन्यः शब्दः श॰वि॰
१ प्रमाणं ननु शब्दो न प्रमाणं तथाहि करणविशेषः प्रमाणं करणं च तद्यस्मिन्सति क्रि
याभवत्येव न च शब्दे सति प्रमा भवत्येवेति नार्थप्रमाणं न च शब्दो न प्रमाणमिति
वाक्यप्रामाण्याप्रामाण्ययोर्व्याघातः अस्याप्रामाण्येष्टेस्तु ल्यानुमाना प्या
विसंवादादिति चेत् आकांक्षादिमतः पदार्थस्मरणादिव्यापारवतः प्रमाणत्वे
तत्र व्याप्तत्वात्क्रमोत्पन्नैरावश्यकत्वात् अतएवाभूतत्वेच फलाजनकत्वस्य कर
णांतरसाम्यात् तथापि शब्दो न प्रमाणांतरं पदार्थसंसर्गस्यानुमानादेव सिद्धेः तथा
हि गामभ्याजेति दंडेनेति पदानि वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंस
र्गज्ञानपूर्वकाणि आकांक्षादिमत्पदकदंबत्वात् घटमानयेतिवत् योग्यतासत्ति
मत्वे सति संसृष्टार्थपरत्वात् तत्परसंनिधिमत्वाद्वेति न हेतुः संसृष्टो हि योऽर्थस्त
त्परत्वं तत्परसंनिधिमत्वं वा सिद्धं संसर्गस्य प्रागप्रतीतेः संसृष्टत्वप्रकारक
प्रतीतिपरत्वं तत्प्रकारकप्रतीतिपरसंनिधिमत्वं वा नाप्तोक्तानेकाकांक्षादिव्यभिचा
रि संसर्गस्य च वृक्षप्रकारकत्वेपि नानातिपरसंसर्गासिद्धेः तस्य तात्पर्याविषय
त्वात् अन्यथा शब्दादप्यभिमतान्वयबोधो न स्यात् अतएव विशेषणविशेष्य
भाववदर्थकानि तद्दोचपूर्वकानि वेति न साध्यं वक्तृस्मारितसंसर्गवत्तीति साध्यं

पदार्थः पं॰ १५

मत्वर्थलिंगतया ज्ञापकत्वं नवान्योन्याश्रयः पूर्वपूर्वतत्तद्वस्तुमितिहेतुत्वेनतिनादित्वा
दितिन ज्ञापकत्वमात्रेणार्थासिद्धेः प्रमापकत्वेतेनैवव्यभिचारात् ज्ञानान्तर्छेदकतयात्
संसर्गसिद्धिः ज्ञानज्ञानस्यतद्विषयाविषयकत्वात् संसर्गेचसंबंधिनएवविशेषक
त्वात् यत्तधर्मबलाद्यापकत्वेनागृहीतस्यापिसंसर्गविशेषस्यासिद्धिः अथैवंभ्रा
तिज्ञानमपिभ्रमः स्यात् नचेष्टापत्तिः ईश्वरस्यभ्रांतत्वापत्तेः इदंरजतमितिभ्रमा
दिवषड्ज्ञौ रजतज्ञानवान्यमितिज्ञानात्भ्रांतित्वप्रवृत्त्यापत्तेश्च यच्चभ्रमविष
यविषयकत्वेनतभ्रमत्वंभ्रमविषयस्यासिद्धासिद्धिर्भ्यांपराहततत्वादितिनूवद्भ्या त्र
मः मैवं भ्रमसद्विषयत्वेनाहितभ्रमत्वंभ्रमविषयतासत्त्वात् किंत्वव्याधिकरण
प्रकारकत्वेतन्नच भ्रमस्यज्ञानेव्याधिकरणंप्रकारः रजतत्वप्रकारकत्वस्यभ्रमेपि
सत्वात् अन्यथाभ्रांतस्युच्छेदः प्रमाणाभावात् ननुप्रतारकवाक्येव्यभिचारः वि
शेषदर्शनेन तत्रसंसर्गज्ञानाभावात् नचसंसर्गमप्रतीत्यवाक्यरचनानसंभवा
तीत्याहार्य्यंतत्संसर्गज्ञानमस्तीतिवाच्यं तावत्यदज्ञानादेवप्रतारकस्यैववाक्यरच च्यं:
नोपपत्तेः अन्यथापित्तस्यैवतत्त्वत्वादितिचेत् नएतद्वाक्यमेतस्यपदार्थसंस
र्गंवोधयिष्यतीत्याशयेनवाक्यप्रयोगात्तस्यापिसंसर्गज्ञानात् योग्यताविरहाद्व
अतएवविसंवादिवाक्येषड्कवहुचारितेनव्यभिचारः शब्दात्संसर्गप्रत्ययस्तयो

त.चिं. ग्यताभ्रमात् अयथार्थसंसर्गज्ञानं विनाशङ्कस्यान्यस्य वा संवादिवाक्ये भ्रान्तप्रतारकवाक्ये व्य शा.वि.
म. भिचारः कथं वा तत्र संसर्गप्रमावजन्ना नानुमानासंभवादिति चेत् यदि तत्र संसर्गप्रमा
२ तदावेदत्तल्यते तदुक्तं आकांक्षादिसन्निधज्ञानोपयुज्यते अन्यथा शाब्दमानानुपपत्तेरिति
2 उच्यते अयथार्थज्ञानं प्रवर्तकं ननु तज्ज्ञानात्ज्ञानं गौरवात् व्यभिचाराच्च अतो रजतज्ञान
वानयामीति ज्ञानं न प्रवर्तकं किं त्विदं रजतमिति इदमपि ज्ञानं रजतविषयकमिति चे
त् सत्यं न तु रजतत्वप्रकारकं प्रवर्तकं चेत् तथा अन्यथा भ्रान्तस्येव भ्रान्तिज्ञस्यापि
प्रवृत्तिप्रसंगात् समूहालम्बनसंकरापत्तिश्च एतेन लब्धरागानुरोधात् तात्पर्यग्रहो वाक्या
र्थधीहेतुः तात्पर्यं च पदार्थसंसर्गविशेषप्रतीत्युद्देश्यकत्वं तथा च तद्ग्राहका
नुमानादेव तात्पर्यज्ञानावच्छेदकया संसर्गसिद्धिरित्यपास्तं किंच व्यापकता
वच्छेदकप्रकारिकानुमितिः ततः स्मारितपदार्थसंसर्गज्ञानपूर्वकाणीत्यनुमि
तिः स्यान्न तु रजतज्ञानपूर्वकाणीति तस्मात् प्रवर्तकं ज्ञानं शाब्दादेव अत एव
प्रवृत्त्यर्थमनुवादकता शाब्दस्येत्यपास्तं शाब्दानुमित्योर्भिन्नप्रकारतयैक
विषयत्वाभावेनानुवादकत्वात् तस्यैव प्रमाणत्वात् नन्वेवं पदार्थास्तात्पर्य
विषयमिथःसंसर्गवंतः आकांक्षादिमत्पदस्मारितत्वात् योग्यतासत्तिमत्तेसत्तिसंसर्ग
परयदस्मारितत्वाद्वा अनाप्तोक्ते योग्यताविरहान्न व्यभिचारः तद्बाधकसत्त्वात् न

ज्ञानत्वज्ञानस्य भ्रमत्वात् एकाकारवाक्यस्यापि बाधकसत्त्वासत्त्वाभ्यां योग्यायोग्यत्वात् अ
प्यप्रतिपत्तुर्ज्ञानासां प्रतियोग्यतासावधारितेति बुद्ध्या यत्संसर्गावगमप्रागभावरूपाकांक्षा
बाधकप्रमाविरहो योग्यता अव्यवहितसंसर्गप्रतियोगिज्ञानमासत्तिः ताश्च स्वरू
ज्ञान पसत्यो हेतुत्वेन तद्गौरवात् न चैषां विनाश्याद्यनुभवे विलंबाभावात् संसर्गनिरू
पकत्वेन प्रत्ययं तु रवधारणात्याद्येति ततः लिंगविशेषतयाकांक्षेति चेन्न न योग्यताद
न्यैपि तदभिलापेन संसर्गप्रत्ययात् तत्प्रत्ययात् शाब्दाभासोच्छेदप्रसंगः राजा पुत्र
माकांक्षति पुरुषं वेति संशये विपर्यये च वाक्यार्थधीप्रतिबंधात् योग्यताया
स्य संशये साधारण्यां ज्ञाते न मात्रं हेतुः स्वपरबाधकप्रमाविरहात् क्वचिन्निश्चीयते वि
पर्यये हि घटो नास्तीत्यत्र स्वयोग्यानुपलब्ध्या घटाभावनिश्चये नान्यस्यापि घटप्र
माविरहोपि निश्चीयते क्वचित्तु प्रमाण्याद्विरहसंशयेप्यन्वयबोधः बाधसंशयस्या
दूषकत्वात् किं च तवापि योग्यता किं प्रामाण्यप्रयोजकं आद्ये तत्त्वस्य त
थात्वे गौरवात् अन्त्ये ज्ञातोपि संवादे तत्प्रामाण्यात् एवं चाज्ञायमानकरणो
प्रामाण्यप्रयोजकवत्तया ज्ञानमावश्यकमिति नासांज्ञानं हेतुः न च समभि
व्याहारविशेषादिति मैवं यत्रापि मलंजलामित्यश्रुत्वैव तथा कच्छेमहियभरतीति श्रु
णोति तत्राकांक्षादिति मस्ति न च नवीकछयोः संसर्ग इति व्यभिचारात् अत एव नता
वन्मात्रं प्रयोजकं प्रामाण्ये अप्ययावत्समभिव्याहृतेत्यपि लिंगविशेषणं कांक्षेति
कः

त॰ चि॰ पयःपदप्रविरास्तु संसर्गप्रत्ययो लिंगाभिमानादिति चेन्न न तत्संदेहेपि वाक्यार्थधीवा श॰ दि॰
म॰ मात् तत्र संसर्गभ्रांतिरिति चेन्न ग्रन्थकरणाभावेपि पदमेव भ्रांतिजनकं तथा वा
२ दुष्टं तदेवा भ्रांतिजनयत् केन वारणीयं तत्र संसर्गाग्रहस्तत्रेति चेन्न न संस
र्गे बाधकाभावात् आप्तानोक्तत्वं लिंगविशेषणं तदेव वा लिंगं न हि नदीकछ
3 यो संसर्गे आप्तोक्तत्वं आप्तोक्तत्वं च प्रामाण्ये तंत्रमिति तत्र चैतयो ज्ञानमात
स्य हेतुत्वेन तत्र ज्ञानमावश्यकं आप्तिमत्तया ज्ञानस्यैव लिंगत्वं तदवगमश्च
लोके भ्रमाप्रमूलकतया सहजा न परिगृहेणा वेदे स्वरूतो चेति चेन्न न यत्र क्वचि
दाप्तत्वमता स्यापि सर्वत्राप्तत्वमप्रमितं भ्रान्तेः पुरुषधर्मत्वात् प्रकृतवाक्या
र्थयथार्थज्ञानवत्वं वान्यतं प्रत्यक्षं तु ग्रहं भ्रमाप्रमूलकत्वस्य प्रवृत्तिसंवादेन
८ तद्ग्राहकस्याज्ञानात् प्रवृत्तिश्च संदेहादपि किंच प्रकृतसंसर्गे यम आप्तो यथार्थ
ज्ञानवान्वेति संसर्गमप्रतीत्य तज्ज्ञानमशक्यं वाक्यार्थस्यापूर्वत्वात् वयं तु ब्रूमः
बाधकप्रमाणाभावो योग्यता साधनलिंगविशेषणं बाधकप्रमामात्रविरह
स्य सर्वत्र निश्चेतुमशक्यत्वात् तत्संशयेपि शब्दादन्वयबोधात् शब्दप्रामाण्ये
तु योग्यतायाः संशयसाधारणं ज्ञातं प्रयोजकमिति शब्दः प्रमाणमिति ज
रन्मीमांसकाः लोके वक्तृज्ञानानुमानान्न डपनीविसंसर्गानुमानाद्वा वाक्या

नाचक्षुरादेस्तथात्वेन तच्छक्त्याभावप्रमापकत्वात् तायमानकरणसंदेहे नानिश्चायकं लिंगं वेदेति पं० ३

पि

र्थसिद्धौ शब्दस्यानुवादकत्वं वेदे तु नदभावात् स्वातंत्र्येण प्रमाणत्वमिति वदंति तन्न वेदे ऽन्यप्रमाणसमसीनो लोकेपि
संसर्गविषयात् अन्यथानुवादकतापि न स्यात् लिंगस्य पूर्वत्वेपि व्याप्तिस्मृतिविलंबेन विलंबात् अनाप्तोक्तौ व्य
६८ भिचाराय तुल्यापि सामग्री न तन्निश्चायिकेतिचेत् न संशयो हि न वाक्येन तस्यानिश्चायकात् न तज्जन्य ज्ञानं प्रमा रापेत्तस शा
तदुत्तरकालीनत्वात् नाप्तोक्तत्वेनं निश्चयस्यानंगत्वात् ननु लोके ऽनाप्तोक्तत्वसंदेहे वाक्यार्थधीर्नेति तन्निश्चयो हेतुः वा
तथा च वाक्यार्थगोचरयथार्थज्ञानवक्तृज्ञानत्वग्राहकात्तदुपजीविनोनुमानाद्वा वाक्यार्थधीरितिचेत् न
वेदे तद्रहितस्यापि सामर्थ्यावधारणात् तदनिश्चयेपि वेदानुकारेण पठ्यमानमन्वादिवाक्येषु अपौरुषेयत्वाभि
मानिनो गौडमीमांसकस्यार्थनिश्चयात् न चासौ भ्रांतिः बाधकाभावात् पौरुषेयत्वनिश्चयदशायामपि तस्य
तथात्वात् न चासंसर्गाग्रहमात्रं तत् अर्थस्य तथाभावेप्यसंसर्गाग्रहत्वे संसर्गोच्छेदापत्तेः न चाप्तोक्तत्वनिश्च
यरूपकारणाबाधात् संसर्गज्ञानबाधः व्यभिचारेण हेतुतायामेव बोधात् लौकिकत्वेन ज्ञानेन तदंगमितिचेत्
न मानाभावात् वाक्यार्थस्यापूर्वत्वेन लिंगाभावेन तद्ग्रहासंभवात् न च नाप्तोक्तत्वशंकाव्युदासोगं स च
वेदे अपौरुषेयत्वानिश्चयात् लोके चाप्तोक्तत्वावधारणादितिचेत् न तस्याशक्यत्वात् यदि चापौरुषे
यत्वनिश्चये सत्येव वेदादर्थनिश्चयः तदा दोषवत्पुरुषाप्रणीतत्वादिसत्त्वद स्यादि तत्वेन वेदे
पदार्थसंसर्गसिद्धिरस्तीति वेदोपि अनुवादकः स्यात् तदुक्तं व्यक्तपंद्रवराणां के स्मादि तथात्वे देरमीः
अन्यिना इति निर्णीते न वेदस्यापि न तत्कृत इति न वैदेशाब्दस्य प्रमाणत्वमपि अनुमानादेव वाक्यार्थ
प्रमोपपत्तेरिति प्राभाकरास्तु व्यभिचारिशब्दव्यावृत्तमव्यभिचार्यनुगतं प्रमाणत्वयोलकमध्येयं।

मि

तत्त्वचि० यदभावादनाप्तवाक्यादप्रमाऽस्य च याथार्थ्येऽपि चैत्रेऽन्यस्यात् न चाज्ञानमप्युपयुज्यते ज्ञायमानकरणोऽप्यामो शा०वि०

प्र० पयोगित्व[illegible]व्यभिचारित्वे लक्षणायपत्यात् प्रमाहेतुत्वाद्याद्याव्याप्तिवत् शब्दशक्तिवच्च अन्यथा शाब्दाभासोच्छे

४ दप्रसंगः नचाप्तोक्तत्वं तथा संवादात् प्रमातोऽधिको दोषेति भ्रान्तप्रतारकसंवादिवाक्ये वेदे च तदभावात्

[illegible] आप्तोक्तत्वानुमाने व्यभिचारित्वा रूनलिंगाभावात् भावे वा तत एव शाब्दस्य प्रत्यायकत्वात् एते

ना प्रमाहेतुत्वं भ्रमप्रमादविप्रलिप्साकरणापाटवानां परस्परव्यभिचारात् मिलितस्याव्यापकत्वात्

प्रमा किंवा प्तोक्तत्वाभावरूपाहेतुत्वं तदभावः आप्तोक्तत्वं प्रमाहेतुरित्यपास्तं आप्तत्वस्यालिंगाभावेन हीतुम ग्र

ग्राकपत्वात् अत एव व्यभिचारशंकाविरहो हेतुः सा च लोके भ्रमादिमूलेत्याप्तोक्तत्वानुमानाद्योपि ध्य

ते वेदे चापौरुषेयत्वानिश्चये नेति निरस्तं अभिमतवाक्यार्थस्याप्रत्वे च साध्याप्रसिद्धेः वेदे सादोष

पुरुषाप्रणीतपदस्मारितत्वेन संसर्गसिद्धेरनुवादकतापत्तेश्च नापि दोषाभावः भ्रान्तप्रतारकवाक्यज

न्यज्ञाने प्रत्यक्षेणाग्रहीतसंवादे तदभावात् दोषाभावस्य हेतुत्वात् तत्र वाक्यं मूकमेव व्यवहारस्तु प्र

त्यक्षादिति चेत् न अनुभवापलापात् तेषु तत्त्वे विवादात् वेदेप्यनुवादकतापत्तेश्च किंच दोषा

भावस्य प्रमाहेतुत्वे अप्रमायां दोषाकारणं तस्य प्रत्येकं हेतुत्वे व्यभिचारः मिलितस्य तत्त्वे एकस्मा

दप्रमा न स्यात् भ्रमादीनां प्रत्येकं दोषत्वे ऽननुगमः मिलितस्य तत्त्वे एकस्मादप्रमानुदयः तस्मा

ल्लाघवाद्यथार्थतात्पर्यकत्वं शाब्दप्रमाप्रयोजकं न तु यथार्थवाक्यार्थप्रतीतिप्रयोजकत्वं

वेदलौकिकसाधारणं तदभावादप्रमा तत एव दोषः न हि ज्ञात्यैव कश्चिद्दोषः तद्विघातकत्वाच्च प्रमादी

अर्थप्रतिपादकं = ६

नांदोषत्वात् अत एव भ्रांतप्रतारकवाक्यं प्रत्यक्षादिवाक्यं च प्रमाणसंवादात् अत एव अन्यगृहवर्ति
घटाभिप्राये गृहे घटोस्तीत्युक्ते पत्र घटं तदंदृष्टातमानयति तत्रान्यपरत्वाच्छब्दो न प्रमाणं
व्यवहारस्तु प्रत्यक्षादेव यष्टीःप्रवेशयेति मुख्यार्थबाधेन प्रमाणं यत्परः शब्दः स शब्दार्थो
यतः तच्च तात्पर्यज्ञानरूपं युज्यते ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारवैलक्षण्यापात् व्याप्तित्वस्य
ग्रहशक्तिवच्च अन्यथान्वयप्रसदन्यान्वयबोधो न स्यात् इति शाब्दाभासोपि प्रसंगः तद्भ्रमाच्च शाब्दभ्रमः छे८८
अत एव यष्टीःप्रवेशयेत्यत्र लक्षणा नानार्थेविनि गमकाच्चैव तात्पर्यग्रहमूलकत्वात् यदि च
तत्र वाक्तत्वं नात्पर्यं तच्छाब्दबोधं यदि तदा लक्षणायां मुख्यार्थान्वयानुपपत्त्युपयोगो न स्यात्
अत एव पचतीत्युक्ते ऽन्योक्ते न स्वयं वाक्य तेन कलायपदेनोपस्थिते कपालाय पचतीत्यन्व
यबोधो न भवति तात्पर्याविषयत्वात् न च तात्पर्यग्राहकप्रकरणादेः शार्षिकत्वादावप्रयकत्वा
स्य शाब्दसहकारिता न तु तात्पर्यं रहस्योक्ते वाच्यं तेषाम् नतरामित्वेन परस्परव्यभिचारादहेतुत्वा
त् तात्पर्यग्राहकतावननुगतानामपि व्याप्यत्वात् धूमादीनामिव तच्च तात्पर्यं वेदे न्याय
गम्यं यत्र न्यायात् तात्पर्यमवधार्यते स वेदार्थः लोके न केवलं न्यायानुसारि तात्पर्यमिति
न न्यायाधिगम्यं किं तु वक्त्रभिप्रायात् यत्रितं न्याया विषयोपि वक्तुरिच्छाविषयोपीति जनकत्वात्
ऽवधृतं वक्ता च परकीयवाक्यार्थज्ञानोत्पादने इच्छया वाक्यं रचयति सा चेच्छा वक्तुर्यदि यथार्थज्ञान
पूर्विका भवति तदेव परे तु तद्द्वारा स्वयं समभिप्रेतयथार्थज्ञानपरत्वं यथार्थज्ञाने च व्याप्यानि
वहनीति वक्तुर्यथार्थवाक्यार्थज्ञानवत्त्वसविशायय यथार्थप्रतीतिपरं तु ज्ञापनं न शाक्यत इति

प्रथममाप्तवाक्याद्वक्तृज्ञानानुमानपूर्वकमर्थं तस्यात्मनः संधायय यथार्थतात्पर्यनिश्चयः अनुमानं च
 इदं वाक्यं भ्रमादिविशिष्टज्ञानयोरन्यतरजन्यं वाक्यत्वादिति ततो भ्रमादिनिरासे सति परिशेषाद्वाक्या
र्थज्ञानानुमानं अयं वक्ता स्वप्रयुक्तवाक्यार्थयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यप्रयोक्तृत्वात् अ
हमिव न त्वाप्तत्वात् साध्याविशेषात् ततः एते पदार्थाः यथोचितसंसर्गवंतः यथार्थज्ञानविष
यत्वात् आप्तोक्तपदस्मारितत्वाद्वा मदुक्तपदार्थवदिति ननु वक्तृज्ञानविशेषोनुमेयः ज्ञाने चार्थ
एव विशेषो न त्वपर्याधीनोन्यः अर्थेनैव विशेष इत्यौपचारिकी निरीया तथा च वाक्यार्थज्ञानवि
शेषोनुमेयस्तस्य चाप्रसिद्धान्न व्याप्तिग्रहः अत एवास्मिन्वाक्यार्थेऽयमभ्रान्त आप्तो वेति ज्ञानुमशक्य
मिति शाब्द एव नमर्थं बोधयेदिति चेत् न तात्पर्यावधारणार्थं तथापि प्रशाब्द्या एव संसर्गविशेषप्र
तीतेरभ्युपेयत्वात् अन्यथा क्व तात्पर्यनिरूपणं अत एव आप्तोक्तत्वभ्रमाद्यजन्यत्वे निरूपणम
पि सकरपात्वात् संसर्गज्ञानं प्रथमं न भवति ज्ञानान्तरं भवत्येव न चैवं शाब्दो न प्रमाणं तदर्थस्य प्रा
गेव सिद्धेरिति वाच्यं तवापि तुल्यत्वात् ननु तथापि कथमर्थविशेषसिद्धिः विशेषणाव्याप्त्यग्र
हादिति चेत् न यथार्थधीर्यत्र प्रवर्तते सतज्ज्ञानान्तः इति सामान्य- व्याप्तिज्ञाने पाकादौ प्रवृ
त्तिदर्शनात् पाकविषयककार्यज्ञानानुमानं यथा चेष्टाविशेषदर्शनात् दशसंख्याभिप्राये
मात्र ज्ञानघटे तच्चेष्टादर्शनात् न घटे दशत्वज्ञानं तथा सामान्यतो व्याप्त्या तत्रापि विशेषसिद्धिः
यद्वा इदं वाक्यं साकांक्षतदर्थविषयैकज्ञानहेतुकं आप्तोक्तत्वे सत्येतदर्थप्रतिपादकत्वात्
मद्वाक्यवत् ततः एते पदार्थाः परस्परसंसर्गवंतः साकांक्षत्वे सति एकज्ञानविषयत्वात् सन्य

वेद

रजतज्ञानविषयवत् एवं वक्तुर्वाक्यार्थज्ञानेऽनुमिते प्रकरणादिना वक्तुरभिप्रेतयथार्थप्र
तीतिपरत्वे ज्ञानं तत्तौल्यतया शब्दादर्थप्रत्यय इत्यनुवादकः शब्दः वक्तृज्ञानावच्छेद
कतया तदुपजीवि संसर्गानुमानाद्वा वाक्यार्थस्य प्रागेव सिद्धेः यच्च संसर्गाग्रहो भ्रमस्तद
ग्र० ६ भावश्च संसर्ग एवेति भ्रमाभावेऽनुमीयमाने संसर्गज्ञानमेव अनुमितमित्याप्तत्वानुमानां
तर्गतमेव वक्तृज्ञानानुमानं ननु वक्तृज्ञानानुमानेनालिंगमिति तन्न भ्रमो हि ज्ञानद्वयमगृ
हीतभेदं तदभावश्च गृहीतभेदं ज्ञानं न हि ज्ञानाभावे सुषुप्तौ भ्रमव्यवहारः ततो भ्रमाभाव
निश्चयानन्तरं वक्तृज्ञानानुमानं किंच यद्याप्तोक्तत्वानुमानमेव वक्तृज्ञानानुमानं तर्हि पादर्शलिं
गतादवस्थमेव गमकमास्त्विति अत्रोच्यते यथार्थवाक्यार्थधीपरत्वेन ज्ञानं प्रमोत्पादकं गौ
रवात्त वाक्यार्थनिरूपणत्वेन प्रथमं ज्ञातुमशक्यत्वात् तस्यापूर्वत्वात् यत्र लोके भ्रमा
दिनिरासानन्तरं वक्तृज्ञानावच्छेदकतया तदग्रेस्थानं त्र्येणवा प्रमाभिप्रेतवाक्यार्थज्ञानेतत्प्र
तीतिपरत्वं प्रकरणादिना ज्ञायत इत्युक्तं तन्न वाक्यार्थस्याज्ञात्वाऽर्थमत्राभ्रांत इति ज्ञातु
मुक्तत्वाद्वक्तुर्भ्रमप्रमादसंभवेन प्रथमं भ्रमाद्यजन्यत्वस्याग्रहीतुमशक्यत्वात् प्रवृत्तिसं-
वादे ज्ञानोत्तरकालभवत्वात् भ्रमादिजन्यविलक्षणत्वेन शब्दस्याज्ञानात् ज्ञानेवायाद
णो लिंगत्वं नास्त्येव प्रत्यायकत्वं अव्यभिचारात् वेदेपि वाक्यार्थमविज्ञाय तद्यथार्थप्र
तीतिपरत्वं न्यायेनापि ज्ञातुमशक्यं विषयनिरूप्यत्वात् प्रतीतेः लोके तात्पर्यनिरूपणा
पूर्वमर्थं वाक्यार्थप्रतीतिः प्रथमं च यापि स्वीकारात् अन्यथा वक्तृज्ञानानुमानापेक्षा न स्यात्

देवा

नचलोकवत्मानांतरात्तदगमः वेदार्थस्यतदविषयत्वात् वेदस्यचप्रथमंमूलकत्वात् नच शानविवे॰
न्यायासिद्धेवेदार्थेमानांतरात्तात्पर्यग्रहः वेदस्यानुवादकत्वापत्तेः शाब्दस्यच प्रमाणान्तरत्वापत्तेर्वा
अज्ञानेवाक्यार्थेतर्कसंवादयोरभावात् अयंपदार्थोपरपदार्थसंसृष्टोनवेतिसंशयेत्तर्केचैक
कोटौसंसर्गउपस्थितइतिचेत् न अनिश्चितेतात्पर्यानिश्चयात् तयोरगृहीतासंसर्गविषयत्वे
नासद्विषयत्वेनवावाक्यार्थागविषयत्वाच्च अन्यथालोकेपिनाभ्यामेवोपस्थितिरिति किंवक्तृ
ज्ञानानुमानेन वक्तृतत्तयदिदयथार्थतात्पर्यकत्वंज्ञानंशाब्दप्रमोत्पादकंतदालोकवेदयो
स्तादृशपदस्मारितत्वेनपदार्थसंसर्गानुमितिसंभवात्शाब्दःप्रमाणंस्यात् अपिच एवंवा
क्यस्यदोषवदीरितत्वज्ञानान्यथारजन्यत्वेनुमितेपरिशेषाद्दोषाजन्यत्वनिश्चयदशायां
वेदतुल्यसामग्रीएवंवाक्येपिवृत्तेसितत्तएवार्थनिश्चयाद्वेदस्यापिप्रामाण्यं अनुमितानुमानस्य
व्याप्तिस्मृत्यादिविलंबितत्वात् एतेनाबाधितार्थपरत्वंलोकेवेदेप्रमापकंलोकेवाक्यार्थो
बाधितोपिदृष्टइति शब्दप्रमाणावतारंविनानबाधाभावनिश्चयः नचक्वचिच्छ्रोत्रादिरि
न्द्रियेणक्वचिद्व्यक्तेरादृतत्वात्तत्रमाभून्नवेदेतस्याभावात्तन्निश्चयः तदर्थस्याप्रमाणांतराविष
यत्वान्नतत्रशाब्दीतिसामग्रीभेदइतिनिरस्तं प्रथमंप्रमाद्यभावस्याप्रोक्तत्वस्यवावि
श्वेत्वसंशयात्वात् वेदस्यानुवादकतापत्तेश्चतस्माद्भ्रमाद्यजन्यत्वमाप्तोक्तत्वमबाधि
तार्थत्वंयथार्थवाक्यार्थप्रतीतकत्वंनिरस्तव्यभिचारिप्रकृत्वमन्यथाव्यभिचारि व्याव
र्तंयत्प्रमोत्पादकंतत्स्वरूपसत्तज्ञानंअन्यथानादृशस्यवाक्यार्थव्यभिचारितया

नाद्दशायदस्मारितत्त्वादिलिंगादेव संसर्गासिद्धिस्यादितिजितंवैशेषिकैः अपव्यवहारानु- वे·
मितव्यवहर्नकार्यान्वितज्ञानेत्य स्थितत्वेनपदानां हेतुत्वग्रहादन्विताभिधायकत्वं गृहीतं
नतुलिंगज्ञानस्य तदानीं शब्दस्यालिंगत्वेनानुपस्थितेरितिचेन्न न लिंगभावेनैव शब्दाद-
न्वितज्ञानोपपत्तेर्नाकांक्षादिमच्छब्दत्वेनकारणतानागौरवात् शब्दस्यालिंगत्वं संभवदपि
वालेननज्ञानमितिचेन्न सोयंवालस्यदोषो ननुवस्तुन इत्यादिवदत्यते किंचैवमपिलोकवद्वेदेप्यनुवाद
कत्वेवस्यात् एतेनवाक्यार्थतात्पर्यग्राहकानुमानात्तात्पर्यविच्छेदकत्वपात्तदुपजीविनोनुमाना-
त्स्यात्तत्रैराकवाक्यार्थसिद्धेर्नशब्दःप्रमाणमितिवैशेषिकमतमपास्तं यथार्थतात्पर्यसहस्यवा
क्यार्थबोधाहेतुत्वात् यच्च ज्ञायमानइति तन्न यथार्थतात्पर्यकत्वादेः प्रथमं ज्ञातुमशक्यत्वे
नानुमानस्यवाधितत्वात् व्याप्त्यसिद्धेश्च नहिव्याप्तिःशक्तिश्चकारणं किंतुतद्धीः अत्रतिलेऽनु-
मितिदर्शनात् अपभ्रंशादौशक्तिभ्रमादन्वयबोधाच्च नचसेवोपयुज्यत इतिसाध्यं प्रथ-
मं तदसंभवात् तस्माद्यदर्थाव्यभिचारित्वेनज्ञानंकरणंतत्र व्यभिचारिवैलक्षण्यमानमु-
पयुज्यते अन्यथाशब्दस्यार्थाव्यभिचारित्वेज्ञातस्य ज्ञापकत्वे लिंगतापत्तेर्वत्रलेयाय-
मानत्वात् स्यादेतत् अनाप्तोक्तेवाधकेनार्थाभावदर्शनादाकांक्षादिमद्वाक्यत्वेनसद-
र्थकंवाधितार्थकंवेति संशयात्तत्तावन्मात्रादर्थानिश्चयः नहिसंशयएवनिश्चायक इत्याधि ८९
कमपेक्षणीयमितिचेन्न न अर्थसंशयस्यतद्वाधसंशयस्यवाप्रमाणत्वाविघटकत्वात् वह्नि-
तद्वाधयोःसंशयेप्यनुमानादिनार्थनिश्चायत् अन्यथाप्रमाणमात्रोच्छेदःतत्र

 वं मर्यत्तद्बाधसंशयात् विनाप्यर्थवाक्यरचनाप्यसंभवत्यतः एतत्स्यायमर्थोत्तिवै तत्संदर्शकं नवे

तज्ज्ञत्वं ज्ञानं सद्विषयं नवेति संशयस्याप्यर्थवैमोत्तरकालीनत्वाच्च तस्मादाप्तोक्तत्वं प्रमाद्य
जन्यत्वमबाधितार्थकत्वं यथार्थवाक्यार्थप्रतीतिपरत्वं वा ज्ञानमनुगतमपि न हेतुः प्रत्यक्षं गृ
हीतमप्रामाण्यात् किंतु तात्पर्यग्राहकत्वे नाभिमता नाप्तोपज्ञत्व प्रकरणादीनामन्यतमता
त्पर्यव्याप्तत्वेनानुगतं तथा कांक्षासत्तिनिश्चयस्तु विपर्यये संशये वशाद्ज्ञानाभावा
त् योग्यताया वा ज्ञानमात्रं तत्संशये विपर्यये प्रमायां च वाक्यार्थज्ञानात् तथा वि
भक्त्यादि समभिव्याहारः संभूयो वा रणां शाब्दज्ञानमात्रे कारणानि नानार्थे श्लिष्टे वाऽ
नेकोपस्थितावपि प्रकरणादिवशादेकमर्थमादायान्वयबोधः लक्षणायां तात्पर्यानु
पपत्त्या । किंत्वन्वयानुपपत्त्यैव प्रकरणाद्भोजनप्रयोजकत्वेनावगतप्रवेशनस्य पश्च
न्वयानुपपत्तेः अजहत्स्वार्थायां प्रकरणादेव तत्र तदितरस्य यांतीत्यनेन गमनकर्तृत्वस्य
गतं तदन्वयानुपपत्तिः छत्रिमात्रे प्रवतीत्यस्य कलापमित्यन्योक्तेन नार्थप्रत्यायकत्वं सा
माभिव्याहाराभावात् तवापि तस्य तात्पर्यग्राहकत्वात् सहोच्चरितानां संभूय प्रत्यायक
त्वस्य व्युत्पत्तिसिद्धत्वात् अन्ये तु नानार्थे लक्षणायां वा नियनोपास्थित्यर्थं पदार्थे
तात्पर्यग्रहापेक्षा तेन विना तदभावात् न वाक्यार्थे तदज्ञानेपि प्रकरणादिभिः सैंधवप
दत्तरंगपरेकाकपदस्पुपघातकं परिमिति हि विप्रतिपत्तिः अन्यत्रान्वयप्रतीतियोग्य

स्थितिः तात्पर्यग्रहं विनैवेति तन्न दपेक्षेति वस्तुतस्तु इतरपदस्येतरपदार्थसंसर्गज्ञानप
रत्वं तात्पर्यं तच्च वेदे न्यायादवधार्यते लोके न्यायात्प्रकरणादेर्वा अत एव शाब्दबोधे जाति
यतहेतुत्वं तच्चेतरपदार्थसंसर्गज्ञानं वा आर्थज्ञानमेवेति सामान्याकारेण तत्परत्वग्रहो हे
तुः न तु विशिष्य तत्तच्च स्वपदार्थयोः संसर्गानुभवजनन् विनानुपपन्नमिति पदानि संसृष्टजन
यंतीति अत एव नानार्थे विनिगमनातदनुपपत्तिरेव लक्षणाबीजं तदभावात्स्य चेति यदेनत्तस्यू तं ४ पं ५
नकलायान्वयबोध इति सिद्धं शाब्दस्य प्रमाणान्तरत्वं तस्य च निराकांक्षादेः संसर्गज्ञाप्राजनक
त्वात् आकांक्षादिकं सहकारीति ॥ छ ॥ अथ केयमाकांक्षा न तावदविनाभावो नीलं सरोज
मित्यादावभावात् विमलं जलं नद्याः कच्छे महिषश्चरतीत्यत्र जलान्वितनद्या अविनाभूत
कच्छे साकांक्षानापत्तेश्च नापि समभिव्याहृतपदस्मारितपदार्थजिज्ञासा सा आजिज्ञासोर
पि वाक्यार्थबोधात् विच्छजिज्ञायत्रेतद्धारमित्यत्र जिज्ञासितस्यान्वयनादेराकांक्षापत्तेश्च
अप्यजिज्ञासांप्रतियोग्यत्वासाजिज्ञासा च विशेषाज्ञा— संभवति योग्यत्वाच्च श्रोतरि तदुच्चा
रणजन्यसंसर्गावगमप्रागभावः विमलं जलं नद्याः कच्छे महिषश्चरतीत्यत्र तात्पर्यवशा
न्कदाचिन्नद्याः कच्छे संसर्गावगमात्तत्प्रागभावसत्त्वेपि श्रोतरि तदुच्चरणे न तात्पर्यवशा
न्जलान्वितनद्याः कच्छे संसर्गावगमो नेति न तत्प्रागभावः घटकर्मत्वमानयनमित्यत्रा
पि तथेति चेत् नालियकांक्षेतदुच्चारणजन्यसंसर्गावगमप्रागभावस्येति कृसिद्धिपराह
तत्वात् किंच यत्रैको-- विमलं जलमित्युक्त्वैव तात्पर्यभ्रमेणावा नद्याः कच्छान्वयपरत्वं
४पदार्थयोरप्यव्याहृतस्यर्गाप्रतीतिविधानयोराकांक्षेतत्त्वाच्च तत्त्वाद्वा कल्पनार्थं क्वेपि घटकर्मत्वमानयनमित्यत्र ४ पं ७

त॰चि॰म॰ अथैवं तत्रापरः समस्तमेव शक्यत्वान्वयाः ज्ञानान्वयपरत्वमवधारयन्ति तत्रोभयोरपि तद्वारणाज्जन्य शा॰वि॰
८ संसर्गविरामात् गद्या इत्युभयाकांक्षा स्यात् ~पि न प्रागभावाभावस्य कारणात्तदभावव्या
सत्वात्तत एव कार्याभाव इति किमाकांक्षयां एवंच योग्यता सत्ती अपि न हेतू अयोग्येनासन्नेन
दुग्धवर्ण्णाज्जन्यसंसर्गज्ञानाभावेन तत्प्रागभावाभावात् ननैवं नाद्याभावस्यानुमित्यादाव
पि हेतुत्वं प्रागभावाभावेनैव कार्याभावात् [illegible]गभावस्य कार्यमात्रे हेतुत्वात् घटेष्टताम्राधारणाय शा=
उपस्थितौ पप्याकांक्षयोरुत्कर्षापकर्षौ तस्यानां प्रागभावे तदभावात् अत्र यत्राप्यन
दितरान्वयप्रकारकजिज्ञासा अनु ~त्पदार्थोपस्थितिजनकत्वे सति जनिततान्वयवि
षयान्वयबोधत्वमाकांक्षा घटमानयेत्यत्र घटमित्युक्ते किमानयति पश्यति वा
आनयतीत्युक्ते घटमन्यच्चेति जिज्ञासा भवति घटः कर्मत्वमानयनं कृतिरित्यत्र नाभे
देऽन्वयोऽयोग्यत्वात् घटस्यानयनमित्यत्रानान्वयबोधः घट इति पदात्संबंधित्वेनानुप
स्थितेः राज इति पुत्रे राजानि तान्वयबोधात् पुरुषमाकांक्षतीति चेत् तर्हि नामविभक्तिधा
त्वाख्यातार्थानां घटकर्मत्वानयनकृतीनां स्वरूपेणोपस्थिति नान्वयप्रकारकजिज्ञासानु
कालेति तत्राकांक्षा स्यात् घटः कर्मत्वमानयनं कृतिरित्यत्र घटमानयेत्यत्रेवान्वयबोधः
स्यात् न हि तत्र पदार्थस्वरूपाणामेतद्वैलक्षण्ये नोपस्थितिः उपाधानत्वावत् स्मरणोत्र
यमं यमो राज्ञः इति पुरुषेणान्वेतीति किं तु पुत्रेणान्त एवाग्रे पीति व्युत्पत्तिसज्जनिनान्वयबोध
कत्वामिति उच्यते अभिधानापर्यवसानमाकांक्षोपस्थये न वि नामस्वार्थान्वयानुभावक

त्वं तस्य तदपर्यवसानं नामविशिष्टैर्भक्तिधात्वाख्यातक्रियाकारकपदानां परस्परं विनापरस्प
रं न स्वार्थान्वयानुभावकत्वं परमते नीलो घटोऽस्तीति नीलं घटं मानयेत्यादौ भमार्थानां कारकपदा नी
नां च न परस्परमन्वयबोधः विशेषणान्वितविभक्त्यर्थान्वयादितिन विशिष्टवैशिष्ट्येनान्वय
कित्वार्थः समाजः अस्माकं तु नीलघटयोरभेदानुभवबलादभेद एव संसर्गः विशेषणावि
भक्तिः साधुत्वार्था यद्वा समानविभक्तिकयोरभेदानुभवबलाद्विशेषणान्वितविभक्तेरभेदार्थकत्वम
तो विशेष्यविशेषणभावानुभवकत्वं तत्र न पदयोर्न परस्परं विना घटमित्यत्राध्याहारविनाप्रति
योग्यलाभात् नस्वार्थान्वयानुभावकत्वं विश्वजितायजेतेत्यत्र ममेदं कार्यमितिप्रवर्तकतात्पर्य
विषयकज्ञानं नाधिकारिणं विनेतितदाकांक्षायदाकर्त्तुरि वाधिकारिणोप्याक्षेपादेव लाभ इति
तदन्वयेन शाब्दः किंत्वानुमानिकः गौरवात् शालाद्वारिकयोरनुभावकत्वपक्षात्तदुपस्था
पितस्य तस्याव्याहृतस्यैवेतरपरं विनानानुभावकत्वं घटः कर्मत्वमानयनं कृतिरित्यादाव
भेदेनानान्वयबोधो योग्यत्वात् तत्र न तत्पदेभ्यः तात्पर्यविषयतत्तत्पदार्थस्वरूपज्ञानेऽ
पि पदांतरं विनैव घटमानयतीत्यत्रेवाभेदेनैवान्वयतात्पर्येविद्वक्रियाकारकभावेनान्व
यः नामविशिष्टैर्भक्तिधात्वाख्यातक्रियाकारकपदार्थानामन्वयबोधेतात्पर्यं च समभि
व्याहृतदर्थकानि पदांतराणि अग्निः करणत्वमोदनः कर्म नायकः कृतिरिष्टसाधनेत्रिव
देभ्यो अग्निनौदनं पचेतेत्यत्रेवान्वयाबोधात् अग्निकरणकौदनकर्मकपाकविषयकृती
ष्टसाधनमितिवाक्यं न पदं अत एव घटमित्यत्र विधेहि व्याहारः क्रियापदार्थस्यान्वय

पद

त·चि·म· उपस्थितावपि कारकानन्वयानाभ्रसमाघ्रर्थानुत्वभावात् अनासन्नविभ्रासाद्भत्वाद शा·विवेक
६ शायाभासन्नत्वभ्रमेणावान्वयबोधसमर्थमेव वह्निनासिंचतीत्यत्र क्रियाकारकपद
9 योरन्वयबोधसमर्थत्वेप्ययोग्यताज्ञानं प्रतिबंधकं दाहे समर्थस्याग्नेर्मणिरिव अतएव
वयोग्यताभ्रमात्प्रतिबंधकाभावेन ततोप्यन्वयबोधः नहि स्वभावतोसमर्थमानोपित्तर
सामर्थ्यं दहति पचति वेत्ति प्रकृते तु पदार्थस्वरूपज्ञानं च त्वय भ्रमोपि पुरुषपदं विना
पिराज्ञा इत्यत्र पत्रेण समस्यार्थानुभावकत्वमिति निराकांक्षा यद्यात्रया गां समरसो
ऽजनितान्वयबोधदशायां पुरुषान्वयतात्पर्याभावात् नान्वयबोध इत्यग्नेपि तु ध्यान
त्र चपुरुषोत्थिताकांक्षात्वातेनैवान्वय इति श्रुतिवाच्येतात्पर्यवशात् क्वचित् पुरुषेरोष
प्रथममन्वयबोधात् अतएवान्वयबोधसमर्थत्वे सति अजनितताल्पर्यधि— णान्वयबोधत्वमाकांक्षे
ति केचित प्रकृति प्रत्ययाभ्यमन्वयबोधे जनितेपि वाक्यैकवाक्यतावत् क्रियाकारकपदयोरजनान्वया
बोधातकत्वमाकांक्षा नत्व— —स्तुः विशेषजनितपदार्थोपस्थितिः घटः कर्मत्वमानयनं कृतिरि पद
त्यवंचित पदाजन्य पदार्थोपस्थिति वक्रासत्तिरन्वयबोधांगमित्यासत्यभावादेवं विधशब्दानां
न्वयबोधः त्वयोप्येवं विधपदार्थोपस्थितेराकांक्षाहेतुत्वेनावश्योपेक्षणीयत्वात् जनितान्वयबो
धान्नान्वयान्तरबोधः तात्पर्याभावादित्याकांक्षा याकारणतमेव नास्ति किंतु स्वजनकोपस्थि
तेः परिवायकत्वमात्रमिति ननुका योग्यता न तावत्स्वजाती येन्वय दर्शनं प्रत्याकर्थं वित्सा जात्य
स्याव्याववर्तकत्वात् पदार्थतावच्छेदके साजात्यस्यासजात्रः पयःपिबतीत्यादावत्तावभावात
त

---र्थस्यापूर्वत्वाच्च नापि समभिव्याहृतपदार्थसंसर्गव्याप्यधर्मवत्त्वं ---र्थस्यानुमेय
तापत्तेः नववस्तुगत्यासंसर्गव्याप्यो यो धर्मस्तद्वत्त्वं तच्च न ज्ञानमुपयुज्यते इति नानुमेयः संसर्ग इति ग
वाच्यं योग्यताभ्रमाच्छाब्दभ्रमानुपपत्तेः अत एवानन्वयनिश्चयविरह एव योग्यतास्वरूपसत्ती हे
तुः तत्र तद्धर्माभावनिश्चये तत्प्रकारकशाब्दज्ञानानुदयादित्यपास्तं नापि समभिव्याहृतपदार्थ
संसर्गाभावव्याप्यधर्मत्त्वं शून्यत्वं प्रमेयमभिधेयमित्यादौ संसर्गाभावस्याप्रसिद्ध्या तद्निरूप
णात् ---निष्ठ घटाभावे प्रमिते घटोस्तीति वाक्यार्थतन्निश्चये योग्यताज्ञानानुदयान्नः ना
पि बाधकप्रमाणाभावजन्यत्वपक्षान्तं तदभावस्यायोग्येपि सत्त्वात् नापि प्रकृतसंसर्गबाध
कस्याभाव--ति यो निसिध्यति विव्याघातात् नच प्रकृतसंसर्गे अन्यत्र सिद्धस्य बाधकप्रमाणस्या
भावः प्रकृतसंसर्गस्य प्रथमप्रतीतेरयोग्येपि तत्सत्त्वाच्च न तद्बाधकमप्यस्तीति चेत् तर्हि प्रकृ
तसंसर्गबाधकस्याभावः तच्चाप्रसिद्धं अत एव तत्र बाधकस्याप्यनिरूपणं नापीतरपदा
र्थसंसर्गाभावसिद्ध्याप्रमाविषयत्वाभाव्यपरमदार्थे केवलान्वयिन्यप्रसिद्धेः एतेन य
त्र संबंधग्राहकप्रमाणं नास्ति तत्र योग्यत्वमिति निरस्तं नापि बोधनीयसंसर्गाभावप्रमाविरहः प्रति
योग्यप्रसिद्धेः बोधनीयसंसर्गस्य पूर्वमप्रतीतत्वात् योग्यता च न स्वरूपसन्नुपयुज्यते त्युक्तेः अर
योग्यतास्तत्त्वस्यानिरूपणाच्च अपिच स्वीयबाधकप्रमाविरहस्यायोग्येपि सत्त्वात् बाधक
प्रमामात्रविरहस्य योग्येपि ज्ञातमशक्यत्वात् परप्रमायाप्ययोग्यत्वात् स च स्वरूपसन्नेवायं हे
तुः स्वकीयबाधकप्रमाविरहप्रत्यायां योग्यताभ्रमेण शाब्दभ्रमानुपपत्तेः अन्यपदप्रयोजनत्वात्

त॰ चि॰ म॰ पवत्वेनबाधकप्रमामात्रविरहोऽस्तु — — — इतिचेत् — — — न्वितेतोयेद्रवद्रव्यत्वेसत्यपिबाधकसत्वे प्रा॰ वि॰
१॰ नव्यभिचारात् उपजीव्यत्वेन तस्यैव योग्यतात्वापत्तेश्चरवैवमेवेनिधोपपद्यं — आकांक्षास
10 त्यन्वयप्रयोजकरूपवत्वे सत्यप्रमाधकाकोबाधकप्रमायांत्रन्वयावोधात् बाधकप्रमावि
रहोपिहेतुरितिचेत् न ह्यावश्यकत्वात्तस्यैवयोग्यता उच्यते बाधकप्रमाविरहोयोग्य
तामावेतरपदार्थसंसर्गेऽपरपदार्थतिष्ठात्येनाभावसातियोगित्वप्रमावि[illegible]त्वाभावः प्र प्रोष्य=
मेयवाक्यमित्यत्रप्रमेयत्तिष्ठात्यंताभावप्रतियोगित्वप्रमाविरोष्यत्वंगोत्वेप्रसिद्धं वाकाल
संसर्गेतदभावः वस्तुतस्तु इतरपदार्थसंसर्गेः परपदार्थनिष्ठात्यताभावप्रतियोगितावं
च्छेदकत्वं धर्म्मपरन्यत्वयोग्यतावाधवात् शाब्दज्ञानत्वाच्च नचनरशिरःमानवाधि प्रोचातु
तत्वादशौचबोधकशाब्दान्वयायोग्यबोधइतिवाच्यं उपजीव्यजातीयत्वेन शाब्दस्य
बलवत्वात्तेनैवतदनुमानबाधात् — — — कांक्षासतिमत्वेनशाब्दस्य प्रमाणतानतुयोग्यतापितत्रि
भावस्य वेशिनीसाप्राप्रमामात्रेहेतुत्वादितिचेत न संशयविपर्ययप्रमासाधारणासायोग्यताज्ञा
नमात्रस्यकारणत्वात् अयोग्यताज्ञानस्यप्रतिबाधकरूपत्वर्तत्राभावात् क्वचित्तु निश्च
योपि योग्यानुपलब्धायप्येहघटोनास्तीति आसत्तिश्चाव्यवधानेनान्वयप्रतियो
ग्युपस्थितिः साचस्मृतिः नानुभवानेवनान्योन्याश्रयः अपनानापिशेषशाक
मकिर्मकर्तृकरण — — विकरणक्रियादिकलिकपदजन्यक्रमिकपदार्थस्मृतीनीयोग
पद्यंसंभवति आप्रइतरविशेनांक्रमिका[illegible]कोनुपपत्तेरितिकल्पतावत्पदार्थान्वयबोधः

वाधोहिप्रमाणादोबोऽवक्रयं ग्रहश्चोऽवाधाप्रमाणानिकायेबाधासंभवात् यथानुमानेवाधादुपाधिकल्पनद्वाराव्याप्तित्रिधानःत्रिरूपा
धोवा — — — मेयंस्वरूपसत्तीप्रयोजकाभावाधासोध्वदप्रसंगात् नतिश्चभवति उपायाभावादितिचेत् न

वि
।।शेषणज्ञानसाध्यत्वात् विशिष्टज्ञानस्येति चेत् न प्रत्येकपदानुभवजन्य--
व॰१२ कारमेलकादेकदैवतावत्पदस्मृतिः ततएकदैवतावत्पदार्थस्मृतेःसत्त्वाद्वाक्यार्थानुभवः
न चान्यविषयसंस्कारेणान्यस्मरणमिति वाच्यं वाक्यार्थानुभवानुपपत्त्या
फलबलेन संस्काराणांपरस्परसहकारेण तत्रैकस्मरणकल्पनात् प्रत्येकवर्णसंस्का
राणामपि वानन्यगतिकतया पदस्मरणे अथ एवं घटादीनां योग्यं सन्निधानं प्रपद्य
तेनैव तेनैवान्वितस्यार्थः पदैरेवावगम्यते नैवमन्वयान्तराभिधानं तस्याप्यपरस्य व्यापारा
भावादिति वाच्यं एवमपि प्रथममन्वये हेत्वनुपन्यासात् उत्तरस्य हीदं सामग्रीचकल्पनं
पूर्वस्येति चेत् अस्तु तावदेवं तथापि चरमेत्तावत्पदार्थघटितवाक्यार्थानुभवे उक्तैव
गतिरनन्यगतिकत्वात् अत्र वदन्ति सन्निधिर्न शाब्दजनने वान्वयबोधहेतुः द्वारमि
त्यादावध्याहृतेनापि धानादिनान्वयदर्शनात् न चापि धेहि मिति शाब्द एवाध्याह्रियते
अनुपयोगात् अर्थस्यान्वयप्रतियोगित्वे --बोधेयोगित्वात् आवश्यकत्वाच्च
अर्थापत्तेः उपपादकविषयत्वात् न च शाब्दमात्रमुपपादकं अपितु तदर्थः अवश्य
कल्प्यार्थसहचरितेनैव शब्देन संपन्नशाब्दस्मृतेरन्यथासिद्धेः अन्यथा पदबोधित
स्यैवार्थस्यान्वयबोधकत्वमिति नियमस्य कल्पनापत्तेः स्वार्थान्वयपरत्वाच्छब्दा ।कि
नां द्वारमिति न पिधानान्वयबोधकमिति तदन्वयबोधार्थं अवश्यं शाब्दकल्पनमि
ति चेत् न लक्षणायां व्यभिचारात् न वाप्यादिप्रयोगेन तदन्वयबोधात् अथ यद्वार

पदसहभावमात्रंपिचेहिशब्दस्यकल्प्यतेलाघवात् नचापिधानाभिधायकानेकशब्दोपस्थितौ
विनिगमनाविरहःसंस्कारतारतम्यात् पदविशेष---तिचेत् न आकांक्षादिमत्त्वातियोग्य
न्वितस्वार्थपरत्वस्य क्लृप्तत्वात् लाघवेनार्थाध्याहारात् नचक्लृप्तपानलदाप्रयोजनानीतिक
थमध्याहृतेतेषांतात्पर्यमितिवाच्यं श्रुतार्थान्वयानुपपत्त्याऽध्याहृतेतात्पर्यात् कथंतत्तोदि
नंपचतीत्यत्रसमभिव्याहृतमात्रादन्वयःकलायादेरपिस्मृतित्वादितिचेत् न तात्पर्यनिय
मादित्यवेहियत्परःशब्दःसशब्दार्थः अन्यथानवापिदेववसंस्मृतकमोलापपदोपस्था
पित्तेनान्वयबोधःस्यात् अपदेवदत्तउदनमित्यादिवाक्येक्रियापदाध्याहाराभावेनक
र्तुरनभिधानात् तृतीयास्यादितिचेत् न अध्याहृतपचतिपदेनापिकर्तुरनभिधानात्
कर्तृत्वसंख्याभिहितेतिचेत् न देवदत्तस्यपाकइत्यत्रापितृतीयापत्तेः तात्पर्यतस्तत्रव्य
वस्थेतिचेत् तुल्यं ननुद्वारंपिधेहीत्यादौपिधानशब्दानुभवेपिधानोपस्थापकपदत्वेन
जनकत्वमितिचेत् न अन्वयधातीयोग्योपस्थापकपदत्वेनजनकत्वात् ननुनद्व
यंपस्थापकयावत्पदत्वेनगौरवात् एवंपिधानान्वयबोधोपि अन्यथागौतोता
द्वारीकयोरन्वयबोधोनस्यात् नयोरननुभावकत्वादिति उच्यते क्रियापदोप
स्थापितक्रियाकारकपदोपस्थापितंचकारकंपरस्परमाकांक्षातिनतूपस्थितमात्र
ंअन्यथा—रकर्मतापिघेहि द्वारंपिधानंकृतिरित्यत्रापिक्रियाकर्मध्याहारइ
नान्वयबोधप्रसंगःक्रियायाकर्म---पस्थितेतुल्यत्वात् एतदुपस्थितिमात्रंअ

र्थविशेषेऽसाधुत्वात् नात्रान्वयबोध इति चेत् न पिधेहीति पदं विना द्वारमित्यस्याप्यसा
धुत्वात् तदप्रयोगे साधुत्वस्य कल्पत्वात् साधुत्वबोधस्यान्वयबोधाप्रयोजकत्वाच्च
गौरवात् अपभ्रंशादप्यन्वयबोधाच्च नचात्रासंसर्गाग्रहो बाधकाभावात् ना
स्मात्क्रियापदस्य कारकपदेन कारकपदस्य क्रियापदेनान्वयबोधकत्वं नत्वेकं वि
नान्यपरस्यापि च सकर्मकक्रियापदयोग्यं विना द्वितीयानुपपत्तिः नहि क्रिया
पदाप्रयोगे द्वितीया घटादिरानयनं कृतिरित्यत्रापि द्वितीयापत्तेः तथा पुष्पेभ्य इत्य
त्र स्पृहयतिपदाध्याहारं विना चतुर्थ्यनुपपत्तिः यदि च स्पृहयतिपदाप्रयोगं चतुर्थी
तदा पुष्पमिच्छतीत्यत्रापि स्यात् स्पृहयतीच्छतिपदयोरेकार्थत्वात् अयसाधुत्वार्थं र्थद्वार
पुष्पेभ्य इत्यत्रापि योहि स्पृहयतिपदाध्याहारोऽनुमन्यते तन्तु अन्वयबोधार्थं तस्यान्व
यव्यतिरेकाभ्यां बोधोपपत्तेरिति चेत् न नहि क्रियापदप्रयोगं विना न कारकविभक्तिः
कारकपदयोगं विना न तदन्वययोगं क्रियापदमिति केवलकारके क्रियापदाध्याहारः
केवलक्रियायां च कारकपदाध्याहारः साधुत्वार्थमावश्यक इति तत्रान्येनोपस्थितिः
अन्वयबोधोपस्थापिकी तस्मात् क्रियाकारकपदोपस्थापितयोरेव क्रियाकारकयोः
परस्परमन्वय इति शब्दाध्याहार एव कर्त्रादेरपेतु वक्ष्यामः तात्पर्याधीनं शाब्दप्रामाण्यं
न त्वेतत्तु परत्वं न तत्साधकत्वे पदार्थतत्संसर्गयोः शाब्दासाधकत्वात् अन्यतरगोचर प्र
वृत्तिनिवृत्तिसाधकत्वं तु अभावार्थस्य साधनत्वात् भूतार्थस्य तु प्रशंसावाक्यस्य प्र
शस्तानिन्दितस्यार्थप्रतिपादनद्वारा लाक्षणिकस्य लक्षणीयविषयप्रवृत्तिनिवृत्तित्वं जनकत्वं

त॰चि॰म॰ तत्परत्वमितिचेत् तत्परत्वेनज्ञानंजनयित्वातत्प्रवर्तकत्वंतत्प्रवर्तकत्वंचतत्परत्वमितिपरस्पराश्र प्रा॰विवे॰
१२ यात् लाक्षणिकस्याननुभावकत्वेपिलाक्षणीयपरत्वात् काव्यादेःस्वरूपाख्यानमात्रपरत्वे
नापिपर्यवसानाच्च ननुतद्बुद्धिजनकत्वंतत्परत्वं प्रशंसानिंदावाक्यमपिप्रशस्तानिंदितार्थ
12 धीहेतुत्वेनतत्परमेव नह्यज्ञानंप्रशस्तेसर्वःप्रवर्त्तनेनिंदिताच्चनिवर्त्ततइति स्वविषयेप्रवृत्ति
निवृत्तीजनयतीतितत्परमुच्यतइतिचेत् गौणलाक्षणिकयोरननुभावकत्वात् तत्पर
त्वेनबुद्धिजननंतद्बुद्धिजनकत्वेनतत्परत्वमित्यन्योन्याश्रयाच्च तज्जननयोग्यत्वमितिचेत् तर्हि
ऽदीच॰१ कत्रोच्चारणेनानार्थेनानार्थपरत्वं लक्षणायांचमुख्यार्थपरत्वंस्यात् नापितत्प्रतिपादक
त्वं तात्पर्यंविनानतदपीत्यन्योन्याश्रयात् प्रशंसादिवाक्यस्यप्रवृत्त्याद्यप्रतिपादकत्वात्
लाक्षणिकस्याप्रतिपादकत्वात् अथगंगापदंस्वार्थाविनाभावितीरंप्रतिपादयततत्पर
मितिचेत् नसैंधवाःक्रोशंतीत्यत्रतेनविनापिपुरुषेणान्वयात् गंगादिपदंमत्स्यादिप
रंमुख्येतीरपरंचस्यात् अविनाभावस्यतादवस्थ्यात् मुख्येबाधकेसतीतिचेत्तर्हि
मुख्यार्थपरत्वेनैवनस्यात् तस्माच्च गच्छगच्छसीत्यत्रगमनाभावपरत्वं उच्यते न
तत्प्रयोजनकत्वंतत्परत्वंतदर्थःप्रतीतिप्रवृत्तिनिवृत्तीनांचप्रयोजनकत्वंनसाध्यत्व
मन्योन्याश्रयात् नापिप्रतिपाद्येच्छाविषयत्वंयस्ययदिच्छाविषयत्वंप्रतिर नतत्परत्वापत्तेः
तदर्थस्यसाधुत्वेनेच्छानियमइतिचेत् इहग्रामेइत्यत्रजनपदप्राप्यभेदेनसाध्यस्यबहुविधया:
वाक्यभेदप्रसंगात् उभयेच्छायानियंतुमशक्यत्वात् किंतुप्रतिपादकेच्छाविषयत्वं यः

धी

शाब्दो वक्त्रा यद्विषया प्रयुक्तः स तत्परः सा चेच्छा प्रतिपाद्य[illegible] प्रवृत्तिनिवृत्तिविषया इति तात्
ना.१५.२ पर्यत्वं नानार्थात् श्लिष्टादनेकपदार्थान्वितैकक्रियापदात् उक्तबलात् लौकिकपराञ्चावृत्त्या-
क्रमेणानेकार्थज्ञानं न त्वेकदैव सकृदुच्चरितस्य सकृदर्थपरत्वमिति नियमेनैकत्रोच्चारणे
नानेकपरत्वाभावादिति सकलतान्त्रिकैकवाक्यतया वदन्ति अत्र ब्रूमः अनेकार्थ
प्रतीतीच्छया एकस्योच्चारणं भवत्येव इति इच्छाया नियन्तुमशक्यत्वात् यदि च तदुच्चार
णं नानेति कार्यपर्यायदा आवृत्तिरपि न स्यात् तात्पर्यनिर्वाहार्थमावृत्तेः कल्पनात्
अन्यथैकपरत्वापित्तदापत्तेः अत एव तदुच्चारणस्योभयपरतायां नावृत्तिकल्प
नं तस्मात् तुल्यवदनेकार्थोपस्थितौ तात्पर्यविद्भिस्तानेयुगपदेवान्वयबोधो भवति सा
माग्र्यात् तुल्यत्वात् प्रथममेकस्यान्वयबोधोनन्तरमन्यस्येति नियन्तुमशक्यत्वाच्च अपि च विव
दाध्यासितमपि पदोच्चारणमेकदा एकशक्तिविषयमेवानुभावयति एकपदोच्चारणत्वात्
घटपदोच्चारणवत् यथा एकत्रोच्चारणं नानाशक्त्या नानार्थानुभावकं नानार्थत्वादेक
परनानार्थपदवदिति चेत् न अनेकार्थानुभवसामग्रीसत्त्वेन बाधितत्वात् सामग्री
विरहस्योपाधित्वाच्च अत एवाप्यसमानयेत्युक्तौ भिन्नप्रकरणादिना भिन्नतात्पर्यप्रमायां
भ्रमे वा प्रतिपाद्ययोरेकदैवावृत्तिं विना नेकार्थप्रतीतिर्न तत्र एको विलंबने एवं घटं पटं वा
नयेत्यत्र नयनपदस्योभयपरत्वे एकदैवान्वयबोधो नत्वावृत्तिः वाक्यभेदस्त्वर्थभेदात् वक्ता
न भेदात् गंगायां जलं घोषश्च वसतीत्यत्र गंगापदात् तात्पर्यवशात् युगपत् प्रवाहती

रयोरेकदोपस्थितौजलशोभयोरेकदेवान्वयबोधः नचयुगपद्वृत्तिद्वयापत्तिरिष्टत्वात् ता
१२ त्पर्यात् वृत्तिः ननु इत्यनुबोधात्तात्पर्यं गोरालाद्दाशीकयोरुच्छेदापत्तेः तात्पर्यनिर्वाहार्थं
वृत्तित्वेन नतयोः कल्पनात् मुख्यलाद्दाशीकयोरेकैकमात्रपरत्वे युगपद्वृत्तिद्वयविरोधः
क अनेकान्वयबोधत्वे युगपद्वृत्तिद्वयविरोधस्य दोषत्वे परिभावायत्तेः यत्रमध्यार्थेशीघ्रत्वेनप्रथम
मन्वयबोधोऽनन्तरंलाद्दाशीकान्वयबोधस्तत्रावृत्तिरेव तस्माद्युगपत्तात्पर्यग्रहे सति नावृत्ति
13 किंत्वनेकार्थपरत्वे सत्येव यत्र तात्पर्यग्रहः क्रमादन्वयबोधः क्रमस्तत्रावृत्तिः अथमोच्चारणस्य
पर्यवसितत्वादिति एवं च लोके कॢप्तत्वात् वेदे बोधितात्पर्यमितितस्य पौरुषेयत्वं अत्र मीमां
सकाः यथोच्चारणपूर्वकत्वादुच्चारणं वेदे परतन्त्रं तथा तात्पर्यमपि तात्पर्यपूर्वकत्वमेवे
ति परतन्त्रं नतु कस्यापि प्रथमं तात्पर्यमनादित्वात् पूर्वपूर्ववाक्यार्थज्ञाने पोच्चारणा
मुपजीव्याग्रिमाग्रिमस्य तदिच्छयोच्चारणात् तदिच्छयातदुच्चारणेवाहितत्परत्वं लोकवे
दसाधारणं साविच्छात्वतन्त्रापरतन्त्रा चेति नकश्चिद्विशेषः तदवधारणं चतदिमीमांसापरि
शोधितन्यायाद्वेदे इत्युभयत्रापि सिद्धं अतस्तात्पर्यानुरोधान्न वेदस्य पौरुषेयत्वं नन्वर्था
ज्ञानं विनोच्चरितवेदात् कथमर्थधीः वाक्यार्थज्ञानं विना तदिच्छयोच्चारणाभावात् ।
प्रतिपत्रुक्चारणस्य भेदादितिचेत् तर्हि पिचमा॰ नभारतादपितत्वात् ज्ञानादर्थधीर्न
स्यात् व्यासेनयदिच्छयायदुच्चारणं कृतं तज्ज्ञानीयत्वादर्थज्ञानं विना पिठ्यमानभारता
८ तार्थधीरिति चेत् तर्हि वेदेपि तुल्यं न तात्पर्यकज्ञातीयतस्या नियामकत्वाच्च अन्या

प्यापद्यमानवेदत्तवाप्यर्यधीर्नस्यात् ईश्वराप्रणीतत्वात् अपवेदपौरुषेयोवाक्यत्वात् भा
रतवदितिचेत् कोवेदः अनुगतधर्माभावेनतस्यशाखात्वनानार्थत्वात् तथाहि नस्र
स्यवेदपदप्रयोगविषयोवेदोमुख्यार्थकथनात् नापिशाखासमुदायस्तस्यवेदनिरूप्य
त्वात् समुदायस्याप्रतिपादकत्वेनवाक्यत्वासिद्धेश्च नापिस्वर्गकामादिवाक्यं स्मृति
भारतादेरपितथात्वात् नापिसोदिष्टकर्तृकवाक्यंवादिनोर्निश्चयात् वाद्यनुमानयोस्तु
ल्यत्वेनमध्यस्थस्यसंशयइतिचेत् नाद्यनुमानाभ्यांतस्यसंशयोमध्यस्थस्यप्रश्नानंतर
वानुमानमित्यन्योन्याश्रयः नापिविवादाध्यासितंवाक्यं अनुगतधर्मंविनाविवादस्या
व= प्यभावात् भारतादावपिततसंभवा[illegible] नापिमहाजनानांवेदाकारात वेदत्वंजातिः देवद
त्तीयत्वानुमापकशब्दवृत्तिजातिभिःसंकरप्रसंगात् किंचपौरुषेयत्वेनतावदर्थधीजन्यत्वे
नउच्चारणाधीप्रभवत्ववाव्याप्यकतदुभयधीजन्यत्वेनासिद्धसाधनात् नाप्युच्चारणा
स्यसादित्वंप्रत्युच्चारणस्यादिमादित्वात् नापिस्वतंत्रपुरुषप्रणीतत्वं पठ्यमानवेदभा
रतयोस्तदभावात् तज्जातीयःस्वतंत्रपुरुषप्रणीतइतिचेत् नहिपठ्यमानभारतंव्या
सस्यनममेतिकथंस्यात् स्यात्तंत्रंपठ्युच्चारणव्यक्तौतदाप्रमाणितेउच्चारणसामान्येन
व्यासस्यापिकिंचस्वतंत्रपुरुषप्रणीतमात्रजातीयत्वंयत्किंचित्साध्यंतदाप्रभारतेस्य
तौचवाक्यत्वमनैकांतिकं नहितज्जातीयंस्वतंत्रपुरुषप्रणीतमात्र अपस्वतंत्र
हतवेदजातीयस्वतंत्रपुरुषप्रणीतत्वमिष्टं अनिर्धारितविशेषसाध्यं जीविकाविद

स्तीतिवदितिचेत् न पठ्यमानभारते व्यभिचारात् अथार्थप्रतीत्यतदर्थपरतया प्रतिसं
धीयमानपदत्वं पौरुषेयत्वं तस्य प्रथमस्यावश्यकत्वात् अत एवानुच्चारितापि मौनिश्लो
कापौरुषेयाइतिचेत् न अर्थज्ञानवक्ताध्यापकेन सिद्धसाधनात् अन्यथा पठ्यमान
वेदभारताभ्यां च व्यभिचारात् अत एव वेदत्वं स्वतन्त्रप्रणीतवृत्तिवाक्यवृत्तिधर्मत्वा
त् भारतत्ववत् इति निरस्तं स्वतन्त्रप्रणीतत्वे वाक्यार्थगोचरयथार्थज्ञानविरव्यापवि
षयोच्चारणं तच्चाविद्याध्यापकेन सिद्धसाधनं एतेन वक्तृत्वानुवक्तृत्वयोर्भेदस्य लोक
सिद्धत्वात् सवक्तृकत्वं साध्यमिति निरस्तं नापि सजातीयोच्चारणानपेक्षोच्चरितत्वं
पौरुषेयत्वं पठ्यमाने वेदे बाधात् भारते व्यभिचाराच्च उच्यते शब्दतदुपजीवि प्रमा
णातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्र
माणशब्दत्वं वेदत्वं ईश्वरप्रमायाअजन्यत्वात् वेदार्थस्यानुमानादिविषयत्वेप्यनु
मानादेः वेदोपजीवकत्वात् स्मृतीनां भारतादिभागस्य च वेदसमानार्थत्वेपि शब्द
जन्यधीजन्यत्वात् वेदार्थप्रतीत्यनन्तरगायनात् सजातीयोच्चारणानपेक्षोच्च
रितजातीयत्वं पौरुषेयत्वं आद्यभारते न सजातीयत्वान्न व्यभिचारः अथवा वे
दत्वं सजातीयोच्चारणानपेक्षोच्चरितवृत्ति प्रमाणतावच्छेदकवाक्यधर्मत्वात्
स्मृतित्ववत् यद्वा वेदाः शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्याः प्रमा
णशब्दत्वात् भारतवत् न च पठ्यमानवेदे बाधो भारतमन्वादिस्मृतौ च व्यभिचारः

तेषां बुद्धिकर्तृकत्वात् तादृशज्ञानजन्यजातीयत्वं वा साध्यं तथा चैतदभावाद् वेदे अपौ
रुषेयत्वव्यवहारः तत्तु चाप्रयोजकमिदं वाक्यार्थगोचरयथार्थज्ञानपूर्वकत्वमेव प्राव प्रा
माण्ये तन्त्रं न तु वादृशज्ञानस्य शाब्दाजन्यत्वमपि गौरवात् अन्यथा वेदेऽपि नवबुद्धिकर्तृक
त्वेनाप्रामाण्यं स्यात् लोके तथात्वादर्शनात् एवं चानादिमीमांसासिद्धन्यायेनावगतता
त्पर्यात् वेदादर्थं प्रतीत्य पूर्वपूर्वाध्यापकेनोच्चरिताद्वेदादुत्तरोत्तरस्याध्ययनं तदर्थं
प्रतीतिरित्यवच्छिन्नानादितैवातः किं स्वतन्त्रपुरुषेराणानस्याप्रयोजनस्य परतन्त्रत्वादेव सिद्धेः किंच
पूर्वकालीनवेदपुरुष्यः कालत्वाद् वर्तमानकालवत् न वांशे वाधो वाश्रयासिद्धिः
अंगत्वेनानुपादानात् पूर्वकालीनवेदपुरुष इत्युद्देश्यप्रतीतेरसिद्धेनांशतः सिद्धसा
धनं तथा पूर्वकालीनवेदाध्ययनं गुर्वध्ययनपूर्वकं अध्ययनत्वादिदानींतनाध्य
यनवत् न च लिप्यनुमितिवेदाध्ययनेन व्यभिचारः लिपेरप्यध्ययनपूर्वकत्वात् नैवं
भारताध्ययनमपि तथा स्यात् तस्य भारतादावेवव्यासादिकर्तृत्वेनाकयनादिति
उच्यते वेदप्रामाण्याधीनं तत्प्रामाण्यमित्यादाशयः न च पूर्ववेदप्रामाण्याधी
नमुत्तरवेदप्रामाण्यमिति पुरुषभेदसाधनाद्यनाश्रय इति वाच्यं एवं तत्पूर्वकस्या
पि तत्पूर्वप्रामाण्यात् प्रामाण्यमित्यनवस्थानात् अनादित्वाददोष इति चेत्
न मूलभूतप्रमाणान्तराभावात् अंधपरंपरापातात् स्वतःप्रमाणं वेद एव सर्वत्र
वेदे मूलमिति चेत् न सर्वेषामेव परवेदापेक्षत्वेन स्वतःप्रमाणत्वाभावात् अतएव

वाचारात् स्मृतिः स्मृतेराचार इत्यत्रापि ध्यासवीजपरं न पेक्ष्य मूलस्मृतप्रमाणाभावादं चपर
परामृशेतत्र वेदमूलकत्वकल्पना अनादिमहाजनपरिग्रहादनादिवेदप्रवाहप्रामाण्यावधार
णोपिताभिर्वाहिनरा न पेक्ष्य मूलस्मृतप्रमाणाभावेनानाध्यास एव अन्यथा स्मृत्याचारयोरपे
वं प्रमाणावधारणे प्रमाणान्तरमूलकल्पनानवस्थात् तस्मादध्यासवीजपरानपेक्षेत्वरत्र
त्वत्यन्तमूलकत्वादेव वेदस्य प्रामाण्यं महाजनपरिग्रहादवधार्यते एतेनानुमानमपि निरस्तं
मूलस्मृतेरत्यन्ता विना वेदप्रामाण्यानुपपत्त्या साध्याभावासिद्धौ बाधात् ननु वेदो न पौरुषे
योऽस्मर्यमाणकर्तृकत्वादिति बाधकमस्त्विति चेत् न कपिलकणादगौतमैस्तच्छिष्यै
श्चाद्यपर्यन्तं वेदे सकर्तृकत्वस्मरणस्य प्रतीयमानत्वात् न च मूलस्मृत्यनुभवाभावात् स्मर
णानुपपत्तिः पौरुषेयत्वानुमानादेवानुभवात् अस्मरणमेव तत्र बाधकमिति चेत् न ए
वमस्य स्मरणानुभवयोरन्योन्याश्रयात् अथैतदर्थस्मरणाभावेऽपि प्रमाणस्यानुभा
वकत्वात् नहि भाविस्मरणमवेत्य प्रमाणमनुभावकं तस्मात्तपस्तेपानाच्चत्वारो वेदा
अजायन्त ऋचः सामानि जज्ञिरे इति कर्तृश्रवणात् प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधी
यते इत्यादिकर्तृस्मरणात् पौरुषेयत्वे बाधकं विना अर्थवादमात्रस्य वक्तुमशक्य
त्वात् स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कार
का इति महाभारतवाक्यस्य श्रुतिविरोधेनान्यत्र तात्पर्यात् न च कार्यपरमेव प्रमाणं क
र्तृस्मरणस्य सर्वत्राविध्यर्थत्वात् कर्तृत्वार्थवादस्य स्वर्गनरकार्थवादस्येव स्वरूपा
त्तीमेति विधिशेषत्वात्तत्साधयिष्यते च तत्तदर्थस्य प्रामाण्यं न चैवमानन्दोपीश्वरे

तद्व्यक्तीनां तद्विरोधात् पुरुषस्य भ्रमप्रमादादिश्रायित्वेन वेदे अनाश्वास इति चे
त् न धर्मिग्राहकमानेनानित्यत्वे सिद्धे तत्र दोषाभावादिति ननु तत्वाप्य
योग्रकं पौरुषेयत्वानुमानं नित्यनिर्दोषत्वेनैव तत्प्रामाण्योपपत्तेरिति चेन्न ग्रु
र्णानामनित्यत्वेन तत्कार्यस्य तदितरानित्यत्वात् न च तदसिद्धिः तथा हि
वर्णात्मकः शब्दोऽनित्यः सामान्यवत्वे सत्युत्पत्तिमत्वात् घटवत् न च हेत्वसिद्धिः उत्प
न्नो गकार इदानीं उत्पद्यमानोऽस्ति कोलाहल इति प्रत्ययात् न च व्यंजकाभावात्प्र
३४ न व्यंजकस्योपलब्धिमात्रं तस्य उत्पन्नो गकार इति प्रत्ययात् न चायमौपाधिकः
अन्योत्पत्तावगत्यभावाद्गायापपित्तत्वत् भवान् न च स्मर्यमाणारोपो बाधकाभा
वात् अन्यथा घटोत्पत्तिरपि नासिद्धेत् यत्र श्रोत्रानुविधानात्वदक्षगोमित्य
बाधितानुव्यवसायाच्छ्रोत्रादन्येन ग प्रत्यक्षत्वात् श्रोत्रग्राह्यैवानुपूर्वी सा च ही= य
समानकालप्रागभावप्रतियोगित्वं टस्योत्प्रागभावप्रतियोगित्वमुत्पत्तिमत्वं व
र्णस्य प्रत्यक्षासिद्धमिति तन्न य ज्ञानानन्तरज्ञानविषयत्वं टस्यानन्तर्यं तयोरानु
पूर्वी सिध्यमनस्यैव गृह्यते घटपटज्ञानयोरिव ननु उपनीताच्छ्रोत्रविषयः
ननु ऐवायं गकार इति प्रत्यभिज्ञानबाधितमिदमित्येके का एव गकारादिव्यक्तयः
यद्यपि प्रत्यभिज्ञाया नित्यत्वं न विषयस्तथापि नाशकत्वाभिमत शब्दान्तरादीना
मन्तरासंभवेपि तावत्कालीनतां गकारस्य गृह्णातीति तावत्कालीस्थिरैवैकः पक्षा
न्तराप्रायिष्यतीति परामिमताप्यविनाशित्वव्यतिरेकान्नित्यतायामेवपर्यवस्य

त॰चि॰म ऽतिनवगकारस्य भेदेऽपि तज्जातीयत्वेन प्रत्यभिज्ञा तथा सति तज्जातीयोऽयमिति स्या श॰वि॰

१६ न्न तु स एवायमिति अथ तारत्वमंदत्वविरुद्धधर्माध्यस्तविषयत्वेन सा प्रमाणं न

व तारत्वादीनां स्वाभाविकत्वे विरुद्धत्वं चासिद्धं मंदत्वारो गकारस्तारात्मादोन्य इत्यन

16 न्यथासिद्ध अन्यत्वासिद्धेः न च पांशौत्पन्नत्वे तालाविके इत्यत्र अन्यत्वादन्यत्र भ्रमा

रात्ताकियोय द्वत्वे नत्वासतेसत धर्म एव तथा सति रक्तः पटः लोहितस्फटिक इत्या

दावपि तथाप्रत्ययाद विशेषात् न रक्तत्वादीनां अन्यधर्मत्वस्थितौ स्फाटिकादीनां च

व॰ तद्विरुद्धधर्मत्वे स्थिते ज पाकजरूपादेरन्वयव्यतिरेका विधानाद्बाधेन तत्र भ्रान्तत्वात्

न चेह तारत्वादेरन्यधर्मत्वे नोपस्थितिर्नापि गकारादीनां तद्विरुद्धधर्मवत्त्वं नान्यस्या

तारत्वादिधर्मिशोऽनुविधानान् च बावश्यं स्वीकृतवायोरेव धर्मास्तारत्वादयो गका

रादिगतत्वेन भासंत इति वाच्यं स्पर्शाग्रहे त्वचो व्यापाराभावेन त्वचा तदग्रहात् न च श्र

वणात् द्रहः अवायवीयत्वेन वायुमात्रधर्मग्राहकत्वात् वकत्वत् तारत्वादयो वा न वा

युमात्रधर्मा श्रावणत्वात् कादिवत् वायुवृत्तिश्रावणमात्रग्राह्यधर्मान्तरत्वात् घ

टवत् अत एव तारत्वादयो न वायुधर्म इति धर्मः वायुधर्मस्य घनेरप्यहात् न

च घ निरूपः शब्दो नभोवृत्तिरेव तथा सति न धर्म तारत्वादिग्रहः श्रवणमिति वाच्यं

तारोयं गकार इत्यत्र ध्वनीनामस्फुरणात् तत्कारणाभावाच्च न च व्यक्त्या

विनाशात्तानिग्रहणं न स्यात् व्यक्तिसमानसंविदवेद्यत्वात् न च समयमारणा

तारत्वाद्यारोपे बाधकाभावात् अथ मतस्तारत्वाद्यपरहस्य संगाद्येति मैवं ता

रत्वादयो न गकारादिजातय गत्वादिना संकरप्रसंगात् नच नानैव तारत्वं तारगकारानुगतप्र-
त्ययाभावप्रसंगात् नच सजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकश्रावणवृत्तिजातित्वेन ना-
नातारत्वेष्वनुगमः तदप्रतिसंधानेपि तारत्वानुगतप्रत्ययात् तारत्वमंदत्वेच न श्राव-
णवृत्तिजाती तत्प्रतियोगिकत्वात् नापि तारत्वमंदत्वयोर्विरोधः य एव गकारस्तार आसी-
त्स एव इदानीं मंद इति समयभेदेन वस्तुभेदेन च तयोरेकत्र प्रतीतेः तारोयं न तु तारतर
तारतमं दोन्य इति भेदप्रतीतिरस्तीति चेत् न धर्मिणोरभेदभासमानो विरोधी धर्मिभे-
दप्रतीतेर्धर्मिभेदविषयत्वात् एकत्र घटे लोहितोयं न श्याम इदानीमिति प्रतीतिवत् न च
तीव्रेण गकारेण मंदगकाराभिभवात्तयोर्भेदः नहि देवदत्तर[illegible]धिभावकं तस्यैव तदैव ते-
नैव ग्रहणाग्रहणयोर्विरोधादिति वाच्यं तारत्वव्यंजकवायोर्बलवत्त्वे मंदत्वव्यंजकवा-
य्वभिभवात् मंदत्वस्याग्रहणात् संकुचातारमंदरूपाभिन्ना एव गकाराः तत्प्रत्य-
भिज्ञाने बाधकाभावात्तस्मात् वायुधर्मास्तारत्वादयः सर्वगतत्वेन तत्समलेदर्पणधर्मा ९०५
इव स्वरत्वादौ तद्ग्रहणं वस्तुतस्तु स्पर्शतिरस्कारे शोकरापाकुली त्वगिंद्रियेण मंदजनकवायूनां
त्ववायुत्वाबाधकबलस्योद्भूतस्पर्शस्य स्वीकारात् श्रोत्रेणैव वा चक्षुरादेर्धर्मवायु-
धर्मग्रहः तत्र योग्यत्वमुपाधिः अन्यथा श्रोत्रेण स्वगुणेन गत्येन इंद्रियेण त-
था दर्शनात् चक्षुर्वा पार्थिवरूपग्राहकं अपार्थिवेंद्रियत्वात् रसनवदित्याप-
त्तिस्यात् अथ योग्यायोग्येन गत्युतेस्वगुणाः परगुणा वा योग्यतावकलेवलेन
कल्प्यते तर्हि श्रोत्रस्यापि वायुधर्मग्रहे तुल्यं न च तारो गकार इत्यत्र वायोरप्रतीतिः

तं॰चि॰म॰ वायुत्वेनाप्रतीतावपि तारत्वादिनैव तत्प्रतीतेः यथाग्नित्वेनाप्रतीतावप्ययोगोलके लोहितत्वप्र प्रा॰विवे॰
१२ तीतिः ननु वायुशब्दयोस्त्वचा श्रोत्रेण वा ग्रहे केन तारो गकार इत्यारोप इति चेन्न उभ
येन्द्रियग्राह्ययोरसंसर्गाग्रहात्संसर्गव्यवहारः अतएव त्वगिन्द्रियोपनीतस्य श्रोत्रेणारो
17 पः श्रोत्रेणैव वा तारत्वग्रहोपीत्युक्तं उत्पत्तिमत्त्वं वास्तिबं तत्प्रतीतेः अतएवायं गकार इति
प्रत्यभिज्ञाबाधितत्वात् ननु प्रत्यभिज्ञैव तत्प्रबाधिता गत्वजात्यैवाधिको भेदप्रत्ययो ग
कारे संभवतीत्युक्तमिति चेन्न न गत्वजातेरसिद्धेः भेदेभासमानेपि भेदप्रतीतिर्जा
तिमालंबनेन गकारे भेदप्रतीतिरास्ते तारत्वमंदत्वे अपि न भेदहेतु य एव तारः स एव इ
दानीं मंद इति प्रत्यभिज्ञानात् गकारानित्यत्वेपि तथा संभवतीति चेन्न नहि नित्यत्वे
त्व पि करणाकुलीगीन्द्रियोपनीतवायुधर्मोत्पत्तेः उपाधित्वं संभवति न च वायोरप्रतीतिरुत्पत्ति
त्वेन तत्प्रतीतेः लोहितत्वेनेव जपाकुसुमस्य स्फाटिके अतएव प्रागनुपलभ्यमानत्वे सत्यु
पलभ्यमानत्वेनोत्पन्नस्य शब्दस्येव तत्तोत्पत्तिमत्त्वारोपः न चैवं घटादावुत्पत्तिः स्या वाविः
द्वेदिति वाच्यं कुलालव्यापारानंतरमनुभूयमानघटस्य तद्व्यापारप्रागननुभूयमानघ
टेनाभेदोभासतो किं तु भेद एवेति तत्र प्रागसत्त्वे सत्त्वासिध्यति गकारे तूत्पत्तिप्रतीत्यनं
तरं कंठताल्वादिव्यापारात् पूर्वमनुभूयमानगकारेणाभेदप्रत्यभिज्ञानात् दीपवत्
व्यञ्जक एव अथ शब्द उत्पद्यते उत्कर्षत्वे सति अपकर्षत्वात् माधुर्यवत् अतएवा
नित्यत्वमिति चेन्न तारत्वमंदत्वयोरुत्कर्षापकर्षयोर्गकारे पूर्वन्यायेनासिद्धेः
सिद्धौ वा जातिसंकरभयेनोत्कर्षापकर्षत्वात् ध्वनित्वप्राप्तेर्व्याप्यत्वेनौपाधिकत्वेन

रसशब्दसाधारणाभावात् अतएव सजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकसामा
न्यमुत्कर्षः तत्प्रतिबध्यसाक्षात्कारविषयतावच्छेदकसामान्यमपकर्ष इति साधारणो
हेतुरप्यास्तः तारत्वादेः गकारजातित्वासिद्धेः साधतावच्छिन्नसाध्यव्यापकमूर्त्तगुणत्व
स्याऽश्रोत्रगुणत्वस्य चोपाधित्वात् अप्रयोजकत्वाच्च नहि कारणाधीन एवोत्कर्षो
पकर्षश्चपरममहतिपरमाणौच्चपरिमाणोत्पत्त्येकमत्वात् नचउभयस्य एकत्रसत्व
कारणाप्रयोज्यं एकैकवत् द्वयोरपिप्रत्येकमेकत्वात् स्यादेतत् श्रोत्रव्यापारानंतरमि
दानीमुत्पन्नः सर्वो गकारो नास्ति विनष्टः कोलाहल इति प्रतीतेः प्रत्यक्षमेवप्राद्वानित्यत्वं
विनाशीभावत्वेनोत्पत्तिमत्वानुमानाद्वा प्रत्यक्षप्रतियोगिकत्वाभावेन हि प्रकृत्वं ध्वंसस्य त्य
घटध्वंसवत् नतु विनाशग्रहे प्रतियोगिसमवायिप्रत्यक्षत्वं नत्र धर्म्मीभावप्रत्यक्ष
त्वापत्तेः तदिंद्रियाग्राह्यपि प्रतियोगिसमवायिनि गंधरसाभावयोर्ग्रहणाच्च नोभयं
गौरवात् स्पर्शतघटसंयोगध्वंसाप्रत्यक्षत्वापाताच्च नच प्रतियोगियोग्यत्वस्यतंत्रत्वोपि
वायुस्यशांध्वंसोपि प्रत्यक्षः स्यादिति वाच्यं आश्रयनाशजन्यस्य तस्य ग्राहकेंद्रिय
सान्निकर्षाभावात् किंच यस्य सत्व यत्रानुपलब्धिविरोधिनस्याभावस्तत्र गृह्यत इति
योग्यानुपलब्ध्यर्थः अतएव पृथिवीत्वाभावो जलपरमाणौ न प्रत्यक्षः प्रत्यक्षश्चवा
यौ रूपाभावः अस्तिचतत्पा शब्दो तस्य सत्वे तस्य च धानेच प्रतीति प्रसंगात् निर
धिकरणाभावप्रतीति नास्तीतिचेत् न इहेदानीं शब्दो नास्तीति प्रतीतेः तस्मा
प्रत्राधिकरणे समये वा प्रतियोगी वर्त्तते तत्र तदभावोपि नूत्पत्ते अतएव सद्भामभा
देश्रो

 वोनिरूप्यत इत्युक्तं शब्दाभावस्य सत एवेंद्रियसन्निकृष्टत्वान्नाश्रयसंनिकर्षापेक्षा इंद्रिय
विशेषणतयानाभावग्रहणमितिचेन्न अयोग्यत्वस्योपाधित्वात् अन्यथा गुणस्य सं
युक्तसमवायेन ग्रहणादर्शनात् न समवायेन शब्दग्रहः स्यादिति मैवं सत एव शब्द
स्य व्यंजकविरहादनुपलब्धिमात्रं न तु ध्वंसः तथाप्येनरसकलतदुपलंभकसमवधाने त
दनुपलब्धिरूपयोग्यानुपलब्धेरभावात् प्रतियोग्युपलंभकव्यंजकः वायोरभावात्
विनष्टप्रतीतेरपि त्वगिंद्रियोपनीतव्यंजकवायुस्पर्शध्वंसोपाधिकैव वायुर्नैत्या
दकः किंतु व्यंजक इति किं विनिगमकमितिचेन्न इदानीं श्रुतपूर्वो नास्ति विनष्टः कोला
हल इति प्रतीत्यनंतरं पुनः श्रवणे श्रुतपूर्व एवायं गकारः पुनः स एव कोलाहल इति
प्रत्यभिज्ञानमेव घटध्वंसप्रतीत्यनंतरं न घट इति प्रत्यभिज्ञानाभावात् तत्राविनष्टप्र सएवायं
तीत्या ध्वंस एव सिध्यति अत एव तारत्वमंदत्वभेद तारत्वप्रतीतीनां भ्रमत्वकल्पनाद्वरं
प्रत्यभिज्ञानमात्रस्य भ्रमत्वकल्पनमित्यपास्तं एताह प्रतीतिर्बुधभेद प्रत्यभि
ज्ञानात् स्याद्वेतत् शब्दः प्रयत्नसाध्यः तदाभिनाभिव्यंग्यत्वे सतीन्द्रियानंतरमु द
पलभ्यमानत्वात् घटवत् अभिव्यंजकत्वं हीन्द्रियसंबंधप्रतिबंधकापनयनपक
त्वात् इंद्रियसंनिधायकत्वाद्वा कुड्योत्सारणेन वपटादीनां तदुभयमपि शब्देन संभवति
नित्यसमवेनत्वेनावधारणापनयसंनिधापनयोरभावात् नापि श्रोत्रसंस्कारात् इं
द्रियसंस्कारकस्याञ्जनादेः सहृदिंद्रियसंबंधयोग्यसर्वार्थेपि [illegible] कूलसंस्कारज लब्धानु
नकत्वं दृष्टं न च वायुरपि संस्कुर्वन्नेव सर्वशब्दोपलब्धानुकूलं श्रोत्रसंस्कारमादध्यात्

त्पाच्च सर्वशब्दोपलब्धिः स्यात् न दुक्तं सहकारसहकृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत् घटायोन्मी
लितं चक्षुः पटं नहि न बुध्यते अन्वयव्यतिरेकाभ्यां कार्ये प्रतिनियमस्य जनकजन्यत्व
वच्छेदेपि प्रतिव्यंजकव्यंग्यत्वमिति चेत् न वर्णानां हि न प्रतिनियमव्यंजकव्यं
ग्या एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वात् घटैकत्वपरिमाण
वत् न चावयवसंयोगवक्तृत्वाव्यंजकव्यंग्येनावयविनाऽत्पलत्वव्यंजकदीपा
व्यंग्येन तन्नीलिम्ना घटवृत्तिपृथक्त्वाव्यंजकव्यंग्येनैकत्वेन वा व्यभिचारः अव
यवसंयोगावयविनो नीलिमोत्पलत्वयोश्च व्याप्यव्याप्यवृत्तिनोरुत्पलत्वस्य वा
धिकवृत्तित्वेनैकावच्छेदेन वृत्त्यभावात् वक्तृत्वे एकस्य व्यंजकव्यंग्यत्वं चावयवैक
त्वयोरिति न परस्परव्यभिचारि व्यंजकव्यंग्यत्वं अत एव नीला बलाकेत्यत्र रूप
परिमाणयोरत्र निषिधानवंशसंख्यापरिमाणयोर्गन व्यभिचार इति मैवं वर्णानां प्र
तिनियतव्यंजकव्यंग्या अप्रियेण सह समानेन्द्रियग्राह्यत्वात् गंधवत् दित्याया
ततः सन्त्वाति पक्षत्वात् वस्तुतस्तु अनन्यथासिद्धप्रत्यभिज्ञानबलेनाभेदसिद्धौ
प्रतिनियतव्यंजकव्यंग्यत्वसाधकस्यैव बलवत्त्वशब्दस्य शब्दजनकत्वं शब्दना
शकत्वं च वीचितरंगन्यायेनोत्पत्तिकल्पनं च कल्पनमेवाशब्दस्य पूर्वशब्दजनकत्वात् अ
नाशकत्वाच्च अंत्यादिशब्दवत् एतेनैसामान्यवत्वे सत्यस्मदादिवाहिरिन्द्रियप्रत्यक्ष
त्वादित्यादिपि दिकमपास्तं प्रत्यभिज्ञया बाधात् शब्दत्वगत्वादेरसिद्धेश्च तस्मा
दानित्यो मेव गुणान्यानन्त्यपरिमाणवत् श्रोत्र ह्यत्वाच्छब्दत्ववद्विशेषगुणानां

ग्रा

तथा समानाधिकरणैकवृत्तिगुणत्वात् समयपरिमाणवत् पृथिवीतरनित्यवृत्तिविशेष
गुणत्वात् अपाकजत्वे सति नित्यैकसमवेतत्वात् जलपरमाणुरूपवत् अव्यासज्य
वृत्तित्वे सत्यनात्मविभुगुणत्वात् कालपरिमाणवत् विपक्षबाधकं च प्रत्यभिज्ञानमे
वेति अत्रोच्यते गकारादिव्यक्तयोनेकैकाः अस्ति हि शुकसारिकामनुष्यप्रभवेषु स्त्री
पुंसत्वादिविशेषप्रभवेषु च गकारादिषु स्फुटतरवैलक्षण्यात् स्वरूपतो भेदप्रथा रक्तनीलादि
माधुर्यवत् न चायमौपाधिको भेदप्रतीतिः न हि विदितकुंकुमस्य कुंकुमाकरणात्तरुणी
त्विवत् स्त्रीपुंसप्रभवत्वमात्माभिविकल्पोपाधिः इंद्रियासन्निकर्षेणास्त्रीपुंसादिभेदमविदु
षोपि शब्दे भेदप्रत्ययात् यतो नुमापयंति शुकशब्दोयं स्त्रीशब्दोयमित्यादिः अन्य
थान्योन्याश्रयात् तत्प्रभवत्वज्ञाने भेदप्रत्ययं तस्माच्च तदनुमानमिति न च रूपाणा
न्वयव्यतिरेकानुविधानात् रूपाणां ह्रस्वदीर्घत्ववदौपपत्तिक औपाधिकत्वं अन्या
नुविधानाभावात् अथ व्यंजकवायोरेव वैलक्षण्यं शुकादिगकारगतत्वेनभास
ते वायोरुपलब्धिस्तेनैव रूपेणेति चेत् न गकारगतत्वेन बाधकाभावात् न चाभेदप्र
त्यभिज्ञानं बाधकं न हि स एवायं शुकशब्दः स एव स्त्रीशब्द इति प्रत्यभिज्ञानं अन्यथा
तेषु भेदज्ञानाभावेन वक्तृविशेषानुमानं न स्यात् न चाभिव्यंजकवायोरेव वैलक्ष
ण्यं शुकाद्यनुमापकं तस्य गकारावृत्तित्वात् तत्र वायोरनुमितेः व्याप्तिव्यापाता
त् तस्माद्यथा कृष्णो गौः शुक्ला गौरिति भेदभासमाने गवाकारानुगतप्रतीतिर्गोत्व
मालंबते तथा शुकादिगकारेषु भेदभासने प्ययं गकारोयमपि गकार इति बुद्धिः

गत्वमालंबन इति यत्त्वयाभिहितं मे तदयथावोपपद्यते किंच गत्वादिकं यदि न जातिस्तदा
कोलाहलप्रत्ययो न स्यात् तथाहि नगरादौ बहुभिर्वर्णानामेकदोच्चारणे दूरस्थेन
नाभिव्यक्तगकारादिवर्णविभागं कोलाहलमात्रं श्रूयते न च तत्र वर्णान्यस्य ध्वनिरू
पस्य शब्दस्य स्फूर्तिः संभवति तदभिव्यंजकभेरीताडनादेरभावात् न च वर्णाभिव्यं
जकत्व एव ध्वनेर्व्यंजकः सन्निधानेपि श्रूयमाणवर्णेन ध्वनेः संगात् न च वर्णाभिव्यं
जकवायुभिरेव दूरे ध्वनिमात्रमभिव्यज्यते न व्यंजकस्य ग व्यंजक इव ध्वनिव्यंजने
सामर्थ्यात् तत्सामर्थ्यं शंखादेरभावाच्च न च तत्र शब्दत्वमेव प्रतीयते न शब्दः व्यक्त्या
ग्रहे जात्यग्रहात् न चाभिव्यंजको वायुरेव कोलाहलत्वेन प्रतीयते शब्दत्वेन प्रत्य
यात् संनिधावपि तथा प्रत्ययप्रसंगाच्च गकारादिग्रहेपि तच्चांपस्पर्शभेदाग्रहात्
कोलाहलधीरिति चेत् न तेषु वैधर्म्याभावात् तदभावेन्योन्याध्यावस्याभावात्
स्वरूपस्य ग्रहणात् समीपे बहुगकारेषु भेदाभावेन तदग्रहे कोलाहलधीप्रसंगा
च्च अनेकवर्णोच्चारणस्य तत्र द्रुतत्वे दूरेपि तदप्रत्यापत्तेः तस्माद्दवश्यं गत्वादि जा ती
तिरूपे यायद ग्रहे गकारादिग्रहेपि कोलाहलबुद्धिव्यपदेशौ अस्ति च शब्दस्य कोपि
जातिविशेषः श्रोत्रग्राह्यः यस्मात्तास्यादिनि दिग्देशाविशिष्टशंखप्रभवत्वमनु
मीयते अव्यपदेश्यत्वेपि इक्षुक्षीरादिमाधुर्यादिवांतरवत्तत्त्वात् अन्यथा दिग्देशावि
शिष्टशंखादीनां ग्रहे श्रोत्रस्यासामर्थ्यात् तत्प्रतीतिर्न स्यादेव तथापि गत्वादिना
परापरभावानुपपत्त्या ककारादिगकारेषु न जातिविशेष इति चेत् ककककादिषु कत्वा
पत्रगकारा एवमासंतेन तथेति शेषः =६

दित्वव्याप्या जातिर्भिन्ना तया प्रत्येकं ककककारादिषु ककारादिप्रभवत्वमनुमाय तद्व्यवहारः
ननु ककवकारादिष्वेकजातिरस्ति ककप्रभवत्वानुमापिका तद्व्यवहारकारिका वा गत्वादिना
संकरप्रसंगात् गत्वं -- नाना अननुगत्वेन ततोऽनुगतव्यवहारानुपपत्तेः अत एव ता
मापि गत्वादिव्याप्यं नानाननुगत्वं तत्र विषये पि गत्वसंदेह — श्च व्याप्यतावच्छेदकरूपा
निश्चयात् न वानुगतव्यवहारानुपपत्तिः सजातीयसाक्षात्कारप्रतिबंधकतावच्छेदक
रूपत्वेनानुगतेन नानातारत्वेष्वनुगतव्यवहारसंभवात् तदज्ञाने व्यवहारासिद्धेः
तारत्वमंदत्वे च जातीसप्रतियोगिकत्वादिति वस्तुतस्तारत्वतार[illegible]रत्वं दिव उत्कर्षरूपा
जातिविशेषा एव तेषां चाश्रये ग्रह्यमाणता गृह्यन्ते नतूत्कर्षविध्यपेक्षा यथा मधुर
त्वादयः उत्कर्षव्यवहारमितरसापेक्षा कुर्वन्ति तथा मंदत्वापेक्षया तारत्वादिव्य
वहारः उत्कर्षस्तु जातिरूपादन्यो न संभावित एव गकारे ऽपृक्तेनैव अत एव था
सिद्धे भेदप्रत्यक्षबलेन वस्तु विशेषानुमानबलेन वर्तनात् हुर्गत्वकत्वव्याप्यं तत्ता
नात्वस्वीकारात् न वा पि वायुव्यक्तित्वे ककवादिककारादिव्यंजकवायुना विजाती
यत्ववाच्यं न प्यार्थककारव्यंजकवायुत्वव्याप्यं ककवर्णाभिव्यंजकवायुत्वं तद
ककगकारव्यंजकवायौ न स्यात् अव्यापकं तदा सर्व एव ककव्यंजकवायवः
ककवर्णाभिव्यंजकवायवः स्युः तस्मात् वायुव्यक्तित्वोपि तासां नानात्वमावश्यकं अप्यास्तु ह्री
उमादिगकारभेदस्तस्यापि यावद्धक्कभेदमवृत्ता एव नित्यवर्णाः प्रत्यभिज्ञानादिति चेत् अत उत्पा
दविनाशप्रतीतेर्भ्रमत्वासाबित्त एवायं गकार इति प्रत्यभिज्ञास्ति वत्तदनंतरमुत्पादविनाशाद्

20

मानचोत्पादादिप्रतीत्यभेदप्रत्यभिज्ञयोरन्यतरस्य परस्परं विहायान्यद्बाधकमस्ति । नचानयो
परस्परं बाध्यबाधकभावे विनिगमकं येनैकस्य भ्रान्तत्वेनाविरोधः स्यात् कथं भेदाभेदज्ञानयोः अ
न्यत्रावधारितं परस्परं प्रतिबंधकत्वं परित्यज्य प्रत्यभिज्ञयोरेकस्य त्वेप्यपरोत्पत्तिग्रहस्तिसंकरप्रविष्ट
तया प्रत्यभिज्ञानं बाध्यं नित्यत्वे प्रमाणतापि तु नेष्यते नन्वेवमुत्पत्तिमत्त्वादिनाप्यानित्यत्वसिद्धिः
कथमिष्यं उत्पादादिबुद्धिप्रत्यभिज्ञयोरवश्यं विषयभेद एकविषयत्वे विरोधे नैकान्ततरमपर
स्योत्पत्तिप्रसंगात् एवं च भेदे भासमाने प्रत्यभिज्ञापि तज्जातीयत्वं विषयो न व्यक्त्यभेदः न चै
वं तज्जातीयोयमिति स्यात् नेह सोयमिति वाच्यं तज्जातीयत्वप्रतीतेरपि सोयमित्याकारदर्श
नात् यथा सैवेयं गायत्री तदेवेदमौषधं — बहुभिः कृतं मयापि प्रत्यहं क्रियमाणा सन्तीत्यादौ न
हि तावद्वर्णमात्रमनुष्ठेयं जिनाराजनदीदीनादिषु तत्र नानात्वात् किं तु तदुच्चारणानन्तरमुच्चा
रणं न तज्ज्ञानानन्तरं ज्ञानं वा तच्च नानेति न प्रत्यभिज्ञापि नाभेदे न चाभेदेऽपि भासमाने उत्पा
दादिबुद्धिरेवान्यस्योत्पादादिकमवगाहते गकारगतत्वप्रतीतेर्भ्रान्तत्वप्रसंगात् न चे
दायत्ति अभेदे भासमाने न विरुद्धधर्मवत्त्वेप्यमानुदयात् विनिगमकाभावेनोभय
स्यापि यथार्थत्वाच्च कुत्र हि तस्याभेदो विषयः ... प्रथमं न भेदप्रथा तत्र एकमेद य-
सत्त्वेन दर्शनात् क्वचित्त्वाभ्रान्तानां तथाप्रभेदप्रतीतिस्तदितरबाधकाबाधात् तत्र
प्रत्यभिज्ञैव न भवति भवं ती तज्जातीयत्वमालंबते न — भ्रान्ता विशेषादर्शनेऽप्रमाउ
दयात् अपि च यथार्थरवादिप्रतीनामुत्पत्तिविनाशप्रत्ययात् तारत्वादिविरु
द्धधर्मसंसर्गाच्चानित्या — यं गुर्जरीत्यादि प्रत्यभिज्ञानं तज्जातीयत्वविषया तथा

त॰ चि॰ म॰ वर्णप्रत्यभिज्ञापि अन्यथासिद्धा नयोपिनित्याऽहः उत्पत्ति ------------ प्रतीतीनां प्रत्यभिज्ञाव श॰ वि॰
२१ लेनौपाधिकत्वात् नच वर्ण --- त्वेनैव भासमानाद्युतय उपाधयः संभवंति ------
------ कंठताल्वाभिघाताभावादिति वाच्यं वर्णोच्चारणदशायामपि गूर्जरीकादिजन
21 कानासंभावात् तस्य ------- स्यादि प्रत्ययस्य प्रत्यभिज्ञानस्य च तत्वे त्वोपिद्वयोरपि नि
त्यत्वमनित्यत्वं वा नचोभयोरपिनित्यत्वमेव ------ प्रत्यभिज्ञायास्तज्जातीयत्वविषयत्वात्
किंच यदि व्यापकः श -- स्यात्तदा हरत्यालोकाभावे घटस्येव व्यंजक ----- नुपलंभात्तत्स दे
हः स्यात् नत्विहेदानीं शब्दो नास्तीति निश्चयः तस्माद्वर्णो न नित्योऽनित्यो वा सत्वे सत्युत्वानि
मत्वात् अस्मदादिबहिरिंद्रियग्राह्यत्वे सति जातिमत्वात् अस्मदादिप्रत्यक्ष -- गात्वाद्वा
आत्मैकत्वप्रत्यक्षत्वपक्षे विशेषगुणत्वात् व्यापकसमवेतप्रत्यक्षाविशेषगुणत्वात् अना
त्मप्रत्यक्षविशेषगुणत्वाद्वा अव्याप्यवृत्तित्वात् ईश्वरज्ञानं च न तथा तत्त्वयोजककार
णाभावात् बहिरिंद्रियव्यवस्थाहेतुगुणत्वात् भूतविशेषगुणत्वात् उत्कर्षापकर्षशब्द प्रत्यक्ष=
प्रवृत्तिनिमित्तजातिमत्वाद्वि -- दि रसत्वादिव्याप्यजातेर्नानात्वेपि नादव्याप्तः प्रवृत्तिनिमि
त्त -- साधरणत्वात् नचात्र साधनाव्यभिचारस्य -------- त्रस्य साध्यस्य व्यापकः
स्पर्शवत्समवेतत्वमुपाधिः सर्वत्र वर्णात्मकशब्दपक्षीकरणो व्योमगुणोध्वनि ---- सा
ध्याव्यापकत्वात् स्पर्शवत्पदस्य पक्षमात्रव्यावर्त्तकत्वेन पक्षेतरत्वाच्चेति यदा वर्णाएव
न नित्यास ------- विवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूह णा पदानाकृत रूपा=
त्वात् तत्समूहरूपवाक्यस्य कृत -------- दस्येति तथापि परतंत्रपुरुषपरंपराधीन

तयाप्रवाहाविच्छेदमेव नित्यतां ब्रूम इति चेत् न स्मृत्या ------- स्वानामुच्छेददर्शना
त् स्यादेतत् विवादपदं --वेदबोधिकास्मृतिः स्मृत्यर्थानुभवजनकवेदमूलात्वविरो
-महाजनपरिगृहीतस्मृतित्वात् प्रत्यक्षवेदमूलस्मृतिवत् वेदमूलत्वं च वेदजन्यानुभ
वजन्यत्वं ज्ञानद्वारा च ज्ञानमानस्यैव वेदस्य स्मृतिहेतुतयानुमानं क्वचिदस्यैव ज्ञानादिव्य
वहितस्य परे ननु कारणाकारणानवेदे सत्येव तत्स्मृतिसिद्धाप्रे स्मृतिप्रणायनात् वेदार्थः
स्मृतिनाव प्रसिद्धिसिद्धप्रातीब्रास्मृत्यर्थस्मृतितएवोपस्थितः नच स्मृत्यर्थ --क
वेदानुमाने स्मृत्यर्थरूपवेदार्थस्याविषयत्वात् वेदोऽनुवादकः स्यात् ज्ञानांतरोपनी
तस्याविशेषणत्वेन विशि----न पाकृत्तौ मानसप्रत्यक्षायां पाकस्यासंनिकृष्टज्ञा ज्ञासं॰
ने संज्ञायाः ज्ञानाद्यर्थत्वात् तदनव्यवसायो ------ अन्यथा भ्रांतभ्रांतिज्ञ संकराप
त्तिः ननु शब्दार्थोऽनुमानस्याविषयः तस्यासिद्धत्वेनाजनकतया -------- त वेदो
नित्यानुमेय एवमनुमितदेवार्थमवबार्थस्मृतिप्रणायनसंभवात् ननु असंसारस
पठितस्य ------ भव - तोमोक्षि - कवदभिप्रायतोवानुपूर्वीह - नवर्णमात्रस्य निरर्थक
त्वात् ज्ञानजनकस्य ------ स्यानेकत्वे विशेषणानुमानाद्वेति चेत् न स्मृत्यर्थज्ञाप
कत्वेनैव ज्ञानस्य वेदस्य स्मृत्यर्थानुभावक --प्रादे --- न पदानुपूर्वीहितु व्यभिचारात्
पदस्य वर्णविशेषानुपूर्वीनियमोपि तत्तदवर्णानुपूर्वीकपदविशेषत्वे -- त्वं हर --दि
पदानां प्रत्येकं व्यभिचारात् किंतु व्यभिचारितदर्थज्ञापकत्वे ज्ञानस्य लाघवादा
वश्यकत्वाच्चेत् दय --- प्रज्ञानार्थत्वे किंचिद्वर्णकमस्वरविशेषणानुपयोगः अत

त॰ चि॰ म॰ ववर्णलोपादौ कुशमानयेतिस्तकारसंदेहे लिप्यानुच्चारणो वा हस्तकरसंदेहेपि वाक्यार्थबोधः श॰ वि॰
२२ ननु क्रामिकपदवत्त्वं वाक्यत्वं न चात्र पदक्रमः अनुच्चार्यमाणतयोच्चारणाधीनतत्पदयुगपदनुभी
22 यमानतयानुपूर्व्यधीनस्य वा तस्याभावादिति चेत् न नैक्रामिकपदवत्त्वं वाक्यत्वं गौर-- हि ५ पं॰ २
त्वादा-भावात् किंतु विशिष्टार्थपरशब्दत्वे तच्चात्रास्त्येव अपानुच्चार्यमाणस्य न वाक्यत्वं न
तान्यानुभावकत्वमिति चेत् न लि---तानामपि वाक्यत्वादर्थबोधकत्वाच्च लिपितुल्या
वे चक्रस्ततिः किं वाक्यमुच्चार्यनेव तच्चार्यमाणाद्वाक---प्य---च्चारयेदित्यत्रानन्वया
पत्तिः अनुच्चारित मौनिश्लोकस्य वाक्यं न स्यात् उच्चारणादशायां च वाक्य------
वस्यात् एकदा तावत्यदानामुच्चारणाभावात् न च---क्रियमाणाकारिष्यमाणोच्चार
णस्य वाक्यत्वे------स्याभावात् न----र्थविशेषज्ञापकत्वेनैक्यामादर्थविशेषधीः
अत एवास्ति वह्निलिंग---------स्नुमानं ननु तदर्थज्ञापकत्वेन ज्ञानात् पदात्य-
शा र्थ[illegible]नमात्रं स्यान्नतु संसर्गधीः घटः कर्म------पानद्बोधकमिति ज्ञानेपि घटमानये
ति वाक्यादिनान्वयबोधाभावात् एवं चान्वयघकारकर्मत्वाद्युप------तया--
त्यदविशेषस्य तदुपस्थापिनां काङ्क्षादेश्च ज्ञानं वाक्यार्थधीहेतुरतो न नैवं मात्रज्ञापकत्व
मा-न ज्ञानादर्थधीः हस्तकरादिसंदेहे कुम्भमानयेत्यादौ विभक्त्यादिज्ञानादेव वाक्या
र्थानुभव इति मैवं नहि तत्र द्वितीयत्वादिमत्पदविशेषत्वेन वाक्यार्थधीहेतुत्वं अननुग
मान किंतु घटः कर्मत्वमित्याद्यन्वयविरोधिपदाजन्योपस्थिति तत्प्रागभावे हा व्याप्ति
वक्तु नस्तु नानापदात्पदार्थोपस्थित्यनंतर वाक्यार्थबोधे तत्त्वैव सामग्री अनुमितिवे

दाघाक्यार्थानुभवेविलक्षणेवसास्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य स्मृत्यर्थानुभावकत्वात् धर्मि
ग्राहकप्रमाणेनतथैवतस्यसिद्धत्वात् नवेश्वरस्यैवाशरीरस्यकर्तृत्वंअत एववर्णपदाविभक्त्यादिवि
शेषघटितत्वेनाज्ञानस्याखंडस्यसखंडस्यवावाक्यार्थानुभावकत्वात्पदार्थस्थानीयस्तस्यवाक्या
र्थः नचवर्णसमूहः पदंपदसमूहोवाक्यमित्यत्रापिननेयहः प्रमाणाप्राबल्यमात्रेण तस्यसिद्धेः अन्य
थाक्लृप्तहेतुं विनानसोनुभावकइत्यादौतदसिद्धावाप्रयसिद्धिः सिद्धौवा [illegible]ः नैनैवसर्वानुपपत्तिं परि
ह्रयतदनुभावकत्वस्यधर्मिग्राहकत्वात्मानासिद्धत्वात् अत एवस्तुतिनिंदाभ्यांकल्पितविधिप्र
तिषेधवेदादर्थमधिगत्यप्रवृत्तिनिवृत्तीअन्यथाविधिनिषेधकोनाममात्रप्रकारकत्वेनविभक्त्या
दिविशेषवत्पदस्यानुमानुमत्राक्यत्वात् नततोर्थधीः स्यात् तथापिवक्तृज्ञानानुमानांतरनुमि
तानुमानादेववाक्यार्थसिद्धे—किंकवाक्यवद्वेदस्यानुवादकत्वंस्यादितिचेन्न धर्मिग्राहकमानेनस्मृत्य ग्रा ६
र्थज्ञापकतयाज्ञानात्मकत्वसामग्रीकत्वेनानुपदमेववाक्यार्थबोधोदयात् अपेक्षणीयांतरा
भावात् अनुमानस्यव्याप्त्यादिज्ञानापेक्षितत्वेनविलंबितत्वात् नचवेदस्यापियोग्यताज्ञा
नापेक्षितयाविलंबः — —रपेक्षबोधकस्यैवधर्मिग्राहकमानसिद्धत्वात् योग्यतादि-
विशिष्टस्यैवानुमानाद्या एवंमंगलाद्यारस्याग्निमीनशिष्टाचारत्वेनकर्तव्यताप्रमानु
मायस्सचकर्तव्यतावेदबोधितालौकिकापिग्नीनशिष्टाचारकर्तव्यतात्वादित्ततद्बो
धकत्वेनानुमितवेदात्तकर्तव्यताधीः ततः प्रवृत्तिः ननूक्ताचारो वेदबोधित
कर्तव्यताकः तादृशाचारत्वादित्यनुमितवेदात्कर्तव्यतासिद्धिः विभक्त्यादिकं विना
नुमितवेदात्कर्तव्यताज्ञानाभावात् — —लमाचरेदित्येकरूपस्यवेदस्यनानुमानंत

न० चि० म० याद्याभावात् तस्मात्तस्य कर्तव्यतामनुमाय तद्बोधकवेदानुमानं प्रथमं कर्तव्यतानुमानेऽपि वेदानुमा श्रा० वि०
२२ नं प्रति नाभावात् न च तत्र एव प्रत्यक्षवेदानुमानं प्रत्यक्षत्वे उच्छेदानुपपत्तेः शाखान्तरवत् यत्तु अ
23 ष्टकाः कर्तव्याः कार्यास्त्वष्टका इत्येवं मेव [illegible] वाक्यमनुमेयमुपस्थितत्वात् एवं च तत्रैवार्थप्रतीति
रूपमन्यान्यवेदानुमानं मन्दोबाधे एकार्थानेकपदोपस्थितौ वानेकवाक्यानुमानमेवेति तन्न आचा
रतो वेदानुमाने मंगलाचारे इत्यादावन्यतरोपस्थितौ नियमाभावात् अनेकवेदकल्पने च स्वानुभव
विरोधः मनुस्मृतिमूलं चानेकवाक्यानामवश्यकमिति कथमाधुनिकोऽप्येकमनुमिनुयात् एवं
च नच स्मृत्यर्थबोधको वेदः स्मृतिसदृश एवानुमेयः नियमतः स्मृतेरूपस्थितत्वादिति
वाच्यं तदर्थस्मृतेरपि तन्नात्र कारकत्वात् तस्य च प्रदेशादावनुच्चारितस्येव वेदत्वे श्रोत्रग्र
हणार्हतया च शब्दत्वं वाक्यत्वमर्थबोधकत्वादित्येवमुक्तं स्मृत्याचारेणानुमितो वेदो
ऽर्थबोधयति सर्वैरेवानुमितो वेदान्तरा न तौ स्मृत्याचारौ विलिनान्धपरम्परावत् तत्र।
प्रमाणमूलकत्वात् शब्दार्थशक्तिग्रहवत् तस्मान्नित्यानुमेयत्वं वेदस्य न तदुच्छेद इति
अत्रोच्यते उच्छिन्नवेदाप्रतीत्य स्मृत्याचारयोरनुपपत्त्या सामग्र्यन्तरकल्पनं अत एव ना
न्यथासिद्धिर्विधो वा स्मृत्याचारानुमितस्य वेदस्यास्माभिरभ्युपगमात् इदानीं च स्मृते ८
रर्थप्रतीत्याचाराच्च कर्तव्यतामनुमाय प्रवृत्तिः न चैवं किं वेदेनेति वाच्यं तुल्यत्वात् अवि
कल्पनं: नाभावाच्च तुल्यत्व याव स्मृत्याचारयोर्वेदकल्पनं तुल्यं तयावत् स्मृत्याचारयोर्वेदजन्यानु
भवमूलकत्वानुमानादेव पत्र धर्मतावलात्प्रत्यक्षवेदमूलत्वासिद्धेः अन्यथा तस्यानुभावक
त्वाभावेन मूलत्वानुपपत्तेः तस्मात्स्मृत्याचारानुमितो वेदः प्रत्यक्षबोधकविषयश्च।

वेदत्वानुमानवत् अन्यथा सामग्र्यंतरकल्पने गौरवप्रसंगः ननु स्तुतिनिंदार्थवादेन कल्पिता
द्विधिनिषेधवाक्यात्कथमर्थमवगम्य प्रवृत्तिनिवृत्ती नहि तत्र क्वापि द्विभक्तिप्रत्ययरूपविधे
र्थाज्ञानस्यानुमानं संभवति व्यभिचारादितिचेत् न स्तुतिनिंदावाक्याभ्यां हि प्रवृत्तिनिवृत्तिपरा
भ्यां प्रवृत्तिनिवृत्तिहेतुरर्थ एव कल्पने लाघवात् ननु विधायकनिषेधवाक्य गौरवात् उक्तदोषा
त्र यत्रार्थवादादेव तदर्थावगमः यरात्रिमुपयन्तु इत्यादौ तत्र न तत्कल्पनापि अध्ययनस्याध्य
यनविषयत्वे शास्त्रांतरवद्धर्मनिर्धारणीः आध्यात्मिकशक्तिसंपन्नैर्ध्रियमाणशास्त्रवा
याउच्छेदासंभव इतिचेत् न एकस्य न सकलशास्त्राध्ययने शक्तिरित्येकेनैवायोरपि तत्त
दध्ययने शास्त्रोच्छेदसंभवात् एकानधीनाया अपराध्ययनविषयत्वानियमो माना
भावात् शास्त्रत्वस्यैव प्रत्यक्षशास्त्रत्वस्य प्रयोजकत्वात् यद्यपि सहस्रशाखावेदवि
दो व्यासोदयः संत्येव तथाप्यध्ययनाभाव एव शास्त्रोच्छेदः ननु शास्त्रोच्छेदे वर्णापद्वा
कहानि शंकया प्रत्यक्षवेदादपि वाक्यार्थप्रयोगयोरतिश्रये वैदिकव्यवहारमात्रं लुप्ये
नेतिचेत् न श्रवणमात्रस्यैव महाजनपरिग्रहीतत्वात् तन्मात्रबोधिनांगेतिकर्तव्य
तयैव शिष्टैरनुष्ठीयमानत्वात् तदर्थानिश्चयाच नच तत्शास्त्रबाधेनेतिकर्तव्यता
शंकयैकस्मिन्नपि कर्मण्यनाश्वासप्रसंगः नानाशास्त्रेतिकर्तव्यानां दुरवगाहत्वात्तस्येति
नाना संभवत्संनिहितत्तत्कर्मणि शास्त्रबोधितसकलेतिकर्तव्यताबोधनायैनमेवका
लेकर्मभाविनमनाश्वासमाशंकमानैर्महद्भिराचार्यैः प्रवर्तिता महाजनपरिग्रहीता
स्मृतय इति नानाश्वास अन्यथा एकस्य सकलशास्त्रानवगमात् शास्त्रांतरबो

त॰चि॰प्र॰ ध्यिनेति कर्त्तव्यता संशये नैकशाखातो नार्थनिश्चयः स्यात् यत्तु विभक्त्यादिमत्तत्तत्पदानां तत्स शा॰वि॰
२४ मुदायानां च प्रत्यक्षत्वं न ह्यपि कश्चिद्भेदः तत्रायं समुदायो वेद इत्यनिश्चय एव नित्यानुमेयार्थः
वेदत्वं वा तत्रानुमेयमिति तन्न प्रत्यक्षवेदातिरिक्तवाक्ये तदभियुक्तानां महाजनानां वे
24 दत्वाभावनिश्चयात् अत एव वेदत्वं तत्र नानुमेयं बाधात् विशिष्यपदानानात्व धर्मवेदतात्र
नकत्वं च वेदत्वं नानुमेयं तज्ज्ञानकत्वं प्रत्यक्षत्वात् नाध्ययविषयत्वं तदभावान्न जाति रननुप
गमादिति स्यादेतत् स्मृत्याचारयोर्वेदमूलत्वे तत्राक्षेपादिविवादः न देवत्वसिद्धं तथाहि
वेदसमानार्था महाजनपरिगृहीता च स्मृतिः स्वार्थोपस्थित्यनन्तरं स्मृत्यर्थानुभावकवे
दानुमाने लिंगं तथा च बाध्यव्याप्यासिद्ध्यर्थमुपजीव्यत्वाच्च स्मृतेरेवाष्टकादिवाक्या
र्थज्ञानमस्तु किं वेदेन तदर्थस्य स्मृतित एव सिद्धेः अष्टकस्य शाब्दिकवेद्यत्वे न स्मृतितो ज्ञान
स्य ज्ञापकत्वेनानुवादकतापत्तिः सा च स्मृत्येतरादित्यनादिरेव स्मृतिधारावश्यकी अन्य
था मनुस्मृतेः पूर्वं न वापि वेदानुमानं न जस्यात् सर्वा च स्मृतिः पूर्वस्मृतिजन्यवाक्यार्थभ्रमाज
न्यत्वेन महाजनपरिगृहीतत्वेन च प्रमाणमिति नाम्य परंपराप्रत्यक्षा च स्मृतिः स्मृतिमूलं
नानुमितानुमितवेदवत्तस्याननुभावकत्वात् वेदार्थस्मृतिनाप्रसिद्धिः प्रत्यक्षवेदमू
लस्मृतिसाहचर्यं रागप्रमान् प्रत्यक्षवेदाबोधितलोभन्यायमूलस्मृतासाधितत्वाद्विका
राणां विगानाभावान्महाजनानां वेदमूलकत्वभ्रमाद्वा भवेन्तीन संभवन्मूलान्तराणां वेदमूलकत्वंक
ल्पयन्ति अपि स्मृतिरिव तद्वेदमूलकत्वं प्रसिद्धि महाजनपरिगृहीता एवं च सा वे
दमूलत्वनिबंधनाभ्रान्ति विगीतमहाजनपरिगृहीत वेदमूलत्वप्रसिद्धित्वात् प्रत्यक्षवेदमूलस्मृतौ मध्य

सिद्धिवत् एवं तिनाद्यसिद्धिरपि अन्यथा महाजनपरिग्रहाना दरे वेदस्मृत्योरपि प्रामाण्यं न स्यादिति
चेत् न बुद्ध हस्तादिस्मृतेस्तत्प्रसिद्धौ व्यभिचारात् कृम्भलोभादित एव तत्संभवात् विचारका
णां विप्रतिपत्तेश्च नन्वत्र तत्प्रसिद्धौ विगीतत्वं महाजनानामिति चेत् अत्रापि मूलान्तरसंभवादि
प्रतिपत्तेश्चाविगीतत्वमेव तेषां अत एव स्मृतीनां न्यायमूलत्वे संभवति वेदमूलत्वप्रसिद्धावपि
न वेदमूलत्वं न च वेदमूलेयमिति कृत्वा स्मृतेर्महाजनानां परिग्रहाद्वेदमूलत्वं वेदमूलेयमि
ति श्रद्धयमंतानमशक्यत्वात् शाक्यत्वे वाकिमनुमानेन न च वेदमूलत्वेन प्रकारेण महाजनप
रिग्रहासिद्धेः मन्वादिस्मृतित्वेन पूर्वमहाजनपरिग्रहेणोत्तरोत्तरेषां परिग्रहादनुष्ठाना
युपपत्तेः एवं होलिकाद्याचारेऽपि वेदलिंगेनैव कर्तव्यताज्ञानोपपत्तेः किं वेदेन तदर्थस्य लिंगा
नीत शिष्टाचारत्वेन भोजनाद्याचारोऽपि वेदमूलः स्यात् वेदेऽपि तत्कर्तव्यताबोधसंभवात् विना
न तदर्थवेद इति इहापि तुल्यं आचारकर्तव्यतानुमानयोरनादित्वेनाचारा कर्तव्यता
नुमानमूलकत्वाद्बोधपरंपरानवच्छेदवानुमानसापेक्ष्यमन्तरानुमानमिति स्वतंत्रप्रमाणा
मूलकत्वाभावाच्चाव्याप्तिपद धर्मज्ञत्वेन सर्वेषां स्वतंत्रप्रमाणत्वात् नापौरुषेया
माराणाधानं सर्वस्य प्रामाण्यमिति नानिरपेक्षात् प्रत्यक्षवेदेऽपि तत्प्राप्त्यापत्तेः एतेनावि
या वादवदमा[illegible]गो निरपेक्षप्रमाणमूलकः अविगीतमहाजनाचारत्वात् प्रत्यक्षवेदमू
लाचारवदित्ति निरस्तं अनुमानस्यानिरपेक्षप्रमाणत्वात् प्रमाणमूलत्वेनैव हेतावुप
पत्तेः निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वाच्च न च सापेक्षत्वेनाप्रमाणताव्याप्तिमत्वा

त.चि.म. त् अन्यथाप्रमाणो नैवपेक्षास्यैवैयर्थ्यात् नचाचारैर्वेदमूलत्वज्ञ सिद्धेस्तदनुमानं अप्रसिद्धेर्व्य श.वि.
२५ भिचारादन्यथोपपत्तेश्च नचवेदमूलत्वेन महाजनपरिग्रहात् तथात्वं हि वेदमूलोयमिति
कृत्वा महाजनानां तत्परिग्रहः वेदमूलत्वस्य अश्रवणमंत्रानुमप्राकोत्वात् शक्यत्वेवा किमनुमाने
न नचवेदमूलत्वे नैव महाजनपरिगृहीतोयमाचार इति ज्ञात्वा नत्वमहाजनपरिग्रहः गौरवाद
सिद्धेश्च पूर्वपूर्वमहाजनपरिग्रहादेवोत्तरेषां परिग्रहानुष्ठानोपपत्तेः तादृशास्मृत्याचा
रयोर्वेद मूलत्वेन व्याप्तेर्वेदसिद्धिरितिचेत् न असम्भवन्मूलान्तरत्वस्योपाधित्वात् अ
न्यथा लोभमूलस्मृतेरपि वेदमूलत्वप्रसंगः अस्तुवा स्मृत्याचारयोरनादित्वं न चाचारात्
स्मृतिः स्मृतेराचार इत्यन्धपरंपरा मूलभूतप्रमाणाभावादिति वाच्यं चारयोरपि प्रमाणान्त्वो
त् अन्यथानन्ततोवेदानुमानमपीति उच्यते प्रलयेपूर्वस्मृत्याचारयोरुच्छेदानसर्गादौ
सर्वज्ञेश्वरप्रणीतवेदमूलत्वं स्मृत्याचारयोः अन्यथा मूलाभावेनान्धपरंपराप्रसंगः
नचमन्वादीनामतीन्द्रियार्थदर्शित्वं तदुपायश्रवणादेस्तदानीमसत्वात् पूर्वपूर्वसर्ग
सिद्ध सर्वज्ञत्वादय एव तद् इतिचेत् न प्रमाणाभावात् स्मृत्याचारयोः प्रमाणमूलत्वमेवत
तेषा त्कल्पमितिचेत् न प्रतिसर्गमन्यान्यकल्पने गौरवमित्येकस्यैव नित्यसर्वज्ञस्य कल्पना
त् नच स्मृतय एव तत्प्रणीतास्तासां मन्वादिकर्तृकत्वेन स्मृतौ बोधनात् स्मृत्वा वेव स्मृ
तीनां वेदमूलत्वस्मरणाच्च एवंच स्मृत्याचारयोर्महाजनपरिग्रहाद्वेदमूलत्वसाध
कमपि भगवतिः प्रमाणं अत एव प्रतिमत्वेत्तरं वैयाघ्रस्मृतिरन्याविधीयते इत्याग
मोपि एवंच पूर्वप्रत्यक्षवेदमूलावेव स्मृत्याचारौ अग्रेकालक्रमेणारोग्यबलश्र

द्विग्रहणाधारणादिशक्तेरग्रहः अपचीयमानत्वात् तदध्ययनविच्छेदेन शाखोच्छेदात् स्मृत्याचारा
भ्यामेव कर्तव्यतामधिगम्य प्रवृत्तिः नन्वेवं स्मृतिरस्तु वेदमूला मंगलाद्याचारस्तु इष्टताचारा
देव भविष्यति घटलिप्यादिसंप्रदायवदिति चेन्न बहुव्यापारघटितस्य तत्तदाचारस्य पुरुषत्वेन
मंगलमाचरेदित्यादिवाक्यस्यैव लाघवेन कल्पनात् न च मंगलादिपदशक्तिग्रहार्थमाचा
र आवश्यक इति वाच्यं स्वर्गादिपदवद्वाक्यार्थेन तदुपपत्तेः अत एव यत्र वचनमात्रात्पर
प्रतिपत्तिः तत्र नाचारः परीक्षकाणां तस्य च वेदत्वं नेश्वरप्रणीतत्वेन शक्तिग्रहणार्थं तद्वच
ने व्यभिचारात् किन्तु तादृशाचारस्य वेदमूलत्वनियमादिति स्यादेतत् प्रलये सत्येव
स्तात् स एव नास्ति प्रमाणाभावादिति चेन्न कालकलापान्यावृत्ति घटप्रागभावः कार्य
द्रव्यानाधाराधारः कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तित्वविशिष्टाभावत्वादाकाशवृ
त्त्यन्योन्याभाववदिति वृत्तप्रलयसाधनात् एवमेव घटध्वंसं पक्षीकृत्यागामिप्रलयसा
धनं यद्वा घटः कार्याधिकरण कार्यद्रव्यानधिकरणवृत्तिध्वंसप्रतियोगी कार्यत्वात्
शब्दवत् कार्यद्रव्यत्वं कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति कार्यमात्र
वृत्तिधर्मत्वात् शब्दत्ववत् यद्वा एककालीनाः सर्वे परमाणवः समग्रोपादेयप्रबंधशून्याः
आरंभकत्वात् नष्टपवनारंभकपरमाणुवत् सर्वत्र पक्षत्वावच्छेदकावच्छिन्नो साध्यप्रतीप
न इति एककाले शून्यतालम्पतेन च पवनपरमाणूनामपि पक्षत्वेनोपादानात् सिद्धसाधनं
पक्षधर्मिताबलभ्यसाध्यप्रतीतेः अभेदानुमानवच्च पक्षस्य दृष्टान्तत्वाविरोधः यद्वा
परमाणवः कार्यद्रव्यानधिकरणवृत्तिकार्यवन्तः नित्यद्रव्यत्वादाकाशवत् भूगोल

न्या·वि·म· कसंतानो भूगोलकसंतानानधिकरणाद्वृत्तिध्वंसप्रतियोगीकार्यत्वात् घटवत् यद्वा एतत्कर्मा शा·वि·
२६ तिरिक्तानि कर्माणि एतत्प्रतिबंधकप्रतिबध्यानि कर्मत्वात् एतत्कर्मवत् न चात्र व्यभिचारशंका स
र्वेषामेवंरूपत्वात् अनेवंभावेस्य भावप्रच्युतात् अन्यथा नियमेपि नियमांतरापेक्षाया अन
26 वस्थितेः आगमोप्यत्र समर्थः संवदतीति कृतं प्रसक्तानुप्रसक्त्या आचारमूलत्वं वेदस्य प्रवर्त
कज्ञानजनकत्वेन भवतीति प्रवर्तकज्ञानं निरूप्यते तत्राभिधासंकल्पाद्यर्थभावनाज्ञानं न
प्रवर्तकं तस्मिन् सत्यप्रवृत्तेः असत्यपि प्रवृत्तेश्च कार्यत्वज्ञानं प्रवर्तकमिति गुरवः तथा
हि ज्ञानस्य कृतौ जन्यायां चिकीर्षातिरिक्तं न कर्तव्यमासीत् तत्सत्त्वे कृतिविलंबो हेत्वंतरा
भावात् चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यां क्रियां विषयमेच्छा पाकं कृत्या सा
धयामीति तदनुभवात् सा च कृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्य
त्वनियमात् अत एव स्वकृतिसाध्ये पाके प्रवर्तते नाप्रवृत्तसाध्यताज्ञानसाध्या स्वकृ
त्यसाध्ये चिकीर्षापितुः स्वकृत्यसाध्यत्वाज्ञानं प्रतिबंधकमिति चेत् न तदभावकारणत्वे गौ
रवात् अन्यथाभावउभयसिद्धः कृतिसाध्यताधीरसिद्धत्वेनोपलालवावसर इति चेत् न
यत्र शाब्दादनुमानाद्वा देवान्वा तत्र लाघवावतारात् इच्छायाः स्वप्रकारकज्ञानसाध्य
त्वनियमेन कृतिसाध्यत्वज्ञानस्यावश्यकत्वात् जनकज्ञानं विघटय्य एव ज्ञानस्य प्रतिबं यत्त
धकत्वाद् व्याप्तिज्ञानविघटनद्वारानुमितिबंधकानैकांतज्ञानवत् अन्यथा स्वकृत्या
साध्यत्वानिष्टसाधनत्वोपेक्षणीयत्वनिष्फलत्वज्ञानं प्रतिबंधकं क्रियाज्ञानमेव प्रव
र्तकं कल्पेन नत्वसनोधात्वर्थगोचरेच्छा वा पितालापवाद्ध कृताविष्टा चिकीर्षासा च

वेष्टाविवेष्टसाधनताज्ञानादितिचेत् न वह्निनासाधयामीतिवत् कृत्यासाधयामीतीच्छायाः कृ
त्यंशमनुभूयमानायाःसन्तताचाच्यत्वेनगौरवेणाप्रत्याख्यानुमशक्यत्वात् किंच पाकंचिकीर्षती
त्यत्रप्राधान्येनपाकस्येच्छाविषयत्वमनुभूयते ननुकृतेः धात्वर्थसम्बन्धत्वयामिधेयेच्छाप्र
कारत्वाचित्यात् ओदनंभुज्यते इत्यत्रभोजनविशेष्यतयाओदनस्येच्छाविषयत्वानुभावात्
इष्टसाधनत्वज्ञानेनइष्टाविवकृताविष्ठायांसंभवेपिकृतीच्छानप्रवर्त्तिका किंतुकृतिसाध्ये
ष्टैका घटंजानातीतिचिकीर्षतिकरोतीतिज्ञानचिकीर्षाप्रवृत्तीनामेकविषयत्वानुभवात्
अथयदिकृत्यासाधयितुमिच्छासातदाचिकीर्षितस्यपाकस्यात्यन्तःसिद्धौसानापगच्छेत् न
ह्युपायविशेषसाधनेनेच्छापायान्तराधीनफललाभे निवर्तते प्रीत्याधनलाभेपिप्रतिग्र
हेणतल्लिप्सायाअनिवृत्तेरितिचेत् न विषयसिद्धत्वस्यफलेच्छाविच्छेदस्यचोपायेच्छाविरो द्ध
धित्वात् अस्तितत्रपाकौदनयोःसिद्धत्वं अन्योदनेच्छायांपाकचिकीर्षाभवत्येव प्रा
प्तुनासिद्धत्वात्कृतावेवेच्छानविच्छिद्यते यदिकृतिविषयसिद्धत्वफलेच्छाविच्छेदोनविरोधि
नौ प्रीत्याधनलाभेपिचतदधिकधनेच्छानविच्छिद्यते तस्यासिद्धत्वात् किंचिद्विशेषसि
द्धेरेवहिसामान्येच्छाविच्छेदः अन्यथासकलस्वविषयासिद्धेरसंभवेनतद्विच्छेदोनस्यादेव
वस्तुतस्तु क्रियाफलाकृतिरिष्टोपायइतिज्ञानंक्रियायाःकृतिसाध्यत्वमिष्टोपायत्वंच
मातं क्रियाद्वारैवकृतेरिष्टसाधनत्वादितितद्बोधात् कृताविष्टकृतिसाध्यत्वेनक्रियायाम
कृति पिमेवेष्टत्वात्चिकीर्षायांसाध्यत्वप्रकारनैयत्य अतःकृतिसमानविषयाचिकीर्षात्वेनचि
कीर्षायाःकृतिकारणत्वं ननुकृतीच्छात्वेनभिन्नविषयतयागौरवम् तथापियेनरूपेणायस्य
^ तत्फलेच्छायाध्वंसत्वात् धनमात्रार्थिनःप्रीत्याधनलाभेपिप्रतिग्रहेणतल्लिप्सानास्त्येवधनमात्रस्यासिद्धत्वात् ^पं. ५

त.चि.म. इष्टसाधनत्वेनेन प्रकारेण तत्रेच्छाया(या) स्वकेदारवच्छिन्नत्वेनेष्टसाधनत्वात् तथैवेच्छा तथा कृतिसा श.वि.
२० ध्यत्वेन पाकस्येष्टसाधनत्वमतः कृतिसाध्यत्वेन तत्रेच्छा भवतीति कृतौ कृतिविषये वा चिकी
र्षायां न इष्टेच्छाविलक्षणसामग्र्यंतरकल्पनमिति चेत् न यदेवं यदि कृतिसाध्यत्वेन पाक
27 स्येष्टसाधनं स्यात् न चैवं गौरवात् किंतु पाकत्वेन स कृतिं विनानेत्यन्यदेतत् वह्निना उ
साधयामीतिवत्कृत्या साधयामीतीच्छाया इष्टसाधनताज्ञानादेवेति चेत् न न हि तत्र वह्नि
साध्यताज्ञानवदत्रापि कृतिसाध्यत्वज्ञाने कारणमावश्यकं कृतौ चानुभवसिद्धं चिकीर्षा
धीनत्वं विशेषस्तेन धारणापचकसंचारे जीवनयोनिकृतिसाध्येन प्रवृत्तिः अन्यथा कृतिसाध्ये
ष्टसाधनतापक्षेपि तत्र प्रवर्त्तेत ननु चिकीर्षाधीनत्वस्योपलक्षणत्वे उपलक्ष्यमाणगतानतिप्र
सक्तधर्माभावात् कृतिमात्रस्य चातिप्रसंगात् न तत्कृतिविशेषा उपलक्ष्यास्तथाप्यननुग
मात् प्रवृत्त्यननुगमः विशेषणत्वे चिकीर्षायाः प्रवृत्तौ च चिकीर्षाज्ञानकारणत्वे गौरवं न
प्रमाणाभावश्च किंच चिकीर्षासाध्यावस्थायाः कृतेः सिद्धावस्यासाधनत्वविरोधेन कृ
तिसाध्यता पाकादौ न ज्ञायेतेति चेत् न अस्ति हि कृतिविशेषो मानसप्रत्यक्षसिद्धः जीव
नयोनियत्नव्यावृत्तश्चिकीर्षोपलक्ष्यः यत्र हि चिकीर्षाकारणत्वग्रहः स च न व जातिरू
पो समत्वनुगतकारणतावच्छेदकरूपः एवं च चिकीर्षाधीनत्वेनानुगते न कृतिविशेषाणामुप
लक्ष्यमाणानामननुगतत्वमपि यथा गोत्वेन तटस्थेनोपलक्षितानां महिष्यादिव्यावृत्तिर्यान
कर्मव्यक्तिविशेषाः धेनुपदेनोच्यंते न तु गोत्वमपि तथा चिकीर्षापि एवं जीवनयोनियत्न
व्यावृत्तकृतिविशेषाणां कृतित्वेन ज्ञानं कारणमिति नाननुगमः ननु कृतिसाध्येष्टकृति

नं विशेषणांशासत्त्वात् सत्त्वे वा कृतौ सत्यां ज्ञानं ज्ञाने च कृतिरित्यन्योन्याश्रयः नोपलक्षणं
मतिप्रसंगादिति चेत् न कृतिर्हि ज्ञाने विषयतया विशेषणमेव साध्ये च परिचायकत्वमो
पलक्षणं अन्यथा इष्टसाधनेपीष्टत्वं न विशेषणांशासत्त्वात् नोपलक्षणमतिप्रसंगात्
लिंगज्ञानादौ का गतिः नन्वेवं श्रमेणादिभोज्ञापिनां तदीयके चिकीर्षा स्यात् तस्या
पि चिकीर्षाधीनकृतिसाध्यत्वात् अत्र श्रमस्तु भोजनादिक्रियासाध्यो न तत्कृतिसाध्यः
अचिकीर्षितत्वात् हेतोः स्वध्वंससाक्षात्कारातिरिक्ते चिकीर्षामात्रे जनकत्वात् नहि मो
नाचिकीर्षाधीनकृत्यागमनं साध्यत इति चेन्न गुरुतरभागे तोलने कृत्या साध्ये श्रमा विषय ४
वृः श्र[illegible] तस्य निगडानिष्फलदेहस्य वा कृतौ सत्यां तोलनचलनक्रियानुत्पादेपि श्रमानुभवा
त् कृतेरेव कारणत्वात् ननु तज्जन्यक्रियायाः सुखे व्यभिचारात् नहि सुखं कृतिकारणं
चिकीर्षाविषयः उपायचिकीर्षाजन्या हि कृतिर्न सुखचिकीर्षाजन्या चिकीर्षाजन्यकृतिसा
ध्यत्वं न श्रमद्वेषयोनियत्नादपि तदुत्पत्तिरित्यपरे तन्न शत्रुवधस्येष्टसाधनत्वेन चिकी
र्षाजन्यकृतिसाध्यत्वाद्द्वेषस्य यत्नाजनकत्वात् द्वेषसिद्धिस्तु शत्रुं द्वेष्मि इत्यनुभवबला
त् यत्तु श्रमः कृतित्वेन कृतिसाध्यो न चिकीर्षाधीनकृतित्वेन यद्यचिकीर्षितेपि श्रमे चिकी
र्षाधीनकृतित्वेन कारणता स्यात्तदा चिकीर्षितमेव भोजनं कृत्या साध्यते नाचिकीर्षितं ग
मनादीति न स्यात् श्रमवत् गमनेपि तज्जन्यत्वप्रसंगात् भोजनादिश्च चिकीर्षाधीन
कृतिविशेषात् नहि कृतिमात्रं व्यभिचरति जीवनयोनिकृतेस्तदनुत्पादात् यदा श्र
मेण भोजनेन कृतिसाध्यः किंतु नैरन्तर्योत्पन्नाज्जीवनयोनियत्नादेवेति तन्न नहि क्व

त॰चि॰म॰ तित्वेनतत्तश्रमजनकत्वं नापिकृत्यंतरादेवश्रमोत्पत्तिः जीवनयोनियत्नेसत्यपिभारोद्वह
२८ नादिकमकुर्वन्नस्तादृशश्रमाननुभवेनतस्यश्रमाजनकत्वात् तस्माद्भोजनादिवत्तश्रम शा॰वि॰
विशेषाणामपिभोजनादिकृतिसाध्यत्वमनन्यगतिकत्वात् रुग्णस्यस्वेदाद्यनुमितः श्र
मस्तत्रन्यायइतिचेत् न स्वेदादेःश्रमान्यहेतुकत्वात् अन्यथाजाग्रेरपित्तदनुवृत्तौश्रमा
नुवृत्तिप्रसंगादिति नैवं स्वेच्छाधीनत्वस्यकृतिविशेषणत्वात् श्रमश्च नियमनोन्येच्छा
धीनकृतिसाध्यः श्रमेदुःखत्वेनेच्छाविरहात् अतएवान्येच्छाजन्यकृतिसाध्यत्वेनश्रमो
नांतरीयकइत्युच्यते स्वाचिकीर्षाधीनत्वंतु नकृतौविशेषणंगौरवात् अन्येतुकृति
गतंधर्मांतरमेवोद्देश्यत्वं तद्विशिष्टकृतिसाध्यश्चन श्रमोऽचिकीर्षितत्वात् किंतुकृति
मात्रसाध्यः अतएवकष्टंकर्मेत्यनुभवोलोकानां एवंचिकीर्षायांममैवंकृतिसाध्य
त्वंप्रयोजकंतदनुकृतिसाध्यत्वेसतीष्टसाधनत्वंसुखत्वंदुःखाभावत्वंचेतिवस्तुद्वयं
इच्छाप्रयोजकं त्वन्मतेसुखत्वंदुःखाभावत्वंचद्वयं दृष्टिसाध्येसुखेहीच्छादृष्टिमपिविषयी
करोति नाविष्टसाधनत्वेनतत्रेच्छासाधनत्वस्येच्छाविरोधित्वात् तवतुत्रयं विषमद्यादौकृति
साध्येपिबलवदनिष्टसाधनत्वेनचिकीर्षानास्तीतिकृतौचिकीर्षाजन्यत्वंविशेषणमितिका
श्चिन्न तत्तुच्छं एवंहिविषभक्षणंकृतिसाध्यमेवनस्यात् जीवनयोनिकृतेस्तस्याउत्पत्तेरि
तिव्यर्थविशेषणं स्यादेतत् इष्टसाधनताभ्रमाद्विषभक्षणेचैत्यवंदनेचाचिकीर्षाधीनकृ
तिसाध्यत्वमस्ति ज्ञानप्रयुक्तत्वात्कार्यत्वस्य तथाचसंज्ञातबोधोपित्तत्कार्यत्वज्ञाना
त्प्रवर्तेत तथात्वशाविभोजनेइति नतुकृतिसाध्यतानुभवोहि तथाचान्यथापीष्टसा

धकतास्मरणेऽविषभक्षणेऽपि प्रवर्त्तेत नचेष्टसाधनताज्ञानं वेदोपानुभावकमस्तीति चेत् न
वस्तुतस्तत्र कृतिसाध्यत्वे सति लिंगान्तरेणाप्तवाक्येन वा तदनुभवसंभवात् लिंगाभासाद्वा भ
मादाऽप्रवृत्तिप्रसंगाच्च भेदाग्रहवादिनस्तव तत्र तदनुभवाभावात् नैवं स्वविशेषणवत्तासं
धानजन्यं कार्यताज्ञानं प्रवर्त्तकं तथाहि काम्ये पुरुषविशेषणं कामना ततः काम्यसाध
नताज्ञाने यागपाकादौ कार्यताज्ञानं नित्ये च कालशौचादिस्वविशेषणं तथा चैतत्संध्यायां
अहं कृतिसाध्यसंध्यावंदनः संध्यासमये शौचादिमत्वात् पूर्वसंध्यायामहमिवेति का
र्यताज्ञानं शौचादिस्वविशेषणज्ञानजन्यं तदुक्तं स कार्यविशेषः पुरुषविशेषेणाव
गतः प्रवृत्तिहेतुरिति संजातवंध्यस्य च विषयभक्षणे चैत्यवंदने च भ्रमदशायामिवतत्र
इष्टसाधनताज्ञानमस्ति येन तज्जन्यकार्यताज्ञानात्प्रवर्त्तेत तत्रस्य च तज्ज्ञो कामनाविरहे
णेष्टसाधनताज्ञानाभावान्न तथा बोधः अन्ये त्वात्मनो जीवित्वप्रतिसंधानजन्यं प्राणे
कृतिसाध्यताज्ञानं संभवतीति जीवनव्यतिरिक्तत्वं स्वविशेषणे विशेषणमिति तन्न
प्राणे स्वेच्छाधीनकृतिसाध्यत्वाभावात् इष्टसाधनतालिंगके कार्यताज्ञाने प्रवर्त्तकमित्य
परे तन्न नित्ये तदभावात् ननु विषभक्षणव्यावृत्तमिष्टसाधनत्वमेव कृतिसाध्यता
ज्ञाने विषयतया विशेषणमस्तु स्वविशेषणवत्ताज्ञानजन्यत्वापेक्षया लाघवात् किं
चोपायविषया चिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् इष्टापायवत् भो
गचिकीर्षायां तदभावात् अप्रयोजकमिष्टसाधनत्वमिति चेत् न तथापि स्वविशे

त.चि.म. स्वाधीजन्यत्वाभावेन तत्र तस्याप्रयोजकत्वात् कृतिहेतुचिकीर्षायां तत्प्रयोजकोन्नचगाचि शा.वि.
२८ कीर्षितया उपायचिकीर्षा न एव कृतिसंभवादिति चेत् तुल्यमिति मैवं साध्यत्वसाध
नत्वविरोधेनैकत्र ज्ञातुमशक्यत्वात् असिद्धावस्थस्य हि साध्यत्वं सिद्धतादशायां तदभा
29 वात् सिद्धतादशायां च साधनत्वम् असिद्धावस्थावतः कार्यानुपपत्तेः तथा च पाकादे
सिद्धत्वः× रसिद्धत्वज्ञाने साध्यत्वसाधनत्वग्रहः नचैकमेकेनैकदा सिद्धमसिद्धं चेति ज्ञायते न च स्व
रूपगतता साध्यत्वसाधनत्वयोरतो न विरोध इति वाच्यम् यदि हि स्वरूपवंधनं तदुभयं तदा स्व
रूपं सदेव सिद्धमसिद्धं चेति स्यात् निरूपितयोः सिद्धत्वासिद्धत्वे त्रतवाप्याज्ञानात् तस्मात्त
मयभेदोपाधिक एव तदुभयसंबंधः पाके इदानीं साध्यत्वमग्रे साधनत्वं ज्ञायत इति चेत्
न इदानीमग्रिमपदार्थयोर्नानात्वादननुगमेन व्याप्त्यग्रहात् शब्देन तथा प्रतिपाद
यितुमशक्यत्वात् गौरवाच्च नच कृतितः सिद्धमिष्टसाधनमिति ज्ञानाच्चिकीर्षा न हि सि
द्धे कश्चिच्चिकीर्षति कृतेः पूर्वं कृतितः सिद्धमिति ज्ञानाभावाच्च नच कृतिसाध्यत्वेन पाकादे
रिष्टसाधनत्वात् साधनत्वमपि साध्यं न हि कृतिसाध्यत्वेन पाकस्योदनसाधनतेत्युक्तं
तस्मात्कृतक्रियमाणाविलक्षणां कृत्यनंतरं भविष्यता रूपं कृतिसाध्यत्वं चिकीर्षाप्रयोजकं
तादृशं चेदं साधनत्वविरोध्येव किंच साधनत्वस्यासिद्धमात्रधर्मत्वात् साधनत्वज्ञानमिच्छा
विरोधि न हि कश्चित्सिद्धमिच्छतीत्युक्तं एतेन इष्टाद्यविष्टसाधनताज्ञानमुपाये इच्छाकार
णत्वेन कॢप्तमिति निरस्तं कथं तर्हि स्वतोऽसंभवदिष्टाद्यदौ इच्छा तत्साध्येष्टज्ञानादिति गृहा

णा अन्येतु सुखदुःखाभावतत्साधनेष्विच्छाप्रयोजकमनुगतमुद्देश्यत्वंप्रकृत्यर्थपदवेदनी
यंधर्मान्तरमस्ति अनुगतकार्यस्यानुगतकारणनियम्यत्वात् तदेवदुःखतत्साधनव्यावृत्तंसु
खतत्साधनादौचिकीर्षाप्रयोजकमिति नचदुःखविरोधित्वमेवतत्प्याप्तीतिवाच्यं सहानवस्था
ननियमस्यविरोधस्यासंभवात् वध्यघातकस्यैकसमयसामानाधिकरण्याभावस्यचयत्नादि
साधारणत्वादिति तन्न तदज्ञानेपिसुखत्वज्ञानादिच्छोत्पत्तेः नहिसुखेज्ञातेधर्मान्तरज्ञानेवि
नानेच्छा तथात्वेस्वतःप्रयोजनत्वहान्यापत्तेः तदेवहिस्वतःप्रयोजनंयदधिगतंसत्स्वत।
त्तितयेष्यते किंचानुगतधर्मकल्पनापिकारणे नचसुखादीच्छाकारणमननुगतत्वात्
किंतत्तदवगमः नहिसुखादिज्ञानेतत्स्वरूपसदेवेच्छाप्रयोजकमस्तीतिचेत् न तथाहुर्दे
ष्टत्वंसुखज्ञानादिहेतूत्पद्यते अन्यतरत्वात् न्यायाचार्यमतान्यायाद्वा तथ्येच्छैवजायतां
कृतिसाध्यत्वंचकृतौसत्यामग्रिमक्षणेस्वरूपंनकृतिंविनाश्येमसाधारणंवैतत् कृतिसा।
ध्यत्वंचनकृतेःपूर्वंनतुकृतौनष्टायांमत्रापिभ्रमं नकार्यः तथाचकथंकार्येप्रवृत्तिकामि
नोच्चयःक्षणिकत्वेनत्रियफलत्वादितिचेत् न यहत्तिकाम्यसाधनत्वं तत्रकार्यताबुद्धेः
प्रयोजकत्वात् ननुकार्यताविशिष्टस्यकाम्यसाधनतेतिव्याप्तिः ननुपाकादौकृति
साध्यतानुज्ञानंनत्वत्यन्तेराहत्यनंतरंपाकेसतिसाध्यताज्ञानंतस्मिन्क्षणेकृतिरित्यन्योन्या
योः ध्यायात् कृतिसाध्यतोत्पत्ती चिकीर्षाकृत्योरसंभवाद्वेतिचेत् न पाकोमत्कृतिसाध्यः
मत्कृतिंविनाऽसत्त्वेसतिमदिष्टसाधनत्वात् दैवाधीनधीनत्वेसतिमदिष्टसाधनत्वाद्वा

त.चि.प्र. मन्नोजनवदित्यनुमानात् स्वकृतिसाध्यताज्ञानं यस्य यदिष्टसाधनं यत्कृतिं विनावदा न सिद्ध
२० ति तत्तदा तत्कृतिसाध्यमिति व्याप्तेः असिद्धस्येष्टसाधनत्वाभावात् बलवदनिष्टाजनकत्वं च प्रा.वि.
लिंगविशेषणं तेन मधुविषसंपृक्तान्नभोजने न व्यभिचारः अतीतपाके कृतिसाधनेऽतीतेऽपि
न च व्यभिचारः सामान्यतस्तस्यापि कृतिसाध्यत्वात् अतीतं दृष्टायां चातीतान्नादने दृष्टावि
रहेणाऽऽदृष्टसाधनत्वाभावात् अत एव निदाघदूनदेहो वर्षति वारिदे नोपदातो फलाभसंभवं ना ता
वी सरोवगाहनेन प्रवर्तते इष्टसंतापशान्तिसाधनस्य तोयसंबंधस्य स्वकृतिं विनापि सिद्धि
प्रतिसंधाने लिंगाभावेन स्वकृतिसाध्यताज्ञानाभावात् यदा च मत्कृतिं विनासनसंभवती
ति प्रतिसंधत्ते तदा प्रवर्तते यस्य संतापशान्तिमात्रमिष्टं न तु सरोवगाहनं तस्येष्टसाधनत्वमेव
न प्रतिसंधत्ते उपस्थितवृष्टितोऽपि तत्संभवादिति कश्चित् तन्न तोयसंबंधत्वेन संताप
शान्तिसाधनत्वं तस्य च सरोवगाहनेऽपि सत्वात् अन्यथा वृष्टिरपि तत्साधनं न स्यात् सरोव
गाहनरूपितात्वसिद्धेः कार्यसाधनत्वं च कृतिसाध्यत्वेन लिंगं पाकादिवद्भोजनादावपि प्रवृत्तेः स्व हे
कृतिसाध्यत्वज्ञाने हेत्वभावात् न चैवं लिंगज्ञानमेव प्रवर्तकमस्तु प्राथमिकत्वात् आवश्य
कत्वाच्च न च लाघवात् कृतिसाध्यत्वज्ञानं तथा कृतिसाध्यत्वानुमितौ तदा मानाभावोऽन्न
युगपदुपस्थित्यसंभवात् प्रवृत्तिसामग्र्यामनुमितिप्रतिबंधाद्वेति चेत् न लिंगज्ञाने कृति
साध्यत्वाप्रकारोत्तत्प्रकारकचिकीर्षायां तस्या हेतुत्वात् अन्यथा लिंगान्तरज्ञानमपि न
प्रवर्तकं न तु पाकादेः कृतः क्रियमाणो वा न पक्तः तस्य कृतिसाध्यत्वे वाधात् नाप्य

नागतः भविष्यत्पाके मानाभावेनाश्रयासिद्धेः पाकत्वं भविष्यत्तिसामान्यत्वा अत्ववदिति

मानमिति चेत् न मानाभावेन गोत्वेपि तस्याप्रसिद्धेः पाकमात्रं पक्ष इति चेत् न मात्रार्थो

वं यदि पाके तदा बाधो लिंगासिद्धिश्च सर्वपाकपरत्वे च तस्यासिद्धभागे बाधः अनागतत्वाश्च भागे

यासिद्धिः वर्त्तमानाय दासीनः पाकः पक्षः पाकसामान्ये च कृतिसाध्यत्वं न बाधितमित्यपि न

सिद्धस्य पक्षत्वं नासिद्धस्येत्यनुमितेः सिद्धविषयत्वे बाधात् भिन्नविषयत्वे चासिद्धवि

षये इष्टसाधनत्वाद्युत्पादकत्वाद्व हृ तत्क्रियमाणसाधारणो कृतिसाध्यत्व ज्ञानादेवासि

द्धविषया चिकीर्षा कृतिश्चोत्पद्यते अनन्यगतिकत्वेन तथा कारणस्वभावकल्पनात्

दिति चेत् नहि यादृशं कृतिसाध्यत्वं चिकीर्षायां प्रकारस्तादृशं ज्ञानेनान्यत्रेत्यन्य प्रकार

कज्ञानादेव चिकीर्षा स्यात् नयाच्यलिंगज्ञानमेव प्रवृत्तिहेतुरस्तु व्याप्यमितत्वात् बहु

मत्रपाके कृतिसाध्यत्वासंसर्गाग्रहात् प्रवृत्तिः स चासंसर्गाग्रहः इष्टसाधनताज्ञाना

दिति तत्र स्मृतपाकस्यासिद्धत्वेन तत्र कार्यत्वासंसर्गग्रहेऽनुमानबाधात् स्मृत

पाकस्यासिद्धत्वं तदानग्रहात इति चेत् नहि स्मृतपाकस्यासिद्धत्वग्रहे ओदनार्थी

पाकार्थी न प्रवर्त्तेत सिद्धोदनोपि पाके त्वद्भोपि भोजने प्रवर्त्तेत तत्र पाकादौ सिद्ध

त्वग्रहात्तदेवासंसर्गग्रह इति चेत् तुल्यं अपि च स्मृतपाके कार्यत्वासंसर्गाग्रहादि

ष्टमानासंसर्गाग्रहाद्विसंवादिनी प्रवृत्तिः स्यात् किं चैवं सिद्धपाकज्ञानादप्यनो

सिद्धेपाके इच्छा प्रवृत्ती स्यातामिति अत्रेदं मतः पाके कृतिसाध्यत्वं सिद्ध्यत्तासिद्धे वा

धात् अनागतं पाकमादाय सिद्ध्यति पक्षतावच्छेदकधर्मसामानाधिकरण्येन साध्यमानस्य इति

गा

त॰चि॰म गेन सिद्धत्वेत्यनुमानेऽकृतत्वात् यथाप्रसिद्धिवह्निबाधेपि वह्निमात्रं न बाधितमित्यप्र शा॰वि॰
३१ सिद्धेपि वह्निः सिद्ध्यति तथाप्रसिद्धपाके कृतिसाध्यत्वबाधेपि पाकमात्रेन बाधितमित्य
31 सिद्धं पाकमादाय सिद्ध्यति अप्रसिद्धयोः पक्षसाध्ययोः सिद्धाववि शेषात् तस्मादप्रसिद्ध
स्य क्वचित् सिद्धे सिद्धस्य च क्वचित् अप्रसिद्धस्य चासिद्धासिद्धिस्तेनानुमानविधा अन्या
प्याहतिसाध्येष्टसाधनता पक्षेपि पाकादौ कृतिसाध्येष्टत्वकयमवगम्यते किंचतवापी
ष्टसाधनताज्ञानात्कथं चेष्टादाविच्छा सिद्धत्वस्येच्छाविरोधित्वादनागतस्य ज्ञानमशक्यत्वात्
अत एव सिद्धासिद्धविषयत्वनिरासेन सुखादिज्ञानात्फलेपि न च्छेति न चेष्टादाविष्टसाधनता
पि न च चेष्टादिसाध्येष्टज्ञानाच्चेष्टादाविच्छा इच्छायाः सिद्धासिद्धचेष्टादितत्फलविषय
त्वविकल्पसात् अपसामान्यलक्षणाप्रत्यासत्या चेष्टादित्वेन सुखादित्वेन चासिद्धासिद्ध
चेष्टादितत्फलविषयकं ज्ञानमुत्पन्नं तेनासिद्धं विरोधियेनत्वप्रकारासिद्धविषये च्छोत्प
द्यते यदि सामान्यलक्षणा नास्ति तदा येन रूपेणेष्टसाधनत्वग्रहस्तेन रूपेणा अज्ञाते सि
द्धे चेच्छोत्पद्यते अन्वयव्यतिरेकाभ्यां तादृशज्ञानस्य तादृशेच्छाजनकत्वावधारणात्
सुखेच्छायामप्येवमिति चेत् तर्हि ममापि पाकत्वावच्छेदेन कृतिसाध्यताज्ञानादता
यते चिकीर्षा तच्च ज्ञानं सकलपाकविषयं सन्निकृष्टविषयं वेत्यन्यदेतत् बालस्य च
स्तन्यपाने प्रवृत्तिर्जीवनादृष्टोद्बोधितजन्मान्तरसंस्कारजन्यात् स्तनपानं कार्यमिति
स्मरणात् नेवापीष्टसाधनतास्मरणात्तत्र प्रवृत्तिः अनन्यगतिकत्वात् न च जन्मान्तरेपि
पर्यनुयोगः जन्माधारपाठ्यनादित्वात् धन्यदानुमानमूलत्वाच्च नोऽन्धपरंपरा कल्पना

लो सुखं
प्रयुक्तकंठतयाबाधं दुःखमनुभवन्विरोधितया स्मरति ततः सुखत्वज्ञानात् सुखवृत्तिका
र्यत्वं सुखवृत्तितयान्तरंगत्वात् ननु स्तनपानमिष्टसाधनमिति स्मरणं सुखावृत्तित्वेन ब
हिरंगत्वात् सुखकार्यत्वं च स्तनपानद्वारा जन्मान्तरानुभूतमिति कार्यत्वस्मरणो स्तनपा
नमपि विषयः स्तेन स्तनपाने कार्यत्वज्ञानादेव प्रवृत्तिः इष्टसाधनताज्ञानस्य तदानीं
सामग्र्यभावात् एवं चाद्यप्रवृत्तौ कार्यत्वज्ञानं प्रयोजकं क्लृप्तमित्यन्येपि तदेव प्रवर्त्त
कं क्लृप्तत्वात् नवीनास्तु ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्त्तकं अनागतविषये प्र
त्यक्षानुमानयोरसंभवात् किंतु यादृशस्य पुरुषस्य कृतिसाध्यं यद्दृष्टं तादृशत्वमा
त्मनः प्रतिसंधाय तत्र प्रवर्त्तते तथा ह्योदनकामस्य स्वसमानसाधनताज्ञानवत्तंडुलादु
पकरणवतः पाककृतिसाध्यो नाऽहमपि तादृश इति ज्ञानात् प्रवर्त्तते पाके एवं चान्यकृतिपा
के कृतिसाध्यत्वज्ञानमात्मनः पाककृतिसाध्यत्वप्रयोजकविशेषवत्त्वज्ञानं च प्रवर्त्तकं
अन्यत्रापि प्रवृत्तिरेवमेवेत्यनादितैव अत एव संजातबाधश्चैत्यवंदने विषभक्षणे च न
प्रवर्त्तते इष्टसाधनताज्ञानवतो हि तत्कृतिसाध्यं न च संजातबाधस्येष्टसाधनताज्ञा
नवान् एवं तृप्तिशालिनो भोजनं कृतिसाध्यं तृप्तस्य न तृप्ती॰ वत्त्वमात्मन्यचैत्रीति न भो ६४
जने प्रवर्त्तते आस्तिकवीनास्तु यादृशेत्यादावविगीतत्वं कृतौ विशेषणमाहुः संजात
बाधकस्तु विषभक्षणचैत्यवंदनं चाविगीतकृतिसाध्यत्वेनैव जानातीति तत्र न प्रवर्त्त
ते प्रवृत्तिविषयत्वप्रसामान्यतः कालासंनिभिन्नः पाकादिर्ज्ञायते प्रवृत्तिमहिम्ना चा
नागतपाकसिद्धिः चिकीर्षा च साभिन्नविषया ननु भावित्वं कृत्यासाधयामीत्याकारे

 ति अत्रोच्यते विषभक्षणादिव्यावर्त्तकं कृतिसाध्यत्वज्ञाने इष्टसाधनत्वविषयतयावच्छे
 दकं न तु स्वविरोधज्ञानावत्ताप्रत्तिसंधानजन्यत्वं गौरवात् न च सिद्धासिद्धावस्थयोः साध्य
 त्वसाधनत्वयोर्विरोधः निर्विरोधितयोस्तयोरविरोधात् पाकोऽसिद्धः साध्यः सिद्धः सा
धनं चेत्यनुभवात् तदा साध्यत्वं हि तदा साधनत्वस्य विरोधि नियमतस्तेनैव तस्य प्रति
क्षेपेणासहानवस्थानियमात् न तु साधनत्वस्यान्यदा साधनत्वस्य वा तयोरप्रतिक्षेपा
त् अन्यदा साधनत्वेपि साधनत्वमस्त्येव सामान्याभावे विरोधाभावप्रसंगात् एवं
तदा सिद्धस्य तदासिद्धत्वं विरोधि नियमतस्तस्यैव प्रतिक्षेपात् न च सिद्धत्वमात्रं अ
न्यदापि तत्र सिद्धत्वाभावप्रसंगात् निर्विरोधितयोर्विरोधे च सिद्धत्वासिद्धत्वयोरप्यान्य
तरदेव पाकादौ स्यात्तदुभयमेदप्युभयं न च तदा कृतिसाध्यत्वे सति तदिष्टसाधनता
ज्ञानं प्रवर्त्तकं अत एव वाजपेयेन यजेतेत्यत्र पागस्य करणावस्थायां सिद्धत्वेन न वाजपेय
स्य साध्यता यकदा तयोर्विरोधादिति कर्मणीमाधेयत्वं न तु करणस्यासिद्धत्वे न साध्य
त्वविरोधः यागस्वरूपेण तयोः सत्त्वात् अपाकसिद्धयोरवच्छेदभेदमादायैकत्र प्रतीतिः
स्यात् न च – कृतिसाध्येष्टसाधनत्वयोः समयभेदमादायापि प्रतीतिरस्तित्यालिंगाभा
वादिति चेत् न साध्यत्वसाधनत्वयोरविरोधस्योक्तत्वात् एवं सिद्धत्वासिद्धत्वयोर्भा
वाभावरूपत्वेपि न विरोधः एकधर्मिगतत्वेन मानासिद्धत्वात् तस्मात्संयोगतदभावयो
रिव येन प्रकारेण ययोर्विरोधस्तेन तयोरेकधर्मिगतत्वं न प्रतीयते न तु रूपान्तरेणापीति
अपि च यदि साध्यत्वसाधनत्वयोर्विरोधस्तदा तवापीष्टसाधनत्वेन कार्यसाधनत्वे

न वा कार्यत्वं नानुमीयेत हेतुसाध्ययोर्विरोधेन सामानाधिकरण्याभावेन व्याप्त्यसिद्धेः
पक्षे साध्यसाधनयोरन्यतरसत्त्वे बाधासिद्ध्योरन्यतरप्रसंगाच्च न च वाच्यमिदानीम
त्कृतिसाध्यत्वं साध्यं अग्रेमदिष्टसाधनत्वं हेतुः दैवाधनधीनत्वे सति यदग्रे मदिष्ट
साधनं तदिदानीं मत्कृतिसाध्यमिति व्याप्तेः तथा च समयभेदमादाय साध्यत्वसाधन
त्वयोरवगमः इति इदानीमग्निमपदार्थयोर्ज्ञानित्वादनुगतरूपाभावेन व्याप्तेरग्र
हणात् पाकन्यायेनान्यत्रापि तद्विरोधात् तत्समयान्तर्भावेन साध्यत्वसाधनत्वयो
रप्रतीतेः प्रतीतौ वा ममापीदानीं कृतिसाध्यत्वे सत्यग्रे इष्टसाधनत्वज्ञाने प्रवर्त
कमस्तु न च पाके साध्येष्टकत्वेन कृतिसाध्यत्वमनुमेयं असिद्धावस्थावत्तो हि
पाकादिष्टानुत्पत्तेः पाकस्यासिद्धत्वमवगम्य तत्साध्यत्वमिष्टस्यावगमे तु व्याप्त्यसिद्धत्वं
वावगम्य कृतिसाध्यत्वमिति सिद्धत्वासिद्धत्वयोर्विरोधो त्रापि दुर्वारः अपि च स्वविशे
षणाधीजन्य कार्यताज्ञानाभावात् सुखे कथं चिकीर्षा न हि कृतिसाध्यताज्ञानमा
त्रात् सा संजात न वाधस्य विषभक्षणादौ चिकीर्षाप्रसंगात् अथोपाय चिकीर्षा
यां तत्कारणं इच्छाकारणात् सुखत्वज्ञाने कृतिसाध्यत्वं यदा विषय स्तदा सुखे [illegible]ची चि
र्षानो वेदिच्छामात्र। [illegible]ति द्वयमेव हेतुरिति चेत् न हीच्छाहेतुज्ञाने यदा कृतिसाध्यत्वं
भासते तदा। चिकीर्षानो वेदिच्छामात्रमित्येव सुखतदुपायचिकीर्षाकारणमस्तु
लाघवात् सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापीच्छाकारणत्वात् अत एव पा
के इष्टसाधनताज्ञाने कृतिसाध्यत्वविषय इति तत्र चिकीर्षानिरुक्ष्यादिज्ञाने ताद्विव

यत्त्वमितीच्छामात्रं सुखचिकीर्षायामिच्छाकारणज्ञाने कृतिसाध्यताविषयके चिकीर्षा
जनकत्वावधारणात् अन्यथा तत्र चिकीर्षानुत्पत्तेः वस्तुतस्तु उपायचिकीर्षा इ
ष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् वृष्टीच्छावत् न च भोगचिकीर्षावत्तेन वि
नापि स्यादित्यप्रयोजकत्वं उपायेच्छाया तदन्वयव्यतिरेकानुविधानात् वृष्टेः स्व
तो सुन्दरत्वेनेच्छानुत्पत्तेः अनुगतोपायेच्छा- नुगतस्य प्रयोजकत्वे संभवति बाध
धकं विना त्यागायोगात् तत्र चिकीर्षात्वये सत्युपायेच्छात्वमिच्छात्वं वा तज्जन्यत्व
प्रयोजकं गौरवात् सुखेच्छायां तदभावाच्च एवं चोपायचिकीर्षायामिष्टसाधनत्वज्ञाने सुखेति प्रसंगवा
५५ रणार्थं कृतिसाध्यत्वप्रकारकत्वनिर्वाहार्थं च कृतिसाध्यत्वमपि विषयतावच्छेदकमस्तु ननु तद्विना यत्नमा
त्रं कृत्प्रकारणं विना कार्यानुपपत्तेः अत एव स्तनपानप्रवृत्तावप्युपायेच्छाकारणत्वेन गृहीतस्ये
ष्टसाधनत्वज्ञानस्यापि कल्पनं दृष्टानुविरोधात् कल्पनायाः (एतेन नवीनमतमपास्तं परस्य हि
कृतिसाध्यत्वौदनकामनावत्त्वेष्टसाधन) ननु साधनतामिच्छाविरोधितस्य सिद्धधर्मत्वात्
वृष्ट्यादौ तत्साध्येष्टज्ञानादिच्छेति चेत् न निर्विशेषितयोः सिद्धत्वासिद्धत्वयोरविरोधेने
च्छासाधनत्वयोरविरोधात् तदा सिद्धत्वं तदासिद्धत्वं वनेच्छासाधनत्वयोः प्रयोजकमिति तथा
यत्नु न ज्ञायत एव तत्साध्येष्टज्ञाना हृष्टादाविच्छेति ननु षं असिद्धावस्थापाद्दृष्टादेरिच्छानुत्पत्ते
स्तस्यावश्यं सिद्धत्वमवगंतव्यं मिच्छानुविरोधित्वाच्चासिद्धत्वमिति तत्रापि विरोध एव वृष्टेः सत्वा
त्विष्टं तया विना नेत्यन्वयव्यतिरेकग्रहस्य वृष्टिसिद्धत्वमादाय वृष्टिनिरूपितेष्टसाध्यत्वं ग्राहक
त्वात् किंच चिकीर्षाजन्यकृतिसाध्यं मण्डलीकरणमित्यर्थप्रतिपादकं मंडलीं कुर्यादिवाक्यं प्रमा दिति

णां स्यात् विषयबाधात् एतेन नवीनमतमपास्तं परस्य हि कृतिसाध्यत्वोदनकामनावत्वेष्टसा
धनत्वज्ञानानां तथात्मन ऊदनकामनावत्वेष्टसाधनताज्ञानस्य ज्ञानं न प्रवृत्तिकारणं. गौरवा
त् किन्तु मत्कृतिसाध्यत्वे सति मदिष्टसाधनताज्ञानमेव लाघवात् यथा चासिद्धत्वसाध्यत्वयो
र्विरोधो ऽनागतस्य पाकादेः कृतिसाध्यताज्ञानं च तथोपपादितमेव किं च परकृतिसाध्य
त्वमज्ञात्वापि स्वकृतिसाध्येष्टसा[illegible]नताज्ञानात् स्वकल्पितलिप्यादौ यौवने कामोद्रेकात्
संभोगादौ प्रवृत्तेश्च तदेव प्रवर्त्तकं वस्तुतस्तु सिद्धविषयककृतिसाध्यताज्ञानात् कथं वा ॥ ५=
कृत्या साध्यायामिच्छासिद्धे इच्छाविरहात् असिद्धस्याज्ञानात् अथासिद्धविषयादेव कृति
साध्यताज्ञानाद् असिद्धविषया कृतिसाध्यत्वेनेच्छा जायते इच्छायाश्चासिद्धविषयस्वभावात्
एकप्रकारकत्वेन ज्ञानचिकीर्षयोः कार्यकारणभावो न त्वेकविषयत्वे सति गौरवात् इच्छा
याश्चानागतविषयत्वात्तस्य चाज्ञानात् तथाकल्पनात् सुखादीच्छायामप्येवमिति चेत्
न असिद्धविषयेच्छानुरोधेनानागतताज्ञानोपायस्य दर्शितत्वात् अस्तु चैवं तथापि कृ
तिसाध्यताज्ञाने इष्टसाधनत्वज्ञानमेव व्यावर्त्तकमस्तु स्वपरकीयेष्टसाधनताज्ञानफला
कामनाज्ञानापेक्षया लघुत्वात् इष्टसाधनताज्ञानज्ञानस्य फलकामनाज्ञानस्य च हेतुत्वे माना
भावात् न चास्तु स्वकृतिसाध्यताज्ञानमेव प्रवर्त्तकं तेन स्वकृत्यसाध्ये इष्टसाधने कारीर्यादौ
कृषीवलस्य न प्रवृत्तिः न च संजातबाधस्य विषभक्षणे प्रवृत्तिप्रसंगः स्वकृतिसाध्यत्वज्ञा
नविषये इष्टत्वस्य स्वरूपसतः प्रवृत्तौ सहकारित्वात् न च संजातबाधस्य विषभक्षणादावि
ष्टापत्तिः इष्टसाधनत्वेनाज्ञानात् अतीतभोजने प्यत एव न वर्त्तते तद्धेतोः सिद्धत्वे च्छाविरहेनं भो

त. चि. म. जन्ये तदुपाधिके इष्टत्वाभावात् अतीतत्वात्तद्विषयेच्छा नास्तीति तत्साधनेपीष्टत्वाभावा(देवन) त् प्रवृत्तिः स्यादेवं या श. वि.
३४ केन प्रवर्त्तेत चेत्स्वरूपसत इष्टत्वाभावादिति वाच्यं इष्टसाधनत्वज्ञानेन तस्यापीष्टत्वात् ह नै
34 वं प्राप्याभिकत्वादिष्टत्वा यमिकत्रयापेदनीयत्वात्स्वकृतिसाध्यत्वे सतीष्टसाधनताज्ञानमेव चिकी
र्षाकारणमस्त्विति चेत् (कार) न इष्टसाधनत्वाभावेपि भोगे चिकीर्षासत्वात् तस्यां स्वकृतिसाध्यत्व
ज्ञाने सतीष्टत्वमेव वसां नात्विष्टसाधनत्वं व्यभिचारात् पाकादौ तदन्वयव्यतिरेकावपीष्टत्वोप
दौ तौ एवं भोगेपि प्रवर्त्तेतेति चेत् न इष्टसाधनतापन्नेपि सुक्तिरूपेष्टसाधने स्वर्गे प्रव
र्त्तेतेति चेत् न इष्टसाधनतापन्नेपि सुक्तिरूपेष्टसाधने स्वर्गे प्रवर्त्तेतेपि तत्तुल्यं स्वर्गे
चिकीर्षा भवत्येव कृतिस्तु न भवति कृतेः सिद्धस्यासिद्धक्रियाविषयत्वनियमादिति
चेत् तुल्यं तस्मात्स्वकृतिसाध्यत्वं विधिरिष्टत्वं स एकमपीति मैवं इष्टसाधनताज्ञान
स्योपायेच्छायां हेतुत्वावधारणात्तस्याः फलेच्छाजन्यत्वनियमात् इच्छायाः स्वविषये धातु
त्पादकत्वनियमात् न तु सिद्धौदनः कृतो न पाके प्रवर्त्तते (उत्तर) तेनात्रस्य सिद्धत्वेनेष्टत्वाभावा पुत्रः
त् अत एवातिभोजनादौ न प्रवर्त्तते अतीतत्वात्तद्विषयाविरहात् ननु साम्राज्यिक
विद्यारख्याते भाविनि यौवनराज्ये भोगसाधने स्वकृतिसाध्यत्वे सतीष्टसाधनत्वज्ञानात्कुतो न प्र
वर्त्तते भाविराज्यस्यासिद्धत्वात् प्रवृत्तेः सिद्धविषयत्वनियमात् राज्योपायाय विवाह्यात्तत्प
रिचये प्रवर्त्तत एव देवताराधनादाविति चेत् न सिद्ध चिकीर्षाविरहेणैव यागादावप्यप्रव
त्तिप्रसंगात् देवताराधनादेरप्यसिद्धत्वेन तत्राप्रसंगाच्च किंच राज्योपायापरिचयेन त्व
मा प्रवर्त्तिष्ट स्वकृतिसाध्येष्टसा(ध)नत्वेन ज्ञाने राज्ये प्रवृत्तिप्रसंगात् किं मायात्तं नहि तु

तिसाध्येष्टसाधनत्वेन ज्ञातेऽपि तदुपायज्ञानं तत्र प्रवर्तकं गौरवादिज्ञानविषयत्वाच्चेति चेत्
नैव यौवने हि तावत्प्रवर्त्तन एव राज्ये बाल्ये तु राज्योपायमकृत्वा मत्कृत्वेदानीं राज्यं न सि
ध्यतीति स्वकृत्यसाध्यत्वाभावादेव न प्रवर्त्तते यथा तण्डुलं विना पाके स्वकृत्यसाध्यताज्ञाना
त् राज्योपाये तु स्वकृतिसाध्येष्टसाधनत्वे ज्ञाने देवताराधनादौ प्रवर्त्तन एवमत्र न एव श्रीयव
घातमकृत्वा मत्कृत्या गुरोडाशास्तेन कृत्वा यागेन मत्कृत्वा अस्य स्वर्गं साधयितुं न शक्यत इति
क्रमशो वधातादौ प्रवर्त्तते बङ्गवत् सिद्धत्वासिद्धि क्रियाविषयत्वाभावत्वात् प्रवृत्तेः यागानन्तरं च ताद्द
वै प्रवर्तते कृत्यनन्तरं वै नैव यागाकृति तत्तत्संभवात् इष्टसाधने चेष्टोत्पत्तिनान्तरीयकदुःखाधिक
दुःखजनकत्वं विशेषणं न तु तत्र तज्ज्ञानाभावः किन्तु तदेव विषयतया कारणतावच्छेदकं ला
घवात् नेनत्र मधुविषसंपृक्तान्नभोजने न प्रवृत्तिः परेषामपि प्रवृत्तिः सर्वलिंगविशेषणत्वेन
व्याप्यावानहानवियोगस्यौकारात् एवं बाल्याद्या समसाध्याधिष्ठोत्पत्तिसंभवेन हाया समसा ति
ध्येन प्रवृत्तिः अत एव बधूनि स्वर्गफलत्वेऽपि बहुवित्तव्ययायाससाध्ये ज्योतिष्टोमादौ फल
भूमा कल्पते अन्यथाऽल्पायाससाध्यादेव स्वर्गसिद्धिसंभवेन तत्र प्रवृत्त्या वनानुष्ठानलब्ध
तानग्रामासम्पत्तद्विधेः स्यात् बलवदनिष्टाननुबन्धित्वे यत् न विशेषणं बहुवित्तव्ययाया
ससाध्ये बहुतरदुःखस्याप्यबलवत्वं क्वचिदल्पदुःखस्यापि बलवत्वामित्यनुगतस्या
भावात् न चेष्टापत्तया निष्टस्याधिकत्वं बलवत्वं तस्याप्युक्तातिप्रसङ्गस्यानुगमात्
अस्ति च श्यनिषिद्धत्वेन ज्ञानेऽपि ग्रहस्सिनिवृत्ती रागद्वेषयोरुत्कटत्वेन नरकसाधनत्वज्ञा
न विरोधात् न तु नकलञ्जं भक्षयेदित्यत्र विध्यर्थविशेषानुपपत्तिः तद्वत्तरास्यत्

त·चि·म· त्रिरूपेष्टसाधनत्वात् नचासुराविद्यावत्पर्युदासलक्षणया विरोध्यनिष्टसाधनत्वनोक्तं श·वि·
३५ नञोऽसमस्तत्वात् क्रियासंगतत्वेन प्रतिषेधवाचकत्वमुत्पत्तेश्चेतिचेन्न विशेष्यवति व
विशिष्टनिषेधस्य सविशेषणे हीति न्यायेन तद्विशेषणनिषेधपर्यवसायित्वात् कलंजभक्ष
35 णामिष्टोत्पत्तिनांतरीयकदुःखातिरिक्तदुःखसाधनमिति न कलंजं भक्षयेदित्यनेन बोधनात्
यत्तु इष्टसाधनतावाचकस्य विधेः सामान्यनिषेधानुपपत्तेः बलवदनिष्टाननुबंधीष्टसाध
नत्वविशेषेण तात्पर्यं तच्चाशक्यविशेषणनिषेधपरत्वं नञ इति कश्चित् तन्न यथानुपयोग्य
तयाच्छिद्रं विहायघटःत्वेन तदितरान्वयोपि तुच्छिद्रेतरत्वेन युगपत् वृत्तिद्वयविरोधात् तथा
प्यपि बलवदनिष्टाननुबंधित्वेन नोपस्थितिरिति कथं तन्निषेधः श्येनेनाभिचरन् यजेतेत्यत्र क
थं विधिप्रवृत्तिः हिंसाया बलवदनिष्टसाधकत्वादिति चेन्न तत्र कृतिसाध्यत्वे सतीष्टसाधन
त्वमेव योग्यतया तथात्वेति तत्र बलवदनिष्टाननुबंधित्वमपि अयोग्यत्वात् निंदार्थवादे
न प्रायश्चित्तोपदेशेन हिंसाया बलवदनिष्टसाधनत्वावगमात् तत्तेन एव विहितेपि श्येनेपि
विनानुमानात्त्विकप्रवृत्तिः रागद्वेषयोरुत्कटत्वेनानिष्टानुबंधांशत्यागेन रक्षकारान्तकस्यापि तत्रप्रव
त्तिरित्येके अन्ये त्वभिचारस्य वैरिवधकत्वेन न तु बाधवधसाधकत्वेन श्येनादिर्धीयते ननु कृत्वा नर
वधे साध्ये नरकसाधकत्वेन नरकस्य फलत्वेनाक्ते नच जनकजनकत्वनियमात् कुंभका स्यजनक
रपितृपरंपरायाः कुंभजनकत्वापत्तेः विधिनैव श्येनस्य बलवदनिष्टाननुबंधित्वबोधना
त् नच श्येनस्य नरकाहेतुत्वपेक्षित्व वैरवधहेतुत्वे चाविगानेन प्रवृत्तिः स्यादिति वाच्यं
श्येनाद्वधो वधाद्वाऽवश्यं नरक इति प्रतिसंधानेन विगानात् ननु श्येनो मरणफलकत्वा

धारत्वेन हिंसासाधनरकजनिकेत्तिचेत् न हिंसावात्पर्यंवरासाधाररराम्ररराफलकव्यापारो हिंसा कूपादौ विनष्टे गवि कर्तृगौव घघ्रसंगा: वध्यस्यापि हन्तृत्वप्रसंगात् त्यादेन द्वाररगात्म हन्तृत्वप्रसंगात् यत्न हातु त्यादि तमन्तुःकश्चित्कमपिव्यापादयति किन्त्वनु निषध्यादिमवरराफलको व्यापारो हिंसा यदनंतरं मरराां भवत्येव नच प्रयत्नेनत्तथा किंतु खड्गहव्वनादिकमेव अथमरराानुकूलो व्यापारो मरराोद्देशेनानु ध्यायमानो हिंसा प्रयत्नश्च न यात्कूपादौ न च मरराोद्देशेनानुध्यीयमानत्वमितिचेत् न एवं सति गौरवात् मरराानुद्देशेन क्षिप्त नाशवाहृत्तब्राह्मराो च हिंसा न स्यात् किंच हि नत्तिधात्वर्थेव छेदकं फलमव्यवहितमेव मरराां अव्यवहितफलकस्य व्यापारस्यैव सर्वत्र धातुवाच्यत्वात् अन्यथा परंपरया विक्लित्तिफलकात्र कामेष्टतंडुलक्रयादावपि पचतीति प्रसंगात् एवं खड्गाघातानन्तरं यत्र विलम्बेन मरराां ब्रराापाकपरंपरागवान्नेविषप्रयोगेनवा तत्र हन्तृत्वं प्रायश्चित्तादिवनस्यादितिचेत् न प्रायश्चित्तकल्पत्वात् हि न च हन्तृत्वव्यपदेशो गौराः विनिगमकं वलाघवमेव वस्तुतस्तुमरराोद्देशेन हन्तो दृष्टाधारक स्वदन्तुकूलो व्यापारो हिंसा प्रयत्नश्चादृष्टद्वारामररा साधन मतो नाहिंसा यदि चादृष्टद्वारापि मरराासाधनाहिंसास्यात् तदा सन्नमीवेलाभ्यंगस्यादृष्टद्वारेष्टभार्याविनाशहेतुत्वाद्भ्यंगकर्तुर्हिंसकत्वापत्तिः अतएव कूपादौ गोमररोविनिगो वधकर्तृत्वं तत्कर्तृःमलल्ग्नात् मरराोनभ्यो क्त नैवापरवे यपितुस्वात्म हन्तृत्वं
ब्रह्महन्तृत्व॰ वा ब्रराापाकपरंपरयाविलं विनाविषप्रयोगेन च हन्तृत्वं मुख्यमेव न त्वनुनिःपादितमररााफलकत्वं गलवं लग्नात् मरराोस्वं हन्तृत्वापत्तेः अन्योद्देशेन चादिक्षिप्तनाना नेन हत्ते ब्राह्मराो वा

दितिहि सैवविषप्रयोग

त·चि·म· हननात् हंतृत्वं न स्यादिति चेत् न इष्टापत्तेः व्यपदेशस्तु गौणः प्रयोगो लक्षणया विसमर्पयि
३६ तुं शक्यते तत्पदे गतिप्रसंगो वारयितुं न शक्यत इति इदमेव विनिगमकं अत एवात उद्देशेन श·वि·
हननेपि निषिद्धे प्रायश्चित्तावृत्तिरुक्ता अपरे तु धनाभिसंहितनरान्तरव्यापारमद्वारीकृत्य मरण
36 साधनं हिंसा खड्गकारस्य नाभिसंहितनरान्तरव्यापारद्वारा मरणसाधनत्वं नस्यहि नरान्त
रव्यापारोऽनभिसंहितः किन्तु धनलाभ इति खड्गकारो न घातकः विषस्यान्ने प्रदत्ते परं नरा
न्तरव्यापारो भोजनमेवाभिसंहितः अनेनेदं भोक्तव्यमित्यभिसंधाय विषप्रयोग इति
तेन गललग्नान्नकवला यत्र मरणं तत्र परिवेषयितुर्घातकत्वापातात् अनेनेदं भोक्त
व्यमित्यभिसंधाय परिवेषणाद्धोकुरालमहत्त्वापत्तेः धनाभिसंहितनरान्तरव्यापार
मद्वारीकृत्य मरणानुकूला च भक्षणाद्यनुष्ठानात् अत एव व्यवहितप्राणवियोगफल
को व्यापारो हिंसा प्राणपाकपरंपरायत्ते हंतृत्वं व्यापारस्याव्यवधायकत्वादिति निर
स्तं स्यादेतत् नेष्टसाधनता विधिः नित्यसंध्योपासनादौ फलाभावात् अथ धना
त्येव तन्नित्यं यत्रार्थवादिकं विधिवाक्ये वा न फलं श्रुतमस्ति संध्यामुपासते ये तु सततं शं
सितव्रताः विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनमिति अर्थवादात् इत्यादहरहः
श्राद्धं पितृभ्यः प्रीतिमावहन् इत्यादिविधिवाक्यश्रवणाच्च हन्ताविंतया नूच्यते
यत्र न फलश्रुतिस्तत्र विश्वजिन्न्यायात् स्वर्गः फलमिति चेत् न कामनोपाधिका
र्यत्वे तद्यागवन्नित्यत्वाभंगप्रसंगात् अहरहः श्रुत्या हि तत्कालजीविमात्रकृति
साध्यं संध्यावंदनमवगतं कामनोपाधिकार्यत्वे च यदा फलकामना नास्ति तदात

न्समयएवकर्त्तव्यतावस्यात् नहितत्कालेफलकामनावश्यंभावः प्रमाणाभावात्
किंचप्रथममवत्तेनरनिरपेक्षाऽहरहःश्रुत्याजीविमात्राधिकारोवगतः तथाच
नतत्तापेक्षचरमप्रवृत्तार्थवादोपनीतफलकामस्यनतत्राधिकारः प्रथमप्रवृत्ताऽहरहःश्रुतिविरोधा
त् नित्यफलश्रुतेरर्थवादस्यचश्रुतौतात्पर्यं अतएवप्रत्यवायपरिहारोपिनफलं तत्कामनो
पाधिकार्यत्वेनित्यताहानेः किंचनित्यकर्त्तव्यताबोधनात् प्राक्नप्रत्यवायप्रमाणमस्ति
विधेःकर्त्तव्यत्वमवगम्याकर्त्तकारणेप्रत्यवायकल्पनं विधिश्चफलाभावेनप्रथमंमूकएव
एवंचप्रत्यवायंमितौविधिप्रवृत्तस्तत्प्रवृत्तौचकर्त्तव्याकरणेप्रत्यवायकल्पनमित्यन्यो
न्याश्रयः अपरेतुनविधेःकर्त्तव्यत्वमवगम्यकर्त्तव्याकरणेनप्रत्यवायकल्पनंयेना
न्योन्याश्रयः किंतुनिंदार्थवादेनप्रायश्चित्तोपदेशेनचोपासनस्यप्रकृत्यर्थस्यता
वद्व्यापाररूपस्याभावःप्रत्यवायहेतुरवगतः तथाचसंध्योपासनंनानाभावःप्रत्य
वायद्वारादुःखसाधनंतदभावःसंध्योपासनंदुःखसाधनाभावत्वेनफलंप्रायश्चि
त्तेपाचप्रसवादितितत्साधनत्वेनहानिर्बोध्यतेविधिना नचैवंप्रत्यवायपरिहार
फलः एवस्यात्तिविवाच्यं परिहारस्यप्रागभावरूपत्वेनादित्यप्रसाध्यत्वात् नचोपासना
करणंप्रत्यवायहेतुःनोपासनाभावःतथाचदुःखसाधनाभावत्वेनहानिरिष्टा
नतूपासनामितिवाच्यं निंदार्थवादस्योभयत्रापितुल्यत्वादिति तन्न एवमपिका
म्यत्वेनित्यताहानिप्रसंगात् किंचाकुर्वन्विहितंकर्मेत्यादिना नोपास्तेयस्तुपाश्चि
मामित्यादिनाचकरणाभावस्यैवहेतुत्वंबोध्यते नतत्राविषयाभावस्य अन्यथा

सत्वेपिउभयत्र पं० ३

कर्त्तुः प्रत्यवायो नान्यस्येति कथं स्यात् विषयाभावस्य साधारणत्वात् वस्तुतस्तु कृतिसाध्यत्वे
सतीष्टसाधनताज्ञानं प्रवर्त्तकत्वेन निर्व्यूढं न च कृतौ कृतिसाध्यत्वमस्ति अतो न किंचिदेतत्
नवीनास्तु नित्याकरणे प्रागभावो दुरितद्वारा दुःखसाधनं तदभावोऽकरणे दुःखसाधनाभा
वत्वेनेष्टस्तत्साधनत्वेन कृतिसाध्यत्वे न च संध्योपासनं विधीयते इति तन्न निंदार्थवादा
दिना संध्योपासनाभावस्तदकरणं वा प्रत्यवायहेतुरवगतो न त्वपूर्वाभावः अपूर्वस्य प्रमा
णाभावेन तदनुपस्थितेः विधेरिष्टसाधनत्वबोधकत्वात् परिशेषेणापूर्वमिष्टं कल्प्यते
इति चेत् तर्हि विश्वजिन्न्यायेन स्वर्ग एव फलं कल्प्यतां काम्यत्वस्य त्वयापि स्वीकारात् वि
धिविधिप्रवृत्तौ वा पूर्वज्ञानं अपूर्वज्ञाने विधिप्रवृत्तिरित्यन्योन्याश्रयः यावन्नित्यनैमि
त्तिकनिर्वाहस्य तत्तदाश्रमविहितकर्मणां सम्यक् परिपालनस्य च ब्रह्मलोकावाप्तिः फ
लं श्रूयते तथा च नित्यस्य फलवत्त्वमिति केचित् तन्न तस्याविधेर्नित्यविधिमुपजीव्य
प्रवृत्तेः तस्य च फलाभावेनाप्रयोजकत्वात् अन्यथा परस्परापेक्षितत्वेनान्योन्याश्रयः
तस्मात् कार्यं नैव विधिः ननु नित्ये वेदात् कार्यताज्ञानेऽपि स्वज्ञानं प्रयोजनं ज्ञानं वि
ना कथं प्रवृत्तिः न हि प्रयोजनमनुद्दिश्य मंदोऽपि प्रवर्त्तते इति चेत् न नित्ये फलबाधे
न प्रवृत्तिमात्रे प्रयोजनज्ञानस्याप्रयोजकत्वात् काम्येऽपि प्रयोजनज्ञानं न साक्षात् प्रवर्त्त
कं गुणाद्याविषयत्वात् उपांशुप्रयोजनेऽप्रवृत्तेश्च किं त्विष्टसाधनताज्ञानद्वारा कार्यता
ज्ञानोपक्षीणमेव कथमन्यथा निराधिः नित्ये इष्टसाधनताज्ञानाभावात् कार्यता
ज्ञानस्य वेदादपि संभवात् नन्वनिःफले दुःखैकफले वा कथं प्रेक्षावतां प्रवृत्तिः वेदाधी

नकार्यताज्ञानसत्वात् सफलप्रवृत्तावपितस्यैवतंत्रत्वात् यत्तुलौकिकेदुःखैकफले
नप्रवर्त्तते तदिष्टसाधनताज्ञानलिंगकस्यकार्यताज्ञानस्यवेदाधीनस्यवाऽभावात् नचदुः
खैकफलत्वज्ञानंप्रवृत्तिवंधकं सतिकार्यताज्ञानेतस्यप्रवृत्तिवंधकत्वात् अथवालिङोऽप्र दर्शना
वाचकत्वान्नित्येपिलिङोपासनादिविषयकमपूर्वं बोध्यते नचानिष्फलमपिसुख
वत्स्वतएवप्रयोजनंनित्यमभ्यर्थ्यमानंचेति उच्यते सर्वत्रनित्येफलश्रवणाज्जी
विफलकामस्यसर्वत्रैवाधिकारः यथोपरागेनैमित्तिकंस्नानश्राद्धादिफलश्रुतेः काम्यं
अकरणेप्रायश्चित्तादिश्रुतेर्वानियतकर्तव्यताकं यथावाषोडशश्राद्धेप्रेतत्वविमुक्तिका
मनाश्रुतेः प्रेतत्वविमुक्तिहेतुषोडशश्राद्धेसंकल्पंविधायमहाजनानामाचारात्काम्य
त्वं निंद्यार्थवादेनाकरणेप्रत्यवायश्रुतेरवश्यकर्तव्यत्वं तथाचसंध्योपासनमपिफल
श्रुतेःकाम्यं अकरणेनरकश्रुतेःप्रायश्चित्तोपदेशाच्चनियतकर्तव्यताकं यत्तुयागेका
म्येपिप्रनियतकर्तव्यताकत्वं तदकरणेप्रायश्चित्तानुपदेशात् नचानित्येफलकाम
नायासंभवः त्रिकालकाम्यतत्वपाठवन्नित्येफलेकामनासंभवात् यत्तुप्रथमप्र
वृत्ताहरहःश्रुत्यातत्कालजीविमात्रस्याधिकारबोधनात्फलकामस्याधिकारइतित
न्न अहरहःश्रुत्यर्थवादयोःप्रथमंग्रहीतैकवाक्यतावलेनतत्का जीविफलकामस्य ल=
लि घा सर्वाधिकारात् अर्थवादोपस्थितफलान्वयंविनैकवाक्यताभंगप्रसंगात् नचार्थवादस्य
स्तुतिपरत्वान्नैकवाक्यता बाधकंविनास्वार्थापरित्यागात् विधिवाक्योपस्थितेफल
विधिवाक्यस्यफलमादायैवाहरहःश्रुत्याकार्यताबोधात् नन्वेवंतत्कालजीविफलका

मित्रोरधिकारे यदा फलकामनाविरहः तदाऽशुचेरिवाधिकाराभावात् नियतकर्तव्यता न
स्यात् अधिकृताकरणे प्रत्यवायो न त्वकरणमात्रम् इति चेत् न नैमित्तिकेपि तत्कालिकस्य
वित्तकामनाविरहिणोऽनियमतः कर्तव्यतापत्तेः अपवादाभावे नौत्सर्गिकी फलकाम
नास्त्येव फलज्ञानस्य स्वविषये इच्छाजनकस्वभावत्वात् यस्य तु दृष्टबाधापवादेन फलां
तरे कामना नास्ति तस्याकरणेपि न प्रत्यवाय इति न तोषिय तत्कर्तव्यता [illegible] नैमित्तिके
तथा नित्येपि [illegible] फलकामनाबाधेनाकरणेपि न प्रत्यवाय इति तुल्यं किं चा
र्थवादोपस्थितफलोपाधिकर्तव्यत्वेऽवगते [illegible] विहितकर्मेत्यादिवाक्याद् द्वेषोद्वेसति
संध्यावंदनाकरणे निंदार्थवादेन नरकश्रुतेः प्रायश्चित्तोपदेशाच्च प्रत्यवायकल्पने तत्फ
लकामनाविरहेपि प्रत्यवायपरिहारार्थं नियमतः प्रवर्तते विधिप्रवृत्त्यनंतरं प्रत्यवा
यस्य प्रामाणिकत्वात् अकरणे न [illegible] करणे न प्रत्यवायप्रागभावस्य साध्यत्वा
त् नैमित्तिके फलोपाधिकर्तव्यत्वेन कामनाविरहेपि नियतकर्तव्यतावत् । यत्तु
निःफलेपि नित्ये वेदाधीनकर्तव्यताज्ञानात् प्रवर्तते इति तन्न [illegible] एकफलत्वेन ज्ञा
यमाने ध्रुवावतीत्वेऽरक्तत्वादनियमात् अयोग्यतया नित्यश्रुतिमात्रस्य बोध
यितुमशक्यत्वात् अत एव संध्योपासनमफलमापि [illegible] वेदबोधितकर्तव्यताकत्व
न्न इत्याशंक्य [illegible] ग्रामितामित्याभिप्रायेणोप [illegible] तवानाचार्यः यत्तु प
[illegible] नित्यत्वहान्यापत्तेः किंच
[illegible] प्रयोजनं तत्साधनं च गोपां नित्याहवं चैतेनैकमपि पंडत्वा

त्वकाम्यादृष्टं च सुखहेतुगौरवां प्रयोजनं प्रवर्तकविध्यनुरोधेन तदपि प्रवर्तकं कल्प्यत इति चेत्
न प्रवर्त्तनीयेन लौकिकेन तस्य प्रयोजनत्वेनाज्ञानात् गुरुणामनित्यादृष्टं प्रयोजनमुक्तमपि
त्युच्यमानेऽपि नादरः प्रेक्षावतां उक्तिस्वर्गो लौकिकावपि सुखदुःखाभावज्ञानीयतया प्र
योजने तस्मादेवं वदतां गुरुणामपि लघुरेव तदयं संक्षेपो नित्ये दुःखैकफलत्वेन प्रवृत्त्यनुपपत्तेः
फलोपाधिकर्तव्यता वाच्या तच्च फलं दुःखसाधनाभावः पुंडादृष्टं चेति तदिच्छाना प्र
वृत्त्यर्थं प्रत्यहमुपेयात्ताविना प्रवृत्त्यनुपपत्तेः तथा चार्थवादिकं विधिवाक्यस्थत्वं
वा फलमस्तु कृतमन्येन न च कामनाविरहे नियतकर्तव्यता न स्यात् ग्रहणवदीक्षावि
रहेऽपि तुल्यत्वात्। प्रत्यवायपरिहारार्थं नियमतः प्रवृत्तिस्तुल्यैव यत्र वनफलश्रुतिः
तत्र विश्वजिन्न्याय इति नन्विदमिष्टसाधनमिति ज्ञानादेतत्साध्यमिष्टमिति ज्ञानाच्च प्र
वृत्तिदर्शनात् प्रथमस्यैव प्रवर्तकत्वे किं विनिगमकं उच्यते फलेच्छया स्वविषयविशेष्य
कज्ञानस्य हेतुत्वेन क्लृप्तत्वात् उपायचिकीर्षां प्रति बाधकं विना तथा वस्तुतस्तु कृतिसा
ध्ययागस्य साध्यमिष्टम् इति ज्ञानस्य प्रवर्तकत्वे यजेतेति पदात् प्रथमं कृतिसाध्यो या
ग इति ज्ञानं ततः कृतिसाध्ययागस्य साध्यमिष्टमिति ज्ञानं विशेषणज्ञानसाध्य
त्वाद्विशिष्टज्ञानस्येति ज्ञानद्वयं न च मम यागः कृतिसाध्य इष्टसाधनमित्येकमेव ज्ञा
नं न च कृतिसाध्यत्वं यागे बोधयित्वा कृतिसाध्ययागस्य साध्यमिष्टमिति लिङो बोधयि
तुं शक्यमपि एकं स्वार्थान्वयं पदार्थं बोधयित्वा तदन्वितापरस्वार्थान्वयबोधक
त्वस्य पदेऽव्युत्पत्तेः यजेतेति पदे च कृत्या सह यागान्वयं बोधयित्वा पर्यवसितत्वेन:

त॰चि॰मू॰ स्वार्थान्वयबोधकत्वेऽव्याप्तिप्रसंगः अथ साध्यमिष्टं यस्य तत्साध्ये स्वकत्वं शाक्यं तथा च व शा॰वि॰
२९ कुर्वीतेत्यपि विधिप्रत्ययात् इष्टस्य साधनमिति प्रत्ययस्यापि स्वलघुत्वात् तदेव शाक्यं किंच तत्साध्यत्वा
अ नावियमत्वं तदुत्तरसत्वं दंडसाध्ये घटेऽव्यभिचारात् नापि तदवधित्वे तत्क्षणोत्तरत्वेन ए
य वसमं एवकारव्यवच्छेद्यं तदुत्तरसमयस्याकाशेऽसिद्धेः शब्दस्य तदसाध्यत्वापत्तेः
अत एव न तदभावव्यापकाभावमिति योगित्वं रूपे रससाध्यकत्वापत्तेश्च नापि तदवधि
कोत्तरत्वव्याप्यसमयसंबंधः उत्तरत्वव्याप्यं [illegible]तरत्वानाधिकरणकालावृत्तित्वं तच्चा
काशेऽप्रसिद्धं गुरुतरं च तस्मात् तत्तत्साधनकत्वमेव तत्साध्यत्वं एवं च लाघवा
त्तत्साधनत्वज्ञानमेव प्रवर्त्तकं न तु तत्तत्साध्यकत्वज्ञानमिति स्यादेतत् इष्टत्वा
ज्ञानस्य प्रवर्त्तकत्वे तृप्तोऽपि भोजने प्रवर्त्तेत मनसा तदिष्टत्वज्ञानात् अप्यस्यरूप
त्वफले इच्छाकारणं सावसिद्धतया तृप्तो नास्तीति चेत् हतैवमावश्यकत्वात् फलेच्छा
कारणं न तु तत्ज्ञानं गौरवात् किंच इष्टाज्ञानस्य कारणत्वे इच्छाकारणं न स्यात् स्वज्ञानेन
तन्नाशात् इच्छानन्तरज्ञानधाराकल्पनेनवस्था अपि च इच्छाविषयः सुखमिति ज्ञानं न मान
संकल्पस्यासिद्धतया तद्विशेष्यकसाक्षात्कारस्य सन्निकर्षं विनाऽभावात् ओदनादावपी
ष्टसाधनत्वज्ञानं न संभवति मनसो बहिरस्वातंत्र्यात् नापि चक्षुरादिना ज्ञानः कुतश्चिद्यदि
ष्टत्वज्ञानं तत्राविशेष्यसन्निकर्षात् वस्तुतस्तु विषस्याविशेष्यसुखत्वादिनाऽज्ञाने यागपा
कादेरिष्टसाधनताज्ञानेऽप्यप्रवृत्तिप्रसंगः इष्टस्याल्पाधिकभावेन नानाप्रकारत्वेन चाविशि
ष्यानध्यवसायात् न वेष्टविषयतावच्छेदकसुखत्वादेरुपलक्षणमिष्टत्वं सुखदुःखाभावे

तत्साधनेष्वनुगतस्योपलक्षणस्याभावेनाननुगमादिति उच्यते यत्रेष्टतत्साधनत्वज्ञा
नमेव लोकवेदसाधारणं प्रवर्त्तकं तेषां सुखदुःखाभावतत्साधनत्वेनेष्टविषयाणा
मननुगतानामपि तद्विषयत्वमेवानुगतं एवं यदा सुखादाविष्टा भवति तदा कृतिसा
ध्यत्वे सति सुखादिसाधनमिति ज्ञानं तदा पाकादौ प्रवर्त्तते नन्वेवं प्रवर्त्तकज्ञानविषय
स्य नानात्वेन तच्छब्दस्याविधिप्रत्ययस्य नानार्थत्वप्रसंग इति चेन्न न सुखत्वादिनाऽ
ननुगतमिष्टत्वेनानुगतं फलं प्रति साधनत्वस्य यागादेर्लिंगादिना बोधनात् तथा च
फलानामननुगमाद्यं फलेष्टाशंक्या नन्विष्टज्ञानकारणत्वेन तत्र येवं साधनत्वज्ञा सुखादि
नं प्रवर्त्तकं तत्र शक्यांश ननुगमात् यत्र शक्यमिष्टसाधनत्वं तत्र ज्ञानं न प्रवर्त्तकमि
ति विधेः प्रवर्त्तकज्ञानं स्यादिति चेन्न साक्षादेवमेव किंचिदिष्टसाधनं याग इति लिङा बो
धिते इष्टाकांक्षायां काम्यत्वेन प्रकृतः स्वर्ग इति स एवेष्टत्वेनावगम्यते तथा च स्वर्ग
कामसमभिव्याहारात् स्वर्गसाधनं याग इति ज्ञानं प्रवर्त्तकमुत्पद्यते एवं च विधि
जन्यज्ञानजन्यज्ञानं प्रवर्त्तकं यत्तु सर्वेषामेव विधेर्न साक्षात्प्रवर्त्तकत्वं बाधात् स्वकृ
तिसाध्यतादेरनवगमात् किंत्विष्टसाधनत्वं वा हमिष्टसाधनं यागः स्वर्गकामत्वात् दर्श
वाक्यावगतस्वर्गकामवदित्यनन्तरमर्थापत्त्यानीयते तन्न यत्रेष्टतत्साधनमिति ज्ञा
२ बद्ज्ञानादेव प्रवृत्त्युपपत्तेस्तत्कल्पनेति निष्फला अन्यथा साधनत्वमात्रविधेयत्वे यः स्व
र्गसाधनतालाभस्तत्समभिव्याहारात् इष्टसाधनतापत्तौपि तस्योपजीव्यत्वात्
तथा हि यजेतेत्यनेन यागः कृतिसाध्यः साधनं चेति बोधिते साधनस्य साध्याकांक्षा

त.चि.म. यां कामना विषयतया कृतो ऽगतिकः स्वर्ग एव साधनाकांक्षी साध्यत्वेनावगम्यते उपस्थित शा.वि.
४० त्वात् न च यागस्य साधनाकांक्षा कृतिसाध्यत्वेनैवोपस्थितेः अत एव विश्वजिदादौ स्वर्ग
५८ एव साध्यत्वेन कल्प्यत इति इष्टसाधनता विधिरिति मतं तु तरति ब्रह्महत्यां योऽश्वमेधे पदे
स्या= न यजत इत्याद्यर्थवादे विधिबोध्येष्टसाधनत्व र्थवादादेवावगमात् उक्तो विधिकल्प
नमिति चेत् न अविनाभावात् तथाभूतसाधनत्वस्य विधेयत्वव्याप्तत्वात् व्यापका
नुपलम्भबाधोद्धारायवा प्रयोजनाभावान्न तत्कल्पनं नन्वेवमप्याहुः यदि साधनत्वा इष्ट=
भिधाने करणो लिङो ऽनुशासनादर्थवादैर्यामासाभ्यामित्यनभिहितनाधिकार वि ता हि
कृतीयानस्यादिति तन्न उपायत्वमात्राभिधानेपि तद्विशेषकरणत्वाभिधानात्
वस्तुतस्तु अनभिहितान्वयलभ्यं यागेष्टसाधनत्वं इष्टसाधनत्वमात्रस्य लिङर्थत्वात्
नन्वास्तां चिकीर्षाद्वारा ज्ञानस्य कृतिहेतुता चिकीर्षा च कृत्याविच्छा स नः प्रवृत्त्यर्थ
गोचरेच्छा वा विलातयिपत्त्यादिवत् तत्कृतिविषयपाकादिविषयकृतिसाध्यत्वप्र
कारिकेच्छा वाच्येत्वं पाकादेः प्रवृत्त्यनभिधेयत्वात् नहि कृतिवाचकस्य तद्विषयवा
चकत्वं करोतीत्युक्ते तद्विषयसंप्रत्ययात् एवं च कृत्याविच्छेष्टसाधनताज्ञानात् ता॰
ता सा ध्येष्टज्ञानाद्वा वृक्षादौ तथाकल्पनात् यदा च कृताविच्छा तदास्यैव चिकीर्षा अन्य
त्रेच्छामात्रं न तत्कृतिसाध्यताज्ञानात् कृतौ कृतिसाध्यत्वाभावात् अप्ययां कृत्या साध
यामीतीच्छानुभवासिद्धा अनुभवापलापे उपेक्षणीयतापत्तेः सा च कृतिसाध्यताज्ञानात्
सा च चिकीर्षापदाप्रवृत्तिपाद्यापिकृतिहेतुः समानविषयत्वात् न तत्कृतीच्छा कृतिहेतुः

कृतिर्विषयाविषयत्वादिति चेत् आलितावत्पाककृत्ताविच्छा वृष्टीच्छावत् आस्तिचकृ
तिसाध्यत्वप्रकारिकेच्छा पाके तथापि कृतौ छेवकृतिकारणं लाघवात् न कृतिसाध्यत्व
प्रकारिकेच्छा गौरवात् धात्वर्थान्तर्गतकृतिस्वरूपेच्छैव नोदेनीति चेन्न न पाकादिकृ
तीष्टसाधनताज्ञानात् पाककृत्ताविच्छा ततः कृतिरित्यभ्युपगमात् न चावगतिप्रवृत्त्योः
समानविषयत्वमुभयसिद्धं तस्यैव विचार्यत्वात् कथं तर्हि पाकं कृत्या साधयामीतीच्छा
यथा वह्निसाध्यत्वेनेष्टसाधनत्वावगमाद् वह्निना पाकं साधयामीतीच्छा तथा कृतिसाध्य
त्वेनेष्टसाधनत्वात् पाकस्य पाकं कृत्या साधयामीतीच्छा अन्यथा तत्तदुपायसाध्यत्वेनेष्ट
पाकादौ तत्तदुपायसाध्यत्वप्रकारकज्ञानात् सा स्यादित्यनेककारणकल्पना स्यात् मन
तूपायेच्छायामिष्टसाध्यत्वज्ञानमेव हेतुः क्रियाद्वारा कृतेरिष्टसाधनत्वज्ञाने क्रियाया
अपीष्टसाधनत्वं विषय इति कृतीच्छा भवन्तीति क्रियाविषयापि भवन्तीति ज्ञानेच्छाप्रवृत्ती
नां समानविषयतापि अत एव पाकं चिकीर्षतीति चिकीर्षाविषयतया पाकः प्रतीयते
यद्वा रथ्याविषयाविषयतया पाकः प्रतीयत इति कर्मता ग्रामं जिगमिषति शत्रुं संजिघांस
तीत्यत्र ग्रामादेरिव नहि ग्रामादाविच्छासिद्धत्वात् अत एव भोगेदुखेवा चिकीर्षा तद
नुकूलकृतेरिष्टहेतुत्वात् अन्यथा कृतिसाध्येष्टसाधनतापन्नेन चिकीर्षायां सामग्र्यन्त
रं कल्प्येत एवं च संध्यावंदनं दुःखसाधनावंदनाभावरूपत्वेनेष्टं तत्साधनं कृतिरिति
लिङर्थः अन्यथा कृतिर्न कृतिसाध्या संध्यावंदने नेष्टसाधनमिति कस्य कृतिसाध्यत्वे
सतीष्टसाधनत्वं विध्यर्थः स्यात् अत एव एकप्रत्ययाभिधेयत्वप्रत्यासत्त्यंतरंगतया

विधिप्रत्ययाभिधेयेष्टसाधनत्वस्यकृतावेनान्वयोनप्रकृत्यर्थोतथैवचिकीर्षाकारणं ज्ञानजन
नकत्वात् प्रकृत्यर्थस्यकृतौविषयत्वेनान्वय इति उच्यते वह्निसाध्यत्वेनकृतिसाध्यत्वेन
वान्पाकस्योदनसाधनतेत्युक्तं कथंतर्हि वह्निनाकृत्यावापाकं साधयामीतीच्छेति चेत्
इष्टसाधनत्वेनज्ञातेयत्रयत्नसाध्यत्वंज्ञायतेतत्रतत्साध्यत्वेनेच्छाभवति यथेष्टसाध
नत्वेनज्ञातेपाकेवह्निसाध्यत्वज्ञानात् वह्निनासाधयामीतीच्छा एवंकृतिसाध्यत्वेनाव
गम्यतेइष्टसाधनताज्ञानात् कृत्यासाधयामीतीच्छातथाचेष्टसाधनत्वेकृतिसाध्य
त्वेचज्ञातेकृतिसाध्यत्वप्रकारिकेच्छानत्विष्टसाधनताज्ञानमात्रादिति आचार्यस्तु
प्रवर्तकमिष्टसाधनताज्ञानमेवलिङर्थत्वाप्राभिप्राय इतिलाघवात् पाकंकुर्याः पा
कंकुर्या इत्य — त्रपि ------ ध्यत्त --- वक्रिये ------ नाज्ञा ------ स
तादिलिङोवक्त्रादीच्छाभिधायकत्वे ------ स्याच्छावाचकत्वाकल्पना -------
--- त्वस्यस्वर्गकामस्यकृतिसाध्यतया ---- लोकात्प्राप्तेष्ठ इत्यर्थः ततो -
-------- तसाध्यतयायद्व्यापारविषयः प्रयत्नोवाय ---- ष्यतेसतस्यवलवद -----
----- साधनमितिव्याप्तिग्रहात् यागस्येष्टसाधनत्वमत्र ----- तथाहि यागोम -
----- न --------- तयाज्ञेनेष्यमाणत्वात् यथ्यामसि ------- विषयतयेष्यमाणं ष
----- मदिष्ट ----- तथाचेदंतस्मात्तथा एवं - के - जंभद्र --- त्यस्य --- फलं
जभद्रतोप्रयत्नोनाज्ञेन मत्प्रयत्नाविषयतयाऽनिष्यमाणत्वात् यथामासि त्रामत्प्रयत्नवि
षयतयाऽनिष्यमाणंमधुविषसंपृक्तान्नभोजनंममवलवदनिष्टसाधनंतथाचेदंतस्मात्तथा तवा

४ त्वाविषयप्रत्ययः ततः कलंजभक्षणंममवलवदनिष्टसाधनंमदिष्टसाधनत्वेसत्याज्ञे ४ पं॰२

श्री॰वि

क्तो वेदवक्ता भगवानीश्वर एव यत्तु वेदे पौरुषेयत्वं नोपैतीति तं प्रति विधिरेव तावच्छभेवेष्टानतिक्रमार्थाः १
पुंयोगे प्रमाणं नन्वर्हि लाघवं तात्पर्यगौरवात् ईश्वराद्यनन्तकल्पनादिति चेत् लाघवादिनेष्टा
वायकत्वेन लोके लिङः प्रमाणासिद्धत्वेन फलकरत्वगौरवत्वादोषत्वात् न च कर्त्तुरस्मरणं वा
धकं प्रागेव निरासात् स्वर्गकामनया विषभक्षणादप्रवृत्तस्य विषभक्षणं तत्कृतिसाध्यतया
नेष्टं रागोष्यते अतो विषभक्षणादौ स्येष्टसाधनविषयत्वेऽपि तेन न व्यभिचारः यद्वा यत्का-
मकृतिसाध्यत्वेन यो व्यापारो ऽस्यापि नेष्यते तत्तस्येष्टसाधनं विषभक्षणं च तत्पत्निकामकृति-
साध्यत्वेन नेष्टं रेष्टाविषयः मानाभावात् अत एव न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणं
स्वर्गकामनया भक्षणं प्रवृत्तस्य कृतिसाध्यत्वेनाप्येष्टाविषयो नेति तस्येष्टाविषयत्वे
पि विशिष्टनिषेध उपपद्यते अभिप्रायविधिपदे बलवदनिष्टाननुबन्धित्वमात्रं मानिकं
इष्टसाधनताविधिपदेन तदपि शक्यमिति गौरवमिति अथ स्वर्गकामो यजेतेत्यादौ विशि- दै.वै.-२
ष्टसाधनत्वं कार्यत्वं वा यदि विधिः सत्यमभिव्याहृतक्रियान्वयी तदन्यान्वयी वा तत्र गुरवः
नाहत्य क्रियाकार्यत्वं आलिङ् बोधयितुं शक्यते स्वर्गकामनियोज्यान्वययोग्यताज्ञा
नविरहात् कामनाविशिष्टस्य हि ममेदं कार्यमिति वोद्धृत्वं नियोज्यत्वं व्यमनायात्तद्बो-
धोपयोगे सति भवति स च काम्यानन्तरं काम्यसाधनताबोधात् कार्यताबोधे सति
--- एवं च स्वर्गसाधनताबोधे सति स्वर्गकामनियोज्या --- यता न च कालान्तरभा-
विस्वर्गे क्रियासाक्षात्परंपरया वा साधनमिति शब्दो बोधयितुमर्हति अत एव नाशित्वा
त् परंपर-- घटकानुपस्थितेश्च तृतीयप्रकाराभावाच्च अन्यथानुपपत्तिमादाय साधन

त॰चि॰म॰ त्वसंभवात् कल्पमपूर्वं न स्यात् इष्टसाधनता विधिपक्षे स्फुटैवानुपपत्तिः कार्यता विधिपक्षे ऽ शा॰वि॰
४२ न्वयप्रकारतया साधनत्वं शाब्दमिति फलतो न विशेषः अतः क्रियातो ऽन्यत् स्वर्गसाधनता हि का
42 र्यं क्रियाकार्यता निर्वाहिकं लिङाद्यर्थः ननु सजातीये ऽन्वयदर्शनं योग्यता दृष्टं च घृतपान
--वि--- त्वनः कालान्तरभाविहेतुत्वमिति चेन्न न यथा कथंचि---- स्यायो
ग्येपि सत्वेन योग्यताया अव्याप्तकत्वापत्तेः पदार्थतावच्छेदेन साजात्ये सद्योजातः प
यपिबनीत्यादौ प्रकृतेवासंभवादिति तस्मादन्वयप्रयोजकरूपवत्वं साजात्यं अत एव
द्रवद्रव्यत्वं सेककरणत्वे प्रयोजकमिति अयोग्यो वह्निः तदिहाशुविनाशिनः काला
न्तरभाविफलजनकत्वे फलसमयपर्यन्तस्थापि व्यापारजनकत्वं प्रयोजकमपूर्वं विनि
नासाजात्यमेव न गृह्यते घृतपानस्य तु वैद्यकोपस्थितधातुसाम्यमादाय इष्ट
साधनत्वयोग्यताज्ञानाविरुद्धस्य अप्यबाधकप्रमाणाभावो योग्यता न च साध
नत्वमात्रे बाधकं साक्षात्तद्बोधे ऽपि परंपरया साधनत्वमादाय तद्विज्ञानिसंभवात्
न च योग्यानुपलब्ध्या बाधस्य बाधात् परंपरासाधनत्वमपि बाधितं संस्कारस्येव तत्र संभवात्
अन्यथा यागेप्यपूर्वे क्रियाकामिकार्यो न स्यात् कास्यासाधनत्वात् नहि यदेव योग्यं तत्पश्चा
दयोग्यं अयोग्यत्वे वा निःफलः प्रयासः न च कामिकार्यमपूर्वं तदर्थिकार्यो च क्रियेति वाच्यं
यागे रागादित्यनेन विरोधात् तथापि द्वारानुपस्थित्या परंपरासाधनामिति ज्ञानं न भवेदि
स॰ ति चेत् [illegible] त्वं किं तु स्वर्गसाधनं याग इति ज्ञानं साक्षात्परंपरोदासीनं वस्तुगत्या परंपरा
सा [illegible] धनाविषयं तत्त्वयमानं ना योग्यतया पूर्वं [illegible] शक्यं यदि च साक्षात्परंपराविशेषबद्धवाच्य
भवितं

तिरिक्तंसामान्यंनास्त्येव तदाननुगमः किंविशेषयदिसिसाध्वात्परं परस्याचेति नचयावद्वि
शेषबाधेतद्बाधितं परंपरासाधनत्वेअबाधादिति मैवं योग्यताहिबाधकप्रमाविरहोवा स्व
त्पकलबाधकप्रमाविरहोवा नाद्यः वह्निनासिंचतीत्यादौत्वबाधकप्रमात्तद्विरहोत्तमा
यमेदेनसंभवत्तइतितदेवयोग्यमयोग्यंचस्यात् द्वितीयेतुयोग्यानुपलब्ध्यातन्निश्चयोशक्यः
परप्रमायाअयोग्यत्वात् नचवाच्यंसकलबाधकप्रमाविरहः स्वरूपसन्नेवप्रयोजकइति
अयोग्येयोग्यताभ्रमादन्वयप्रभावप्रसंगात् अन्यस्यतत्त्वबाधकसत्वात् अन्वयप्रयो बोध
जकत्वरूपवत्वेनबाधकप्रमाविरहो निश्चीयतइतिचेत् तर्हिप्राथमिकत्वात्सैवयोग्यता
नचसाप्रवृत्तिसंभवतीत्युक्तं किंचैकविशेषबाधेप्रागद्सामान्यस्यानंतरादितरविशेषप्र
कारकत्वानियतत्वंछिद्रबाधेछिद्रेतरघटज्ञानवत् नचद्वारानुपस्थित्याप्रकृतेतथाघटते
एतेनयदुक्तंप्रशस्तरूपवान्मैत्रइत्यत्रगौरश्यामविशेषानचगमेपिरूपमात्रमवगम्य
तेतथाविशेषानवगमेपिसाधनत्वमात्रमितित्यक्तं नत्रैकविशेषबाधाभावेनौ
दासीन्यसंभवात् एतेनस्वर्गकिम्यान्वयबलात् क्रियायाः फलसाधनत्वं तद्बलाद्धपरोःसं
स्कारस्येवस्थायित्वंकल्पतांकिमपूर्वेणासंकल्पविशेषस्ययागस्याध्रेत्यक्षानुपलब्धिरात्म
विशेषगुणानांप्रत्यक्षत्वाः एवस्वविषयकप्रत्यक्षजननस्वभावत्वादल नचैवंक्रियां
तरमिपितथा प्रमाणाभावात् एवंलोकसिद्धक्रियाकार्यता व्युत्पत्तिरपिभग्नानभवती
तियरात्तं स्वर्गसाधनत्वायोग्यतयास्वर्गकामान्वयस्तदन्वयेस्थायित्वमित्यन्योन्या
श्रयात् लोकोधर्मिग्राहकमानेनक्रियायाःक्षणिकत्वानियमानच ननुप्रत्यार्योयाति:
देव

त.चि.म. ४२ पूजायाराधनागौरवात्प्रीतिहेतुः क्रियाऽतो देवताप्रीतिद्वारा यागस्य स्वर्गसाधनत्वप्रतीतेः शा.वि.
तद्दृष्टीकत्वेपि प्रीत्यनुभवजनितसंस्कारद्वारा तत्संभवात् अतएवाग्नेयादौ प्रीतिर्नयाम्यादेव
43 दृष्टफलत्वमिति न यजेदेवपूजायामितिहि द्रव्याधिकस्मृतिः स्मृतिवादेव रक्तः प्रमाणं नच याग
स्वर्गस्य:४ स्यदेवताप्रीतिहेतुत्वे देवताप्रीतिसाधनत्वे वा मानान्तरमस्ति वस्तुतस्तु चेतने देवे मानमेव ना
स्ति यत्र च विष्णुप्रीतिकामादिवाक्यमस्ति तत्र विष्णुदेवप्रीतिः ननु विष्णोः स्वस्पर्धलक्षणा
दोषात् विष्णुशब्दस्य प्रीतिविशेषवाचकत्वं वेद एव कल्प्यते न च देवपूजार्थ यज्यन्वयव र्थ
तान्तथाऽन्योन्याश्रयात् नन्वेवमाग्नेयादीनां प्रक्षणिकत्वायोग्यतानवगतौ परमापूर्व
र्वकारणत्वावगमे कथमपूर्वकल्पनेति चेत् काम्येष्वपूर्ववाच्यत्वस्यितत्वाद्वाग्नेयादौ त
द्वारा साधनत्वस्य योग्यत्वसंभवात् ननु स्वमं ननु यो ब्राह्मणायावगुरेतं प्रातेनया
तयादित्यत्र ब्राह्मणवधोद्यमस्य शतयातनाहेतुत्वावगमे यच्चादुरितापूर्वकल्पनं तथा
हापीति चेत् अवगुरेषातुर्यदित्यत्र हेतुहेतुमत्तोर्लिङ्निन्दकप्राशना लिङ्गवगोचरता
शतयातनयोर्निवृत्तपौर्वापर्यवाधाते प्रत्यक्षे रागानुभवस्मरणयोरिव तत्र साधनत्वे साधन
साधनत्वे वोभयमपि मध्यवर्त्तिघटितमिति दुरितकल्पनं संस्कारवत् इहतु विध्यनुशिष्टा
लिङ्कार्यतामाह किंच कामी काम्यादन्यत्काम्याव्यवहितसाधनतया ज्ञानमेव कर्तव्यता
यावेतीतिनियमात् न क्रियायां कामिनोऽन्वयो योग्यः न च तृप्तिकामस्य पाके प्रवृत्तेर्व्यभि
चारः ओदनकामस्य तत्र प्रवृत्तेः तृप्तिकामनानु तत्कामनोपयोगिनी न तु साक्षात् अ
न्यथासाधनसाधने प्रवृत्तिर्न स्यात् काम्यसाधनत्वं प्रवर्तकं लाघवादिति चेत् न भोक्त

नकामस्यासिद्धौदनस्यपाकेप्रवृत्तिप्रसंगात् तस्यौदनद्वाराभोजनसाधनत्वाविशेषात् वि
शेषणेतु यत्राव्यवहितसाधनंपाकः तत्रकाम्यं यत्काम्यंतत्राव्यवहितसाधनंपा
कइतिनप्रवृत्तिः ननुपाकस्यासिद्धौदनद्वाराभोजनसाधनत्वंनसंभवति द्वारस्यसाध्यत्वात्
ओदनांतरद्वारावत्त्याप्रतिसंधानेऽव्यवहितत्वविशेषणेपिकृतेनपाकेप्रवृत्तिः ओद
नांतरेद्वारेसाक्षात्साधनत्वादितिचेत् न पाकस्यभोजनसाधनत्वेविशेषस्याप्रयोजकतयो
दनमात्रस्यद्वारत्वात्तस्यचसाध्यत्वाविवादात् ओदनविशेषेचासिद्धेओदनकामनाविरहात्
तत्रत्वात् नचोदनेसिद्धत्वाद्यपानकामनातत्रएवद्वारंतावतिन अथौदनांतरमसिद्धमादाय
द्वारतातर्हिकामनापिस्यादसिद्धत्वादितिचेत् न पाकस्यैकविशेषद्वारतावाधोनविशेषां
तरद्वारताविरोधीसकलविशेषस्यैकत्रद्वारताऽसंभवात् एकविशेषासिद्धौतन्मात्रकामना
विषयतेनहिसकलविशेषासिद्धत्वेनसामान्यकामनाविच्छेदः सकलविशेषासिद्धेरसंभवेन
तदनुच्छेदप्रसंगात् अथवाकाम्यादन्यत् साक्षात्साधनत्वेनज्ञायमानंयत्कर्तव्यतयाकामी
बुध्यतेतत्काम्याव्यवहितसाधनमंतरेणक्लेव यद्वाकाम्यादन्यत्कामीप्रथमंकाम्याव्यव
हितसाधनंकर्तव्यतयाऽवैतिपश्चात्तद्द्वाराव्यवहितसाधनमितिप्रथमंयाऽऽकामि कार्यताबो
धोयोग्यताभाहतएव अभावनास्ति विवादविषयोलिङ् समभिव्याहृतक्रियान्वितकार्यत्व
बोधिका प्रमाणलिङ्त्वात् लौकिकलिङ्वत् लिङ्पदस्यापिकार्यत्वं समभिव्याहृतक्रिया
न्वितं लिङ्पदस्याप्यकार्यत्वात् पचेतेतिकार्यत्ववत् यागोवाकार्यत्वान्वितः लिङ्संवति
तधातुप्रतिपाद्यत्वात् पाकवदित्यनुमानात् क्रियाकार्यत्वावगमेनापूर्वंकल्प्यमिति

तत्त्वप्रमेयायागान्वितकार्यबोधकत्वं लिङो बोध्यते न तु क्रियते न च योग्यताज्ञानं विना तत्सं
भवतीत्युक्तमेव नहि योग्यतादिकं विनैव तदनुमानप्रयोजनमात्रात् तदन्वितमभिधीयते
शब्देनानान्त्यौ कर्यादित्यत्र व्यभिचारात् वेदस्यानुवादकतापाताच्च नन्वपूर्वे व्युत्पत्ति
विरहः तथाहि प्रसिद्धार्थस्वर्गपदसमभिव्याहारान्यथानुपपत्त्योपस्थिते शक्तिर्गृहीत
व्यानवशाद्धानुभवात् पूर्वमपूर्वमुपस्थितं मानाभावात् अपूर्वव्याघातादवाच्यत्वापाता
च्च नच लिङादिना तदुपस्थितिः व्युत्पत्त्यनंतरं तत्प्रवृत्तावन्योन्याश्रयात् नच कार्य
त्वेनोपलक्षितेन तत्र शक्तिग्रहः उपलक्षणं हि स्मारणमनुमानं वा अगृहीते संबंधाग्रहात्
अशक्यमिति नैवं कार्यधर्मिणि कार्यत्वेन शक्तिग्रहात् कार्यत्वविशिष्टंचोपस्थि-
तमेव ततोऽन्विताभिधानदशायां यागविषयं कार्यमित्यनुभवः स्वर्गकामान्वययोग्य
तया घटादिकं तिरस्कृत्य क्रियाभिन्नयोग्यतावशाद्यागविषयकापूर्वे पर्यवस्यति
न त्वपूर्वत्वेन शक्तिग्रहो न वापूर्वकार्यमित्यनुभवः भवति च सामान्यबुद्धिः सहका
रिवशात् विशेषबुद्ध्युपायः यथा वैव कर्तृमात्रसंबंधग्रहात् कर्तृविशेषसिद्धिः नन्वु कार्य
त्वेनापि किं घटादौ शक्तिग्रहः उतापूर्वे उभयत्र वा नाद्यः अन्यप्रतिपत्तावन्यशक्तिग्रहा
नुपयोगात् नान्त्यौ प्रागनुपस्थितेरिति चेत् न — हि रूपेणाप्राब्देनानुभवो जन्यते तेन रूपे
णाशक्तिग्रह पदार्थस्मरणं च शाब्दानुभवहेतु नहि प्रमेयत्वेन शक्तिग्रहः पदार्थस्मर
णं च घटत्वेन शाब्दानुभवहेतुः एवं च घटादावेव कार्यशक्तिका लिङितिशक्तिग्रहः ततः
कार्यमितिस्मरणं ततो योग्यतादिवशात् प्रवर्तकत्वगुणकर्मणी कार्याणि विहाय यागादि

[illegible]कार्यमित्यनुभवोभवन्नपूर्वमालंबते योग्यत्वाच्च तस्यस्थायित्वलाभः अत एववाक्यार्थानु
भवमात्रविषयत्वात्तदपूर्वं नचसरत्नानामाकांक्षादिवत्पादन्वयबोधः पदेनक्रियते नचापूर्वं
स्मृतिगोचरइतिवाच्यं शक्तिग्रहपदार्थस्मरणशाब्दानुभवानांसमानप्रकारकत्वनियमेनतेषां
हेतुहेतुमद्भावावधारणात्लाघवादावश्यकत्वाच्च ननुक्वचित्सहचारमात्रेणान्वयव्यतिरेको
गिनएवोपस्थितिस्तथा गोरवात्गोपदाद्यदपूर्वंगवानुभवप्रसंगाच्च विशिष्टवैशिष्ट्यबोधे
सर्वत्रतथैव अन्यथापर्वतीयवन्हिर्व्यापकतयानावगतइतिकथंतदन्वयानुमितौ ननु
सामान्यलक्षणयाप्रत्यासत्त्यासर्वाएवव्यक्तयोव्याप्तिग्रहे शक्तिग्रहेचविषयीभवंतीति
पर्वतीयवर्तीयधूमव्याप्तिग्रहे तस्मादनुमितिरितिचेन्न येनरूपेणव्याप्तिग्रहस्तेन
रूपेणव्याप्यत्वेनवापक्षधर्मग्रहोनुमितौकारणमतःकिंतया अपिच साध्यप्रतीतिमन्तरापि
नास्तिचेत्तथापि किंचतत्वदपनिसाक्षीतिस्तत्रापूर्ववाच्यता कार्यत्वेनहिरूपेणापूर्वस्या
पिशक्तिग्रहविषयत्वं पदार्थस्मृतिविषयत्वंच नचैवमपूर्वत्वव्याप्तिःयागविषयत्वादे
र्विशेषस्यकार्येलिंगंविनानुपस्थितेः यथापर्वतीयत्वमानंवन्हौनानुमितिंविना ननुयदिकार्यं
क्रियासाधारणोलिङःशक्तिःक्रियाचायोग्येतियोग्यापूर्वलाभःतदानित्यनिषिद्धविधायुपूर्वयो
रलाभः नहितत्रायोग्यतयाक्रियान्यत्कंशक्यते फलाश्रयणां[illegible]
[illegible]त्कल्पनायांचबीजाभावात् नचैकत्रनिर्णीतःशास्त्रार्थःपरत्रापितत्
थैवेतिन्यायात्तत्राप्यपूर्वमेवलिङर्थइतिवाच्यं तत्यपूर्वत्वेनशक्तिःग्रहःकिंतुकार्यत्वविशि
ष्टेधर्मिणिक्रियाचतथाभवत्येव नचकार्येणासमंक्रियान्वयानुपस्थित अपूर्वपर्यवसानं

अभेदस्याप्यन्वयत्वादिति मैवं नहि लोके पचेतेत्यादौ कार्ये धर्मिणि शक्तिः कल्पिता किंत्वनन्यल-
भ्यहानिरूपे कार्यत्वमात्रे धर्मिणि पाकादेर्धात्वोरेवोपस्थितिसंभवात् क्रियाकार्यत्वस्यान्वि-
ताभिधानलभ्यत्वात् न यागधर्मिणि शक्तिर्वेदे कल्पनीयास्ति चाक्रियानिरासेनैव नहि क्रि-
यायाः कार्यत्वान्वययोग्यत्वेन धर्मिणि शक्तिः कल्पयितुं शक्यते तस्मादयोग्यतया क्रिया
निरासानंतरं तदतिरिक्तएवशक्तिः नंतरं कल्पनं नच क्रियातिरिक्तकार्यत्वात् कार्यमात्रं लघु ततः
क्रियापि शक्यैवेति वाच्यं यतो न ब्रूमः क्रियातिरिक्तकार्यत्वेन शक्तिः किंत्वयोग्यतया निरस्ता
यां क्रियायां धर्मिणि शक्तिकल्पनसमये यत् क्रियातिरिक्तं तत्र शक्तिः ननु शक्तिग्रहे क्रिया-
तिरिक्तत्वप्रवेशः नहि यत्र युक्त्यानुपपत्त्या यत्कल्पनं तदेव तस्य विषयः एवं च कार्यत्वेना-
न्वितदतिरिक्तकार्य एव शक्तिकल्पना क्लिन्यति वेधयोरपि तदेवोपास्ता अन्वययोग्यं लिङ-
भिधीयते नतु कार्यत्वमात्रं धर्मिणि बाधकाभावात् लघुत्वप्रसंगाच्च घटादिलिलि
ङ॰ शक्तिग्रहे नातिरस्क्रियते न पुरस्क्रियते अन्ययापि गौरवात् अन्विताभिधानदशा-
यामन्वययोग्यतयातस्याप्रवेशः विधिप्रत्ययस्य च तत्र प्रवेशः योगः केवलस्य तस्यासा-
धुत्वात् धातुसमभिव्याहारे व तदर्थेनान्वयबोधजनकत्वनियमेन घटाद्यप्रतिपादकत्वात्
अत एवाप्रयोगादेवाप्रयोगो अपूर्वत्वं वा प्रयोगोपाधिरिति वदंति अयाप्रतिपाद्यघटा-
दिवृत्तितया कार्यत्वं प्रवृत्तिनिमित्तं प्रतिपाद्यमात्रवृत्तेरेव तत्प्रयोज्यत्वात् अन्यथाप्रमेयत्वमे-
व तत्स्यादिति चेत् न यत्र कारिकाहि प्रतिपत्तिः पदजन्या तदेव तत्र प्रवृत्तिनिमित्तं फल-
कल्पत्वाद्यक्वे: न तु प्रतिपाद्यमात्रवृत्तिः मृत्वादौ व्यभिचारात् नच प्रमेयत्वं तत्स्यात्तद्दो

धस्यापवर्त्तकत्वात् अत एव लोके लिङ् लक्षणिकी क्रियाभिन्ने धात्वर्थे लिवेदे शक्तिकल्पनात्
न च लौकिकानामपूर्वे तात्पर्यं संभवति पूर्वं प्रमाणान्तरेणाप्रतीतेः क्रियासाधारणशक्ता
वपि लौकिके लक्षणैव पचेतेत्यत्र हि पाककार्यत्वावगम्यते तत्र कार्यत्वे लिङस्तात्पर्यं लाघवात् धा
न धात्वर्थेन क्रियया धात्वलभ्यत्वात् तदाहुः तात्पर्यार्थाद्वृत्तिर्न तज्जन्नेत्तात्पर्यमिति नत्ती
पाकस्यैकत्ववत्कार्यैककार्यत्वं च न त्यक्तत्वं शक्यं किं तु विशिष्टं विशेष्यापेक्षाच्च विशेषणा
मन्यदेवेति कार्यत्वे लक्षणा न च कार्यत्वाविशिष्टधर्म्युपस्थितावपि धर्म्यंशमपहाय
क्रियायां कार्यत्वान्वयोक्तौ किं लक्षणायेति वाच्यं न हि तत्र धर्मिगतत्वेनोपस्थितस्य
धर्मान्तराकाङ्क्षास्ति अत एव स्वतन्त्रकार्ये---पस्थितये लक्षणा यथा पौरोडाशकपाले
न कर्मानुपवपन्तीत्यत्र पुरोडाशार्थितया तद्---त्वेनोपस्थितस्य कपालस्य नोपपादनेति
स्वतन्त्रकपालोपस्थितये ऽधिष्ठाने लक्षणा न च व्युत्पत्तिविरोधः न हि लोके क्रियाकार्यत्वे
शक्तिरवधारिता येन विरोधो भवेत् किं तु कार्यत्वमात्रे क्रियायां धात्वलभ्यत्वात् ---र्थे
तरेषाकाङ्क्षावशितद्भङ्गः तस्मात् सकलत्वर्थान्वितस्वार्थबोधकत्वं प्रत्ययानां गृहीतं प्रत्यया
र्थश्चापूर्वमपीति न विरोधः --- वा लोके लिङ् क्रियाकार्यत्वे शक्तिः तथापि तत्त्यागाविने
व नान्यार्थत्वापायेन वेदे धर्मान्तरे शक्तिः नाविना स्वर्गकामान्वयसंभवात् अन्ये तु पचे
तेत्यादौ धातुनैव कार्यः पाकोऽभिधीयते लिङ् तु तात्पर्यग्राहिका न शक्तानियमत
स्ताद्दृश्येव च तत्प्रयोगात् सामान्यशब्दस्य विशेषपरत्वं च न शक्त्यन्तरं निर्वाहयत्य
त एव वर्तमानत्वादौ नल आदि शक्तिरिति लोके शक्तिग्रहात् व्युत्पत्तिविरोध इति तद

सत्त्वलिङ्कार्यत्वे सक्तौ -- यदा तु कार्यत्वज्ञानानुपपत्तेः युगपद्वृत्तिद्वयविरोधात् नच्यायत्रह
तत्स्वार्थ्या उभयसाधारणस्यानुपस्थितेरिति दिक् यद्वा ज्ञाने पदानां शक्तिः शक्यत्वात्
एवं च लिङ्पदमेकत्रोच्चारणेऽपूर्वार्थयित्वस्वर्गजनकत्वकार्यत्वानां ज्ञाने शक्तमिति व्यु
त्पत्तिः स्थायित्वज्ञानादिकं चोपस्थितमेव ततो लिङ्पदे नैकत्रोच्चारणे योग्यतादि
वशाद्यागविषयकस्यापि स्वर्गजनककार्यमित्येकं ज्ञानमनुभवरूपं प्रवर्तकव्यक्षा
कर्मविलक्षणविषयं क्रियते नचैवं नानार्थत्वं देकैकज्ञाने शक्तिग्रहादेकैकविषयोऽनुभवो भवेत्न
सत्कलितविषय इति वाच्यं शक्तिग्रहकाले एकत्रोच्चारणादिति विशेषणमहिम्नान्नत्संभवात्
नार्थैकप्रकारणाभावेन गौरवेण शक्तिग्रहे तस्याप्रवेशात् तथाप्यर्थानां समूहालम्बनं स्या
त् ननु परस्परं वैशिष्ट्यमिति चेत् न साकाङ्क्षधर्मधर्मिगोचरैकज्ञानस्यैव वाशी ज्ञानत्वा २
त्वे त् नच समूहालम्बनसंभेदः तस्य निराकाङ्क्षविषयत्वात् अस्तु वोपस्थितेष्वगृहीतासंसर्गेषु
स्थायित्वस्वर्गजनकत्वकार्यत्वेषु शक्तिः अगृहीतासंसर्गस्यापि विशिष्टज्ञानसमानशी
लत्वात् अत उक्तन्यायेन तत्--द्विषयमेकं ज्ञानं लिङ्पदेन जन्यते अत एवमथालौकि
कार्ये तु स्वर्गादिपदे तु शक्तिग्रहः ननु भवदुक्तप्रकारेण शक्तिग्रहः तथापि लिङ्--दाया
गविषयकार्यानुभवे सत्यदृष्टवत्ताभावात् स्वर्गकामान्वयः संभवतीत्युपपादकप्रतिसंधा
नेप्रतीतिसिद्धार्थत्व-- काम यदस्मिन्निव्याहारान्यथानुपपत्त्या लिङः कार्ये शक्तिकल्पना नाहि प्र
थमत उपपादकप्रतिसंधानं विना अर्थापत्तिः संभवति न च शक्तिकल्पनात् पूर्वमुपपादक
शरीरादिविषयमपूर्वज्ञानमिति चेत् तर्हि च एवविशेषउपपादकः पक्षधर्मतावलात्तासि ध्व=

तितत्प्राप्तिसंधानमर्थापत्त्याकारणं तथाप्येवं कहितामात्रस्य कल्पते कल्पनोच्छेदापत्तिः तस्मा
त्र्यथ्यासामान्यतोभोजनस्यपीनत्वसंबंधावगमोऽप्यवादक तर्केमानिक लल्पनात्ततोविशेषावगमो॰
यथावासा - - शक्तव्याप्तिवाचकपदेनसमभिव्याहारवशाद्विशेषाभिधानमेवमंत्रापिकार्य
मात्रवाचकचेकार्यविशेषलाभः संभवतीतितार्किनो - पादकप्रतिसंधानाद्भवत्यर्थापत्त्याशक्ति
कल्पनंत्यागविषयकंचकार्यंतघटादितस्यसविषयत्वाभावात् विषयत्वंचज्ञानघट्योरिवस्वभावस
वधोवानन्निरूपेणाधीननिरूपणत्वं वातत्समानसंवित्संवेद्यत्वं वा प्याहत्तसाधनत्वंवेति अशक्तिहि
यागदानहोमजन्यापूर्वाणांतत्फलरूपधानासाधनांतरव्यवच्छेदेनधर्मोकमात्रजन्यकं तदुक्तंविशा
दोहिविशेषार्थः सिनोनिर्वध्यतेविशेषसामिनोनीतिविषयोऽनियामकइति ननुयेरूपेण नो
शक्तिसहकृतेन कार्यत्वशक्त्यालिङ्पदाल्लक्षणयाकार्योपस्थितेर्योग्यतादिवशात् अपूर्वलाभस्तु
कार्यस्मरणं त्वन्विताभिधानोपयोगि नचापूर्वस्मरणं तत्र पदेनपदार्थेऽत्रवृत्तिनकश्चिद्विशेष
कार्यंचशक्यकार्यत्वसंबंधितयाऽवगतमेवेतिचेत् न लिङोलाक्षणिकत्वेनापूर्वानुभावक
त्वात् नचेतरान्वितस्वार्थशक्तस्य यज्यादिपदस्येतरदपूर्वमादायानुभावकत्वमितिवाच्यं॰
इतरोपलक्षितस्वार्थान्वयमात्रेहिपदानांशक्तिः नत्वितरस्त्रगोरवत् पदान्तरलभ्यत्वा त्
लक्षणायां चतीरोपलक्षितान्वयशालिस्वार्थानुभावकत्वमितरपदस्यातीरस - - संस्काराद
पस्थितिः अस्तनिहितेनान्वितालक्षणायाचतीरोपलक्षिताभिधानाभावात् नचापूर्वसं॰
स्कारविषयः किंच - - - - - स्वर्गकामकार्यविषयोयागइत्यननुभवोभवेत् लक्षणा॰
यामितरपदस्यलक्षणायांविशेषणकत्वार्थविशेष्यकानुभवजनकत्वात् नचैतादृशानो

श्रा
त॰ चि॰ म॰ श्रुतकाद्वितः न च यागो विशेषितकार्यमात्रे स्वर्गकामान्वयः प्रतीयते किंतु यागविषयककार्यविशेषो श॰ वि॰
४७ तथा च तथाविधकार्यबोधार्थं लिङः कार्ये शक्तिरेवेति अत्रोच्यते अन्वयप्रयोजकरूपवत्त्वं न
47 योग्यता धनाशोक्ते पयसा सिंचतीत्यत्रासत्यप्यन्वयप्रयोजकरूपवत्त्वे बाधकप्रमाय --- न
यबोधात् अन्ययोग्यत्वेपि स्वबाधकप्रमाविरहः कारणं नहि ईश्वरस्यापि प्रणीयइत्तिलाघवात् म
नैव योग्यता एवं तर्हि तदेव योग्यता योग्यं च स्यादिति चेत् सत्यं यथा दशाविशेषेण देवसा
कांक्षता कांक्षमासत्त्रम असत्त्वं च तथा स्वबोधकप्रमाविरहदशायां --- धकप्रमाविरहः
दशायां च तदेवान्वययोग्यप्रयोग्यं चाभिधीयते स्वबाधकप्रमातद्विरहं चावगम्य यो
ग्यतादिव्यवहारदर्शनात् स्वबाधकप्रमाविरहदशायां योग्यतादिसत्त्वेपि वह्निना सिंच
तीत्यत्रान्वयबोधाभावो धवत्वरूपप्रणीतत्वात् सामान्याभावस्य किंचिद्विशेषाभाव
नियतत्वात् विशेषाभावे कथं तद्भासत इति चेत् वस्तुगत्या परंपरासाधनं विशेषेभास
त एव परंपरासाधनत्वं प्रकारेण न भासते तत्प्रकारकभाने परंपराघटकज्ञानस्य हेतुत्वात्
यथा घटेन जलमाहरेत्यत्र योग्यतया छिद्रेतर घटो घटत्वेन भासते ------ तर
त्वेन तथा सति लक्षणाया युगपद्वृत्तिद्वयविरोधेन घटानन्वयप्रसंगात् उभयसाधारण
रूपेणानुपस्थितेश्च न जहत्स्व --- प्रथम --- तदुपस्थितिः न च सुप्तिभक्तीनां प्रकृत्यर्था
नुगतस्वार्थविषयबोधकत्वव्युत्पत्तेस्तत्र विभक्त्यर्थेनान्वयितेति वाच्यं प्रकृत्यर्थो हि प८
प्रकृतिप्रतिपाद्योत्पत्तराणीयानुबोधात् न च संस्कारसहकारात् प्रकृतेपि न च तस्या
नियतोद्बोधकत्वान्नियतात्तदुपस्थितिः फलबलेन तथा कल्पनादिति न शाब्दोपस्थापि

तेनैवशब्दस्यान्वयबोधकत्वात् नचैवमाकाशादिपदाशक्यस्य संस्कारेणोपस्थितस्य शाब्दा
न्वयत्वस्य कथं शाब्दानुभवविषयत्वमिति वाच्यं नियमतोयद्धर्मेरत्वेनोपस्थितेयत्र शक्ति
ग्रहस्तत्स्मरणाजनकसंस्कारस्य तद्धर्मविषयतानियमेन तद्बोधकात्तदंशेप्युद्बोधनियमस्य
काशपदादशक्यस्यापि तस्य भावात् अस्तुवा तदपि शक्यं यादि नियमत उपस्थितिः सहस्त्रयो
तो: गस्य वाच्यादिपरत्वेनाप्युपपद्यते वक्तृतस्तु नियततोपस्थितिरेव नास्ति अस्तुवा पदादपि नि
र्विकल्पक तर्ह्यन्वयबोधदशायामिवान्वयानुपपत्त्यभावात् गौपि कल्पना न स्यादिति चेत्
तर्हि विनापि कार्यत्वबोधनानन्तरगौपादानिकसाधनताबोधो न स्यात् औपादानिक
बोधेनुपपत्तिबोधस्य हेतुत्वात् कल्पनामात्रोच्छेदश्चैवं स्यात् प्रतीतानुपपत्तिमूलकत्वा
त् कल्पनायाः वस्तुतस्तु बाधकप्रमाविरहस्य योग्यतात्वेन संशयसाधारणत्वेन मा
नत्वमेव तस्याः प्रयोजकं तेन यत्र बाधकप्रमाणानिश्चयस्तत्रैवान्वयबोधाभावोन्यत्र तु तच्छ
माबाधाद्बोध इति यागोपि योग्यतासंशये नास्त्यन्वयबोधो यागत्वं बाधसंशयस्याप्रति
बंधकत्वात् अन्यथानुमानाद्युच्छेदप्रसंगात् अपूर्ववाच्यत्वेपि अपूर्वस्य स्वर्गसाधनतासंश
यात् योग्यतासंशय एवाप्रथममपूर्वस्य साधनत्वानिश्चयात् उपादानस्यान्वितामिधानो
त्तरकालीनत्वात् साधकबाधकप्रमाणाभावेन तद्वारकस्य भवि[illegible]साधनत्वसंभावनातः स्वर्ग या
कामान्वयश्रुतिरिति अपि च यथा क्रिया नास्थिरेत्ययोग्या तथा कार्यमपूर्वमपि विशेष
नास्थिरकृतौ वर्तिनष्टत्वात् न चाधिष्ठानेऽपूर्वमात्रे साधनत्वं तस्य पदार्थैकदेशत्वेनान्व
याप्रतीतत्वात् अन्यत्वन्वयाविरोधिरूपविरहे योग्यता अतएव वह्निनासिंचतीत्यत्र तद्
योगि

मेऽन्वयक्षमः यागेचान्वयविरोधिरूपविरहोयोग्यानुपलब्ध्यास्तु गमएवानचयागेऽप्यदृ
विनाशित्वंकालांतरभाविफलजनकत्वाद्विरोधीतिवाच्यं अनुभवेद्वाप्यपानेवापूर्वंविना
शिनिकालांतरभाविफलजनकत्वात् यागस्यैतत्सत्त्वात् अन्यथाऽपूर्ववैकल्यात् अ त
स्याचान्वयप्रयोजकरूपवत्त्वंलाघवादितिचेत् न तत्सत्त्वेपनाशोक्तोव्यभिचारात् अन्वयवि
रोधित्वेनयत्किंचित्प्रतिसंधानंचतत्रास्त्येवा अंततोबाधकप्रमाणाविषयत्वस्यविरोधित्वे
नोक्तानात् इति काम्यसाधनत्वज्ञानमेवप्रवर्तकंलाघवात् सिद्धोदनस्तृप्तिकामोलघू
पायभोजनेप्रवर्ततेनपाकेगुरूपायत्वात् जलाद्यर्थ्यांवासन्निहितेअतएवज्योतिष्टोमा
दौकृतस्वर्गफलत्वेपिगुरूपायत्वेनाननुष्ठानलक्षणाप्रामाण्यापत्ताफलमूसाकल्प्यते
२ सेत्स्यत्यनंतरीयकश्रमजनकत्वंवाप्रतिबंधकं आपेक्षाकाम्याव्यवहितसाधनतया
ज्ञानमेवपाधिकामीकर्तव्यतयाऽत्रैवनीतिनियमस्तदाहर्वमपित्वयाकार्यतयानावगम्ये
नअन्विताभिधानात् पूर्वंकाम्यसाधनताबोधकाभावात् उपादानस्यान्विताभिधानो
त्तरकालीनत्वात् अतएवकाम्यादन्यादित्यादिप्रकारद्वयंनिरस्तं कर्तव्यताज्ञप्तौप्रवृ
त्तौवाकाम्यसाधनत्वज्ञानस्यैवहेतुत्वात् नचकार्येघटादौलिङःशक्तिग्रहः यथालिङः
शक्तिग्रहकालेस्वर्गकामान्वयायोग्यत्वात्क्रियाभिनिरासः तथायागान्वयानुपपत्त्या
घटादिनिरासोपिभवेत् नहियागविषयकोघटादिःसंभवति अन्यथान्विताभिधा
नदशायामपितन्निरासोनस्यात् स्यादेतत् स्वर्गकामान्वयानुपपत्त्या तदन्वययो
ग्येलिङःशक्तिग्रहःस्यादिकार्यंतथा अतःशक्तिग्रहकालेक्रियानिरासोयुज्यतेन

दे:

घटादौ यजिपदसमभिव्याहृतस्वर्गकामलिङ्पदाभ्यामन्विताभिधानदशायां तु घटादिनिरासो यागा-
न्वयायोग्यत्वादिति तत्किं शक्तिग्रहकाले यागान्वयानुपपत्तिर्हि सत्या विहिता येन घटादिनिरा-
सिका मानप्रतिसंधीयते यत्तु नयन्वयस्यान्तरङ्गत्वात्पदार्थान्वयं बोधयत एवेतरान्वयबोधक-
त्वमिति तदन्वयानुपपत्तिप्रतिसंधानमेव प्राथमिकं अतः पदोपात्तप्रतिसंधाने शक्तिग्रहो ऽप्र-
म एव घटादेरप्राप्यत्वात् अतः पाकविशेषं प्रत्यपूर्ववाच्यतापत्तेश्च घटादीनामनन्वयादिना नि-
रासो न प्राक्तस्तदान्विताभिधानदशायामपि न स्यात् पाकादीनां क्रियात्वेनैव प्रथितत्वा-
दि= त्तन्निरासस्संभवाच्च एवं च घटपटद्रव्यगुणकर्मणां निरासे कार्ये धर्मिणि शक्तिग्रहः
न च विशेषा निरस्ता अपि कार्यसामान्यं न निरस्तमिति वाच्यं न हि विशेषविषयसामान्यज्ञान-
संभवति एवं नापूर्वसाधारणकार्यत्वेन पदादौ शक्तिग्रह इति परास्तं अत एवाग्रहीत-
संसर्गे कुत्रापि तत्कार्यत्वस्वर्गजनकत्वे ऽतङ्ग्रहाने वा शक्तिग्रह इति परास्तं स्यादिनाघ-
टादीनां निरासात् धर्ममात्रे च शक्तिग्रहस्य प्रकृते ऽनुपयोगात् किंच तेषु सत्यादिने शक्-
तिग्रहः प्रत्येकं वा नाद्यः प्रथमसमुदायस्यैकज्ञानाविषयत्वात् विषयत्वे वा पूर्वमेव विशिष्ट-
सत्वे ऽपूर्वत्वव्याघातः एकज्ञानविषयः तावत्युक्तधर्मधर्मिणोरेव विशिष्टत्वात् न द्वितीयः एवं
हि लिङ्पदात्स्मरणात् यं यजिपदाच्च यागस्मरणं न च पक्षे तेषां योग्यपद्यमस्ति न च प्र-
त्येकं शक्तिग्रहे ऽपि समुदायेन मेकमेव स्मरणं लिङ्पदादिति युक्तं समुदायस्यापूर्वमनन-
भवान्न स्मरणं च साकाङ्क्षधर्मधर्मिविषयकमेकं ज्ञानं न तदा ऽपूर्वं प्रत्येति: एकज्ञानारू-
ढयोः साकाङ्क्षयोर्धर्मधर्मिणोरेव विशिष्टत्वात् न त्वि पन्नबाधा ऐनेन स्वर्गादिपदे ऽप्यग्रहीत-

त·चि·म· संसर्गधर्मधर्मिसुशक्तिग्रहइति चेदुक्तं प्रत्येकसमुदायकल्पनारणाविकल्पग्रासात् अस्त्वालि शा·वि·
४६ ढं कार्येलक्षणौः यथा हिंसा वा: कोशांगेत्यत्र उरंध्र विशेषः प्रागनुपपन्नोप्यनुभूयते इतर
५८ यदा ह्याह्वाणिकस्यानुपायकत्वाद्यतस्याग्नपूर्वमपि कर्तव्य स्वर्गकाम कार्यविषयो यागइत्यनुभवे (स्वर्गकाम
स्वर्गकाम यागयोरन्वय प्रकार तया अपूर्वलाभः यद्वा याग इति शाब्दानुभवानंतरं तत्पर्यायात्यागविष कार्यविषयो) यो
यकं कार्यमिति ज्ञानमनुपपत्ति प्रभवं अत एव शाब्दबोधानंतरमौपादानिकबोधात्मकत्वात् : किं
वापूर्ववाचकत्वेपि न कलंजं भक्षयेदित्यादिना कलंजभक्षणाभावविषयकापूर्वमवगम्यापि जनप्रवर्तेत
तदभाव तथाहि कलंजं भक्षणो रागादस्य कर्तव्यता बुद्धिः जीवाद्या भक्षणाभावे निःफलत्वका
र्यात् सफलं करीय इति न्यायेन दुःखहेतौ भक्षणएव प्रवर्तेत तदभावे न निषेधापूर्वमेव फलमिति
चेत् न दुःखदुःखाभावान्यतया पंडत्वेन तदजनकतया च गौराम्नखापप्रयोजनत्वाभावात् सु
खवदपूर्वमपि प्रयोजनमिति चेत् न लोके तथानवगमात् अलौकिकयोः स्वर्गापवर्गयोः लो
कावगतप्रयोजनसुखदुःखाभावजातीयतया प्रयोजनत्वं वेदेपि कार्येस्य तेकाम्यस्येवापूर्व स्व: साधन:
स्य गौणप्रयोजनस्य लिङाभिधानं काम्यसाधनत्वात् तं विना कामिकार्यत्वस्य बोधयितुमश
क्यत्वात् न तु स्वतः प्रयोजनत्वेन तत्र सामर्थ्यात् अनुपयोगाच्च प्रवृत्तेर्भोजनादाविव
तृप्तेः काम्यसाधनतोज्ञानात् कार्यताज्ञानाद्वा गौणप्रयोजनकत्वेनैवोपपत्तेः नापिनि
त्यनिषेधयोरपूर्वस्य स्वतः प्रयोजनं लिङाभिधीयते काम्यस्थले धर्मिग्राहकलिङादिना
प्रवर्तककार्यत्वेनापूर्वमभिहितं नो नित्यादावपि कार्यत्वेनापूर्वबोधनं न तु स्वतः प्रयो
जनत्वेन न ह्यनित्ये लोकवेदावगत गौणमुख्यप्रयोजनाभावे तत्र लिङापूर्वस्य स्वतः

प्रयोजनत्वं बोधयति तेन विना प्रवृत्तिपरत्वानिर्वाहादिति चेत् न निरूपधीच्छाविषयत्वं हि स्वतः प्र
योजनत्वं अपूर्वस्य लिङा बोधनीयं न च तादृशेच्छाविषयोऽपूर्वं क्वचिदपि सिद्धं न च लिङेवापूर्वेच्छां
जनयित्वा तद्विषयतां तस्याः तत्राप्रमाणाभावात् इच्छायाः साधनांतरजन्यत्वाच्च अतो पि कामस्येति
न्यायेनेच्छाविषयत्वं प्रयोजनत्वं अपूर्वस्यापि लिङादिना निरुच्य बोध्यते अपूर्वेच्छायाः शाब्दज्ञानात्पू
र्वमसत्त्वात् किंतु शाब्दकार्यताज्ञानात्सेति अप्यकार्यत्वेनैवापूर्वस्याभिधानं न स्वतः प्र
योजनत्वेन किंतु लिङापूर्वं बोधितं तस्य स्वतः प्रयोजनत्वमिच्छाविषयत्वं भवति एवं ज्ञा
नवदेवापूर्वज्ञानस्य स्वतएवेच्छाजनकत्वात् ननु काम्यापूर्वसाधनताज्ञानान्नित्ये
कार्यताबोधनात्प्रवृत्तिरिति चेत् न अपूर्वज्ञानस्य [illegible] हेतुत्वेनावगतत्वात् काम्यापूर्वे
हि लोके कृतिइष्टसाधनताज्ञानादेवेच्छा न तु पूर्वज्ञानात् शास्त्रस्यस्य शास्त्रजकर्तव्य
ताज्ञानवलवदिति चेन्न फलविषयेच्छायाः इदं वा निःफलविषयं तथा अप्यप्रवृत्ति
मतो नित्यत्वान्नियोगेऽधिकार इति यदा मलगो प्रवृत्तः तदा नान्निषेधे शाब्दकार्यताधी
रिति तया विपरीत प्रयत्ने जनिते रागानतक्रियोत्पत्तिः नेनैवप्रतिबंधकत्वात् रागका
रित प्रवृत्ति उपजीव्याहि निवृत्तिकार्यता शास्त्रेण बोधिता ज्ञातेन बोधेन सफलं विपरीतक
तिरवश्यं कृत्याद्युतिशास्त्रस्य वलवत्त्वामिति चेत् निवृत्तिकार्यताबोधे पि निवृत्तौ यत्न
एवनोत्पद्यते यस्य प्रतिबंधकत्वात्स्यात् स्वाधनिवृत्तिकार्यताबोधकमप्रमाणं
निष्फलत्वेन कृतेरभावात् अप्यकलंजभक्षणस्यानिंदार्थवादेन वलवदनिष्टसाध
कत्वावगमात् न कलंजरोन प्रवर्तत इति चेत् एवमपि कलंजभक्षणानिवर्तनात् तदभावेनिः

 प्रयोजनतयाऽप्रवृत्तौ किमायातमिति एतेन नित्यापूर्वसाधने संध्यावंदनादावपि प्रवृत्तिरफलायाः
 क्रियायाः कष्टत्वात् तदपूर्वस्य पंडत्वात् स्वतोऽप्रयोजनत्वाच्च तस्माल्लोके पचेतेत्यादौ का
र्यत्वेष्टसाधनत्वरूपधर्मशक्तत्वेन लिङ् ज्ञाता स्वर्गकामो यजेतेत्यादौ तदन्वयं यागे योग्यता
 दिवशाद्बोधयती तेन वेदे धार्मिकिणि शक्तिकल्पना प्रतीतायां च स्वर्गसाधनतासाक्षादसाधन
स्य यागस्य व्यापारमंतरेणानुपपद्यमाना स्वर्गनिर्वाहकं व्यापारमपूर्वं कल्पयति ननु
रूपाधिष्टवर्तितकारणानां व्यापारेणानिर्वाह्यत इति कोऽर्थः क्रियते उत्तरानुपपत्तेनाद्यः उ
त्तरवर्तित्वेन व्यापारस्य तत्रासामर्थ्यात् नापरः लिङ्वत्प्रबोधनात् चिरध्वस्तं कारणं व्या
पारव्याप्तमिति चेत् न विपक्षबाधकाभावेनाप्रयोजकत्वात् अन्यथा ऐंद्रियकं कारण
मतीन्द्रियव्यापारकमिति यागानुभवयोः दर्शनादव्यवहितापत्त्या कल्प्येन प्रायश्चित्ता
दीनां च फलप्रतिबंधकत्वमेव प्रायश्चित्तस्य तस्मादेनसः प्रतीतो भवतीति यत्फलं प्राप्त
मस्ति तस्यानिषिद्धक्रियानोऽनफलं भवतीत्यर्थः —— तीर्तनकीर्तनादित्वेऽपि च कीर्तनादि
हिता क्रियाक्षरति फलं तज्जनयतीत्यर्थः क्षरतीत्यत्र बाधकं विना लक्षणेति चेत् उप
स्थितत्वेन विहिताक्रियायां धर्मपद शक्तिग्रहस्य बाधकत्वात् न चैतस्य करत्वात्तार्थ
पदार्थांतरे शक्तिः लक्षणाछेदापत्तेः विहिताक्रियाकर्तृत्वज्ञानेन धार्मिकपदप्रयोगाच्च
एतेन देवदत्तशरीरं देवदत्तविशेषगुणप्रेरितभूतपूर्वकं जन्यत्वे सति तद्भोगसाधनत्वा
त् तन्निर्मितस्रग्वदित्यनुमानाददृष्टसिद्धिरिति परास्तं जन्मांतरीयज्ञानादित्तिरेव तज्ज
नकत्वाभिमतेः सिद्धसाधनमिति मैवं चिरध्वस्तस्य व्यापारसत्वे कारणत्वमिति नियम

पाध्यन्वयव्यतिरेकाभ्यांव्याप्त्यवधारणात् यागस्याविरध्वस्तस्यकारणहेतुत्वव्यापारकल्पना
त् कार्यव्यापारस्य --- गन्वयव्यतिरेकग्रहस्तस्य तद्व्यापारकत्वउपाधिरितिचेत् न सं
स्कारेतदभावेप्यनुभवस्यतद्व्यापारकत्वमिति नचाप्रयोजकत्वं यागोयदिविरध्वस्तत्वेस
तिसव्यापारोनस्यात् स्वर्गकारणं नस्यात् घटवदितिविपक्षेबाधकात् नचात्रकारणताया बाध
एवाभावउपाधिः तेनाविसमं व्याप्त्यवधारणे तस्यापाद्यापादनात् नवैन्द्रियकस्यापीन्द्रियव्यापारकत्वनियमः
सव्यापारकत्वेकार्याव्यवहितपूर्वसमयेऽसत्वस्योपाधित्वेनाप्रयोजकत्वात् नन्वेवंसंध्यावंदनकरणा
स्यदुःखसाधनत्वश्रुतिः तत्करणप्रागभावेदुःखहेतुः यावतस्यास्थिरत्वेनदुःखजनकत्वसंभवात्प्राय
श्चित्तार्हः नचाप्रायश्चित्ताविफलंप्रायश्चित्ताभावसहकृस्थिरत्वेनदुःखात्कृतस्यैवतस्यतज्जनकत्वात् यत
प्रागभावनाशंएवंतेनक्रियतइति तत्र ध्वंसप्रागभावनवच्छिन्नकालस्यप्रतियोगिकालत्वेनतदाकरणाव
तेरितिचेत् न संध्याकालीनाकरणस्यदुःखसाधनत्वाद्विशिष्टस्यसंध्याकालायगमेऽपगमात्
नचसंध्याकालीनाकरणविशेषणकिंतुप्रतियोगिनिकरणे तस्यापिविशिष्टाभावः स्थिरएवें
तिवाच्यं संध्यायामकरणोऽन्वयः तस्यपदार्थत्वात् नतुकरणेतस्यपदार्थैकदेशत्वेनाधाधान
त्वात् तस्यापिध्वंसएवव्यापारोऽस्तु सहभावानिरूपकस्यापिकारणत्वात् तस्यानंतत्वेविस्व
भावात्समाधिफलजनकत्वं यत्रध्वंसोहेतुस्तत्रतत्प्रागभावोपीतिचेत् नतुदं ध्वंसजन्यदधि ग्ध
मिथ्याधीध्वंससाध्यमुक्तौचव्यभिचारात् प्रतिबंधकाभावत्वेनहिहेतुत्वेतस्याभावाद्ध्वंसे
नानुपपत्तिकथंतेनैवसमाधातव्योतिचेत् न ध्वंसेसतितद्व्यापारत्वेतान्नविनानुपपत्तेस्तद्व्या
पारत्वकल्पनयाप्रमाणेनेरिति मैवं प्रतियोगिध्वंसयोरेकत्राजनकत्वात् नहिनियमतोयत्वं

त॰चि॰म॰ सेसतियद्भवतितत्तत्र कारणं नचसंसर्गाभावत्वेनहेतुत्वेतथेतिवाच्यं व्यभिचाराभावेनतस्यापिप्रयोज श॰वि॰
५१ कत्वात् अथशब्दाद्यागकारणतावापारंविनातदनुपपत्तेस्तज्जन्यसस्यकारणत्वकल्पनमित्युभ
यमपिजनकं अन्यथानुमानाभावात् नतथा काम्यं त्र यागध्वंसस्ययागजन्यस्वर्गप्रतिजन
51
कत्वस्यमतारणांतरेविरोधेनार्थापत्त्याप्यकल्पनात् अस्तुदेवताप्रीतिरेवव्यापार इतिचेत् न
यागस्यदेवताप्रीतिहेतुत्वेमानाभावात् गंगास्नानादौदेवताविरहेण तदभावात् नचात्राविर
तत्वातिः तस्यतस्मतिहेतुत्वेमानाभावात् लाघवेनकर्तृमोक्षगतव्यापारकल्पनाद्वेति नन्वत्राथं
नियमः पुत्रकृतगयाश्राद्धादिनापितरिपितृकृतजातेष्ट्यापुत्रेवादृष्टोत्पत्तेः तत्रापिकर्तुर्येवा
दृष्टंविहितक्रियायायागस्येवकर्तृगतादृष्टजनकत्वात् नचमुक्तेपुत्रेतदृष्टनाशात् पितरि
नस्वर्गः स्यादितिवाच्यं अदृष्टस्यफलनाश्यत्वात्तयापितरिस्वर्गाभावेनादृष्टनाशात् स्व
र्गभोगजनकादृष्टस्यमुक्तिविरोधित्वात् नतुपितृगतमदृष्टंजन्यते मुक्तेपितरिदोषा
भावेनयोगिनामिवविहितक्रियायाः पितृदृष्टाजनकत्वात् तथात्वेचसांगमपिश्राद्ध
कंनिःफलंस्यादितितद्विधेरप्रामाण्यापत्तिः पुत्रगतादृष्टेनमुक्तेपितरिसुखोत्पत्तौदोष
स्याहेतुत्वात् अथपितृसुखंपितृप्रणयजन्यमितिपितरिप्रणयंतेनविनातदभावात् नमुक्ते
तेचफलप्रसंगात् पितृस्वर्गकामनाजन्याक्रियापितृप्रणयहेतुरितिपुत्रक्रियातज्जनिकेति
चेत् एवंपितृक्रियापितृप्रणयजनिकेतिनतांविनापितृप्रणयं पुत्रक्रियाचपुत्रप्रणयजनिकेतिपुत्रे
प्रणयंपितृस्वर्गकामनाजन्यप्रणयत्वेनपितृस्वर्गहेतुरस्तु तत्प्रणयंपितृवृत्तितत्सुखेहेतुत्वात्
नचपुत्रवृत्ति तत्सुखाहेतुत्वा[illegible]दितिचेत् न तत्प्रणयंनपितृवृत्तितत्कृत्यजन्यप्रणयत्वात्

पुत्रवृत्तित्वात् तत्कृतिजन्यत्वात् तत्कृतपुण्यवत् तस्मात्पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतु
त्वेति पुत्र एव तत्पुण्यमिति मैवं स्वर्गोपपादकस्य पूर्वस्वर्गाश्रये कल्पने प्रथमोपस्थितत्वात् ला
घवात् कल्पनायाः साक्षादुपपादकविषयकत्वाच्च न च स्वर्गहेतुकामनाश्रये स्वर्गकामनाजन्य
क्रियाकर्त्तरि वा विलंबितोपस्थितिकत्वात् गौरवात् परंपरया स्वर्गोपपादकत्वाच्च यदि च पुत्र
कृतपुण्येन मुक्तस्य शरीराद्युत्पत्तिः सुखं च स्यात् तदा मात्रादिविषयात्रसलाभिधानादि पुत्रक्रि
याजन्यपापेन सविश्वायाहुसि मृत्वा पितृभिः पच्यत इत्यादिबोधितनरकभागित्वापि मुक्तस्यापि तुः
स्यात् तथा च पुत्रकृततथाविधपापकियानकश्चिन्मोक्षार्थी ब्रह्मचर्यादिदुःखेनात्मानमवसादयेत्
दुःखेनात्यंतं विमुक्तश्चरतीति न स पुनरावर्त्तत इति श्रुतिविरोधश्च तथा च मुक्तस्य सुखदुःखे
शरीरादिकं च भवतीत्यपदर्शनं मुक्तेश्च पित्तरि श्राद्धादिदोषाभावो देवता दृष्टमुत्पद्यते न चैवसांग
६ श्राद्धस्यापि निःफलत्वं सूक्ष्मोत्पत्तौ स्वरूपसतो दोषस्यांगस्य वैगुण्यात् यथा विघ्नहेतु दुरित
ध्वंसेन कृतं मंगलं न पापध्वंसं जनयति स्वरूपसतः पापस्यापि भावादिति एवं च यागस्यापि
व्यधिकरणाव्यापारो भविष्यतीति उच्यते विहितक्रियाया कर्तृगतव्यापारद्वारा कालांतरे
फलं जन्यत इत्युत्सर्गः स च बलवता बाधकेनापोद्यते प्रकृते च बाधकं नास्ति यथा शास्त्र
दर्शितं फलमनुष्ठातरीत्युत्सर्गः पुत्रकृतगयाश्राद्धस्य पितृस्वर्गं प्रति पितृकृतजातेष्टेः पुत्र
पूतत्वादिकं प्रति हेतुत्वस्य शास्त्रेणाबोधनात् न त्वयं नियम एव पितृयज्ञजातेष्ट्यादौ परंपरा
संबंधेन कर्तृगतमेव फलं नाहि यस्य कस्यापि पितृपुत्रे चाफलं किं तु तस्यापि पितृपुत्रयोः तथा च स्वापि
तृपुत्रगतस्वर्गभागिपितृ कित्व वा परंपरासंबंधाफलेन पुत्रस्य एवं पूतत्वादिकं पितृ स्यात मेव

नचफलस्यकर्तृगतत्वंसाक्षात्संबंधनैवेतिवाच्यं ग्राम्यपशुपुत्रहिरण्यादीनांपरंपरयाकर्तृगत
त्वमितिव्यभिचारात् नहिग्रामादयःकर्त्तरिसाक्षात्संबद्धाः एवंफलस्यसाक्षात्कर्तृगामित्वबोधने
शास्त्रोत्सर्गोनतुफल--कर्तृगामितावोधने यत्तुस्वर्गभागिपितृकत्वंनफलंतत्कामनायाः
अकारिविशेषणत्वाभावात्------ कामइत्यादिश्रुते स्वतश्चतथाकामनयाप्रवृत्तौ
श्चतत्कामनाविरहेणाङ्गवैगुण्यात्फलाभावप्रसंगः किंचस्वर्गभागिपितृकत्वविशिष्टं
तत्रविशेष्यंतावत्पितृकत्वंनकाम्यंनवाफलंसिद्धत्वात्तदसाध्यत्वाच्च किंतुविशेषणंपितृगतः
स्वर्गइतिसएवफलमितितन्न नहिस्वर्गभागिपितृकत्वंफलंअपितुस्वर्गेणासमंपुत्रस्यपरंपरा
संबंधरूपंतद्युक्तमिति उच्यते परंपरासंबंधिनयदिपुत्रगतत्वंपितृस्वर्गस्यतदासंयुक्तसंयुक्त
समवायेनघटरूपवैतरस्यापिफलंस्यात् ससंबंधःशास्त्रेणानवबोध्यतइतिचेत् नहिस्वर्ग
भागिपितृकत्वमपितत्पद्याशास्त्रेणावोधितत्वात् ग्रामपशुहिरण्यादीनांचसिद्धत्वेननका
म्यत्वं किंतुतद्विषयकस्वत्वंकाम्यंफलमपिकाम्यंतदेव तच्चसाक्षादेवकर्तृगतत्वेनफलस्य
साक्षात्संबंधोपिनियतएव नस्वाम्यगतगतत्वेनफले--- नत्वत्रमेवशास्त्रेदे तत्फलं
अत्रएवकामनाविषयःस्वगतएवस्वर्गःफलंयागादेः स्वर्गस्तत्वादेश्चपितृपुत्रगतत्वेनका
---मातश्चाद्रजातेष्टयादेःपितृपुत्रगतत्वमेवफलं एवंचमातापित्रादिगतस्वर्गकामनयादिपु
त्रादिनांकृतंपुष्करणीमहादानादिकंपित्रादिस्वर्गजनकमेव कामनाविषयस्वर्गसाधनत्वेन
तेषांश्रुतत्वात् नहिस्वगतस्वर्गकामस्यकर्त्तव्यत्वंपुष्करण्यादेविधिर्बोधयतितथाश्रु
तेः किंतुस्वर्गकामस्यस्वर्गःस्वगतःपरगतोवेतिस्वर्गकामत्वमविशिष्टं यजेतेत्यादितमनेपद

मपिकर्तृभिर्व्वेतक्रियाफलमात्रजनकत्वे नचस्वर्गकामोयजेतेत्यादित्यादौत्स्वगतस्वर्गकामनायाअंत्र
तरंगत्वादौत्सर्गिकत्वाच्चस्वर्गकामत्वेनस्वगतस्वर्गकाम एवोच्यते सामान्यंबाधकं विनावि सर्ग ॥ २
शेषपरत्वेमानाभावात् केचित्तुसम्यक्गृहस्थाश्रमपरिपालनस्यब्रह्मलोकावाप्तिः फलंश्रूयत
इतिजातेष्टिपितृयज्ञयोरपिगृहस्थकर्मत्वेनतद्देवफलमितिफलस्यकर्तृवामित्वेतियम
वच्छात्रिकफलाभिप्रायेणोत्सर्गइत्याहुः ननुयावज्जीवपरिपालनस्यतत्फलंनतुका
म्यश्राद्धादेःकाम्यांतर्भावेमानाभावात् यावत्काम्यानुष्ठानाशक्तेश्च यातत्स्वकाम्यानुष्ठा
नस्यावश्यंतर्भावा कामनाविरहादिनाप्यकरणात्यावज्जीव्यानुष्ठानेतत्फलाभावप्रसंगात्
नित्यस्यैवावश्यकत्वेनोपास्यत्वान्यथात्व अपिच तैःकर्मभिःप्रत्येकमुत्पत्स्यपूर्वैरैश्वर्यपर
मापूर्वंजन्यतइति --- गौरवात्मानाभावाच्च किंत्वाश्रमक्रियया परिपालनरूपव्यापारांतरे
णावांतरेणसपूर्वःकर्मब्रह्मलोकावाप्तिफलकमिति मेवं भगवदुद्देशेनकृतस्यकामस्यानि
त्यस्यवायस्यकस्यापि पालनाद्ब्रह्मलोकावाप्तिफलंश्रूयतेइतिजातेष्टिपितृयज्ञयोरपि त
थाकृतयोस्तदेवफलंतथाचश्रीभगवद्गीता यज्ञायाचरतःकर्मसमग्रंप्रविलीयते यज्ञा
र्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनइति नच्चकर्मयज्ञार्पततयाप्रत्येकमेवतत्फल
सम र्पफलसंबंधसंबलनंतुमंगलवदुपपद्यते अन्यथाप्येकैकप्रयोगस्यव्यवधानाद
संभवः परिपालनंचकर्तव्यमित्येवकारणं मदुक्तंचदामिदेयमित्येवयजेयष्टव्यमि
त्यत्तामिति सुतानिबंधसंबंधएवसम्यक्त्वंतत्त्वविहितमात्रानुष्ठानमिति नत्र यत्कि
चिन्निबंधसंबंधस्याभावात् सर्वनिबंधसंबंधस्यसर्वत्रसुलभत्वात् संप्रदायः अत्र
दिति

अत्र ब्रूमः भगवदुद्देशेन कृतं किंचिदेव कर्म सर्वं वा काम्यं वा सर्वं नित्यं वा सर्वमिति नाद्यः ए-
केनैव काम्येन नित्येन सर्वत्वेन तथा कृतेन तत्फलसिद्धौ बहुवित्तादिसाध्य श्राद्धादेरप्रवृत्त्यापत्तेः
नापरोऽशक्यत्वात् न तृतीयः जातेष्ट्यादेर्नित्यत्वाभगवान् तस्मात्सम्यक्कृतगृहस्थाश्रम-
पालनस्य नं तत्फलं सम्यक्त्वं च सामस्त्यमेव अत एव श्राद्धादेर्ब्रह्मलोकावाप्तिरिति साधू-
क्तं शास्त्रे दर्शितं फलमनुष्ठातरीत्युत्सर्ग इति तच्च फलं क्वचित् विधिवाक्यस्थं क्वचिदर्थ-
वादिकमिति नन्वर्थवादानां सिद्धार्थतया न प्रामाण्यं कार्यान्वित एव पदानां शक्त्यवधार-
णात् वृद्धव्यवहारादेव सर्वेषामाद्या व्युत्पत्तिः उपायान्तरस्य शब्दव्युत्पत्त्यधीनत्वात् तथा
हि प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यस्य प्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य
प्रयोजनजिज्ञासायां तदन्वयव्यतिरेकानुविधायित्वादुपस्थितत्वाच्च प्रयोज्यप्रवृत्ति-
मेव प्रयोजनमवधारयति न चाकिंचित्करं वक्तृत्वादर्थसंभवतीति तज्जन्यं प्रवृत्त्यनुकूलं
कार्यताज्ञानमेव कला ---- प्रवृत्तौ तेन कार्यताज्ञानस्य हेतुत्वावधारणात् नान्यत्र प्रवृ-
त्तेः कार्यताज्ञानाव्यवधानत्वात् न चैवं शब्दस्य स्वार्थज्ञानद्वारा प्रवृत्तिहेतुत्वं ---- गोपालेन शब्दा-
हितविशेषस्य कार्यताज्ञानस्य हेतुत्वेनावधारणात् ज्ञाने च प्रत्यक्षादिना नोपायकत्वदर्श- न ब
नात् शब्दोऽपि कार्यताज्ञानहेतुरित्येवं ध्यर्यतत्रैव शक्तिं कल्पयति उपस्थितत्वात् पश्चादा-
वापोद्धारेण क्रियाकारकपदानां कार्यान्वितत्तदर्थेषु शक्तिं गृह्णाति प्रथमं गृहीतसामा-
न्यशक्त्यनुरोधात् अप्यप्यपि वृद्धव्यवहारादौ कार्यान्विते धीरनुमिता तत्राप्यन्वि-
तमात्रशक्त्यैव कार्यवाचकपदसमभिव्याहारादाकांक्षादिमहिम्ना कार्यत्वधीसंभवान्न कार्यांश-

विशक्तिः परंपरयाविशादस्यकार्यान्वितज्ञानानुकूलत्वादर्थापत्यात्तावन्यथोकपत्तिरपि अवश्यं
चाकांक्षादः ---- वंकार्यशशक्तावपि न व्यतिरेकादन्विताभिधानव्यतिरेकानियमात् सत्तिचा
कांक्षादौकार्यत्वव्यतिरेकदर्शनादन्विताभिधानव्यतिरेकनियमात् सत्तिचाकांक्षादौकार्यताव्या
तिरेक --- हाप्यत्ति अन्यथागवादिपदानांव्यक्तावपिशक्तिः स्यात् संस्कारादेवव्यक्तिलाभद
र्शनान्नतथेति ---------- चकपदादेवकार्यान्वितलाभइतिवाच्यं किंशक्त्या वृद्धव्यवहारेनि
यमतः कार्यान्वितज्ञानं दृष्टमिति ---------- ष्यनेवृद्धव्यवहारे शब्दोपस्थापितेनैवान्वया
वोधनाद्यद्वसंनि ------- हेतुत्वाकल्पनेद्वारमित्या --------------- येन क्वचिदसंसृष्टा
वाके वृद्धव्यवहारादाद्यव्युत्पत्तेः शाब्दसंनि ------- रतीतिचेत् तर्हि ----------------
दर्शनात् कार्यत्वमपिव्यभिचारि न च तत्रलक्षणा बाधकाभावात् ष्य ------ भिया ह्यन्य
----- गमता इहत्तलघी -------- यसाधारणपदार्थमात्र शक्त्यास्तु व्यस्यैवोचितत्वात् त्व
किंचकार्यवाविसिङ्‌आदीनामाकांक्षाद्युपेतपदार्थान्विताचार्यबोधकत्वमवश्यंवाच्य अत्तोध
विशेषात्पदांतराणामपितथात्वमस्तु लाघवादिति मैवं व्यवहारहेतुतयानुमितेहि कार्या
का न्वितज्ञानेहिऽन्वयव्यतिरे अप्यंशाब्दस्यसाक्षात्कारणत्वमवधारयतिनपरंपरया साक्षात्वस्यौ
त्सर्गिकत्वेन तत्समवेपरस्पर याध्वान्याप्यत्वात् इतितत्रैवशक्तिं कल्पयतिनान्वितज्ञानोपदार्थ
ज्ञानेवाऽप्रवर्तकतयाप्रवृत्त्याख्यकारणत्वेनतयोरनुपस्थापनात् नचान्वितज्ञानशक्तावपि
परंपरयाकार्यत्वधीः संभवतीत्यर्थापत्यास्यैवकल्पतां लाघवात् नतुज्ञानेशक्तिरन्यलभ्य विशिष्ट
म्यत्वात् इतिवाच्यं अर्थापत्तेः साक्षादुपपादकमात्रविषयत्वे - न्यूनाधिकाग्राहकत्वात् सा

ज्ञाहृपपादककार्यान्वितज्ञानेशक्तिः कल्प्यते लिङादीनांश -------- द ल ---- कस्या
प्यभावात् ---- श्रुत्य तेर्विचार्यकत्वात् किंचप्रवृत्ति — रस्मात्तयोपस्थितं कार्या ------ न
मपहायानुप ---------------- ल्पनमयुक्तं हेत्वभावात् उपस्थितान्वितरेगौरवा
त् अप्यकार्यान्वित ---- तावप्यन्वितज्ञानमप्युपस्थितमिति ल ----------- प
हायान्वितेशक्तिर्गृह्यतामितिचेत् ज्ञानेहिपदानांशक्तिः शक्यत्वात् नार्थे अन्यच्चकार्यान्वि
तज्ञा --------- ज्ञानं विषयभेदेनज्ञानभेदात् तदुक्तमभाववादे अन्यद्भूतलज्ञानम
न्यच्चघटवद्भूतलज्ञानमिति अन्वितज्ञा --------- नशक्तिग्रहइतिगौरवमेव लघुनिश्चा
येसंभवतिअन्यलभ्यं गुरुनतत्पानिचेत् न युगपदुपस्थितौतथात्वात् नचतस्याप्यनुपस्थितिः
उभयविशेषदोषात् सर्वैरेवाप्रवृत्तौतथानवगमात् तथापिनकार्यान्वितेशक्तिः कार्यवा
लिङादीनांव्यभिचारादितिचेत् न सर्वपदानांकार्यत्वविशिष्टधीजनकत्वात् नन्वकार्यान्वि
तस्वार्थप्रतिपादकतयेतरान्वितस्वार्थवाचिकार्यप्रतिपादकतया वाच्य एवंकार्यान्वितव्युत्पत्तौसत्यां
अनाकांक्षादौव्यभिचारादाकांक्षादेरुपाधित्वं तथाचोपजीव्यप्रथमभाविकार्यान्वितव्युत्पत्त्यनु
रोधेनविध्यश्रुतावपिकार्याध्याहारः क्वचिल्लक्षणा क्वचिदसंसर्गाग्रहइति सिद्धार्थेऽन्वयप्रतीत्य
त्तिदर्शनादुत्तरकालमन्वितमात्रेशक्तिरेवकल्प्यतां प्राचीनकार्यान्वितज्ञानंबाध्यतामित्यत
एवनिरस्तं पूर्वकल्पनात् कल्पनान्तरप्रसंगात् उत्तरकालभाविसिद्धार्थप्रयोगस्यलक्षणादिभिर
प्युपपत्तेः अनन्यथासिद्धत्वाभावेनप्राचीनज्ञानाबाधकत्वात् उपजीव्यव्याघाताच्च अथसिद्धा
र्थेपिव्युत्पत्तिः संभवति तथा ---- चैत्रपुत्रजन्माबालस्ताद्रष्ट्रापुत्रनैवबातीहारेणाचै

त्रसमीपंगतश्चैत्रस्तेजात इतिवार्त्ताहारवाक्यश्रवणानन्तरं चैत्रस्यमुख ---------- हर्षमनुमिनो पुत्र
ति हर्षाच्चतत्कारणंपुत्रजन्मज्ञानंकल्पयति उपस्थितत्वात् उपपादकविषयत्वात् अन्यो
पस्थितौगौरवात्तु च तत्रवाक्यस्यकारणतांकल्पयतिलाघवादितिचेत् न हर्षहेतूनांबहूनां
संभवात् हर्षेणलिंगेनपुत्रजन्मज्ञानस्यबालेनानुमातुमशक्यत्वात् प्रियांतरज्ञानस्यपरिशे
षयितुमशक्यत्वात् अथपुत्रजन्मज्ञानाव्यभिचारिदृष्टिप्राह्लादिक्रियाविशेषदर्शनात्पुत्रजन्म
ज्ञानानुमानमितिचेत् तर्हिपुत्रस्तेजात इतिवाक्यंतत्तत्क्रियाकर्त्तव्यपरमेवेतिकार्यान्वितज्ञानजन
कत्वमेवतस्यप्रथमतोगृह्यते तदुत्तरकालंपुत्रजन्मज्ञानानुमानमिति नव्युत्पत्तिःकार्यंजहाति
यत्रापीहसहकारतरौमधुरंपिकोरौतीतिप्रसिद्धार्थपदसामानाधिकरण्यादिभिःव्युत्पत्तिस्त
त्रापिव्यवहाराधीनव्युत्पत्तिपूर्विकाकार्यान्वित एवप्रवृत्ताऽपिकपदशक्तिःपूर्वंनावघततेतिचेत्
---------- मातयेत्यादौकस्यचित् कार्यान्वित एवव्युत्पत्तेः उपजीव्यजातीयतया चत
स्याबलवत्त्वं किंचेदमपिपदं कार्यान्वितज्ञानंशक्यक्तः ---दत्यादितिसामान्यतोवगतस्वार्थः वि
शेषःपरंनाधिगतः सइदानींतद्दुपदेशादिभिरवगम्यते अतःसिद्धप्रवृत्तिपराणांशब्दानांप्र
वर्तकज्ञानजनकत्वं तच्चक्वचित्साक्षात्परंपरयाकार्यान्वयात् अतएवविधिशेषीभूतार्थ
वादानांस्वर्गादिपदशक्तिग्राहकाणांचप्रवृत्तिपरत्वेनपरंपरयाकार्यान्वयात्कार्यान्वितस्वा
र्थबोधकत्वमिति यत्रपुराणभारतादिपाठेफलश्रुतिरस्मिन्नर्थवादकल्पितविधिशेषी^
भूतत्वेनप्रवृत्तिपरत्वमेवतेषामितिपरंपरयाकार्यान्वयात्कार्यान्वितस्वार्थबोधकत्वं स्वरूपाख्या
नपराणां काव्यनाटकादीनांप्रायोसंसर्गाग्रहेणासंसर्गव्यवहारोनसंसर्ग इति अत्रोच्यते घट
उ ग्रह

त॰चि॰म॰ घटमानयेतिवाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयनकार्यताज्ञानमनुमि
५५ तं बालेन न तु कार्यान्वितज्ञानं प्रवृत्तिविशेषं तस्याहेतुत्वात् घटादिपदशक्तिग्रहे तस्याप्रयो श॰वि॰
55 गात् तत्र च ज्ञानविशेषे घटमानयेति वाक्यविशेषस्यानाकलितपदविभागस्य हेतुत्वमवधार्य घ
टपदद्वितीयाधातुविधिप्रत्ययानां प्रत्येकावापो[illegible]रेण घटकर्मत्वानयनकार्यत्वज्ञाने प्रत्येकं
कारणत्वमवगम्य शक्तिं कल्पयति पश्चात् प्रवृत्तिसामान्येनानुमितकार्यान्वितज्ञाने वाक्यमात्र स्ना=
स्यान्यलभ्यत्वेन कार्यांशमपहायान्वितज्ञानमात्रे शक्तिं कल्पयति ननु प्रथममेवाकर्ममात्रस्य
कार्यान्वितज्ञानमात्रहेतुत्वकल्पनं अथ घटानयनक्रियायां प्रथमं क्रियात्वज्ञानात् प्रवृत्ति वेष्टात्व=
मात्रानुमानं तेन च कार्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्व --- यित्वा शक्तिं कल्पय
ति तदुत्तरं विशेषयोः कार्यकारणभावधीरिति चेत् न प्रथमं प्रवृत्तिमात्रकार्यान्वितज्ञान
मात्रयोरनुमानवाल -------- तीत्यप्रमाणाभावात् घटादिपदशक्तिग्रहस्य तेन विनापि
संभवात् भवदनुमानसामग्रीतदा तत्तेन निवाच्यं तदोच्यते ------- भावात् सामा
न्ययोः कार्यकारणभावग्रहो विशेषयोस्तथात्वग्रहे हेतुरिति चेत् न विशेषयोरन्वयव्य
तिरेकाभ्यामेव तद्ग्रहात् ननु --- एवं सति विशेषयोः कार्यकारणभावग्रहे तत्सामान्ययोरपि
हेतुहेतुमद्भावो भासते अन्यथा न सहृदर्श - गम्याव्याप्तिः स्यात् तथा च तत्रापि विशेषयोः कार्य
कारणभावबोध एव सामान्ययोस्तथाभाव इति चेत् न प्रत्यक्षे सविशेषग्रहायोग्यत्वात् सा
मान्यमपि भासते प्रकृते च कार्यविशेषेणाकारणविशेषानुमितौ न सामान्यमिति न युगपदु
पस्थितिः अथ विशेषयोः कार्यकारणभावात् सामान्ययोरपि तथात्वमवधारयतीति चेत्

तर्हि विशेषयोः कार्यकारणभावावगमः प्राथमिक इति तन्मूलकः प्रथमं ---- ग्रह
- एवस्यात् निः प्रयोजकत्वेनान्तरानुमितौ मानाभावात् यत्तूक्तं प्रवृत्तिकारणतयोपस्थि
तं कार्यान्वित ------- न्वितज्ञानकल्पयित्वात् न शक्तिकल्पनमयुक्तं उभयथा गौरवादि
ति तन्न कार्यान्वितज्ञानेऽन्वितज्ञानत्वस्य सत्वात् तद्विशेषत्वात्तस्य अतस्तत्रैव शक्ति
ग्रहो वकार्यत्वांशोपि अत एव घटवद्भूतलज्ञाने भूतलज्ञानत्वमपीति तद्भिन्नं तत् ज्ञानमभाव
व्यवहारकारणत्वयास्वीकृतं अस्त्वेवं किं तु तदुपस्थितावप्यन्वितज्ञानत्वेनाविषय इति तस्यै
वोपस्थितत्वेन संकल्पमिति चेत् न कार्यान्वितज्ञाने अन्वितज्ञानत्वं विशेष्यमिति तदुपस्थि
तौ तस्यापि विषयत्वात् विशिष्टज्ञानसामग्र्यां तो विशेष्यभावावच्छेदभावात् अन्यथा
व्यक्तज्ञातिज्ञानमन्यच्च जातिविशिष्टज्ञानमिति व्यक्तिज्ञानमपहाय जातिज्ञानं नोपस्थितमि त्यपि
ति तत्तद्जातिरेव पदार्थः स्यात् जातेः केवलोपस्थितौ च न व्यक्तिसमानसंवित्संवेद्यत्वं अथ जातिविशि
ष्टज्ञानोपस्थितेर्व्यक्तिज्ञानविषयत्वेपि गौरवात् व्यक्तेरन्यलभ्यत्वाच्च जातिविशिष्टज्ञानत्वं न श
क्ततावच्छेदकं तु जातिज्ञानत्वं लाघवादिति मतं तर्हि तुल्यं नच युगपदुपस्थितौ लाघवावतारोन
चात्र युगपदुपस्थितिरिति वाच्यं विशिष्टज्ञानस्य विशेष्यविषयत्वनियमात् किंच ममे
दं कार्यमिति ज्ञानं साक्षादुपपादकं प्रवृत्त्याख्यकारणत्वेनानुमितमतस्तत्र शक्तिग्रहणीया
त् साक्षादुपपादकविषयत्वात्कल्पनायाः नत्विदं कार्यमिति ज्ञाने तस्य साक्षादुपपाद
कोपपादकत्वात् अपेदं कार्यमिति ज्ञानप्रवृत्त्यैव परंपरयानुमानद्वारा ममेदं कार्यमिति
ज्ञानसंभवादन्यलभ्यत्वेन न तत्र शक्तिकल्पनामिति न हि तिराम्वितज्ञानप्रवृत्त्यैव कार्य

 वाचकसमभिव्याहारेणैव कार्यान्वितज्ञानसंभवादन्यलभ्यत्वेन च तत्र शक्तिकल्पनमिति तुल्यं नन्वि
 दं कार्यमिति ज्ञानं साक्षादेव प्रवर्त्तकं कर्त्तव्यताप्रयोजकयावदेकविशेषणस्य स्वगतत्वप्रतिसं-

धानं सहकारि तेन नातिप्रसंगः न च सहकारिविलंबेन कार्यानुत्पादे साक्षात्साधनत्वं निवर्त्त-
तइतिचेत् न लाघवेन ममेदं कार्यमिति ज्ञानादेव प्रवृत्तेः यथा चमविष्यद्विषयकार्यतानु-
मितिः तथोक्तमधस्तात् अपि च यादृशस्य प्रकृष्टस्याविगीतकृतिसाध्यमिदं ताह्रशोहमिति
धीर्न प्रवृत्तिहेतुः कृतक्रियमाणविषयकृतिसाध्यताज्ञानस्य सिद्धविषयस्यासिद्धविषयेच्छानु-
त्पादकत्वात् इच्छायाः स्वप्रकारकधीसाध्यत्वेन कृत्या साधयामीतीच्छायाः स्वकृत्यनंतरंभ-
विष्यत्तारूपकृतिसाध्यताधीनस्यत्वाच्च अपि वास्तु प्रथमं कार्यान्वितज्ञानेकस्य साक्षात्कार
णत्वबोधात् तत्र शक्तिग्रहः तथापि पश्चाद्बापोद्धारेण पदविशेषस्येतरान्वितस्वार्थज्ञान
शक्तिं कल्पयति लाघवात् न तु कार्यत्वांशोपि गौरवात् अन्यलभ्यत्वाच्च न चैवं प्रथमप्र-
वृत्तस्य साक्षात्करणतावोधकस्य तन्मूलककार्यान्वितशक्तिग्रहस्य च बाधः स्यादितिवाच्यं
इष्टत्वात् अन्यथासिद्धि मध्यपतनो हि बाल... सत्तं इति तस्यावलवत्वात् गौरवान्य
लभ्यत्वतर्कसहकृतप्रमाणजन्यत्वेनेतरस्य बलवत्वात् न चोपजीव्यबाधान्नतथा प्रवृत्त्येति तिवा
च्य उपजीव्यत्वे मानाभावात् दैवात्प्रथमं तद्धर्मनतपदविशेषशक्तिग्रहेतस्य हेतुत्वं तेन वि
नापि तत्संभवात् न च प्राथमिकत्वेन बलवत्वं व्यभिचारात् नापि सर्वैः प्रथमप्रतीयमानत्वेन व
लत्वं सर्वैर्बाधर्षीरा हं प्रत्ययेचंद्रतारकापरिमाणस्य सर्वैरन्यग्रहे च व्यभिचारात् अतएव पूर्वक
ल्पनात् कल्पनांतरप्रसंगः स्यादिति निरस्तं यत्रानन्यथासिद्धत्वयोपजीव्यत्वया वा बलवत्वं पूर्व

कल्पनायास्तत्तत्त्वात् किंच प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्पारंपर्योदासीनं कारणत्वमात्रं
गृह्यते न तु विशेषोऽपि उपायस्यान्वयव्यतिरेकादेरुभयाविशेषसाधारणत्वेन तत्संशायक
त्वात् उत्सर्गोऽपि बाधकाभावनिश्चयसहकृतो निश्चायकः न चान्यलभ्यत्वस्य बाधकस्या
भावमापाततः स्वतोऽदर्शनमात्रेणाबालो निश्चेतुमर्हति अतएव प्रामाण्यस्यौत्सर्गिकत्वेऽपि बा
सहकृत धकाभावनिश्चयादेव निश्चयः अन्यथा प्रमाप्रमा वा साक्षात्परंपरया साधनं चेति संशयः का
पि न स्यात् यच्च हर्षहेतूनां बहूनां संभवादित्यादि तन्न स्वतोऽगृहीतहर्षहेतुस्तनपानादे
र्बाधावतारादन्यस्य हर्षहेतोरग्रहात् उपस्थितत्वात् उपपादकत्वाच्च पुत्रजन्मज्ञानस्यैव ह
र्षहेतुत्वेन कल्पनात् अन्यप्रियज्ञानं हर्षकारणं भविष्यतीति शंकायां कथमेवमिति चेत्
एवं तर्हि कार्यान्वितज्ञानेऽपि शक्तिर्न गृह्येत प्रयोज्यज्ञानहेतूनां बहुत्वात् अनन्यथासिद्ध
शब्दानुविधानस्य च कल्प्यत्वादन्यप्रियज्ञानस्याज्ञानाच्च ज्ञानेऽपि वा तदा तदुपस्थितिनियम
मेमानाभावात् संदेहोऽभावोपपत्तेः लिंगाभासजन्यस्तत्कालीयसंपन्नसंवादानुमितिवद्धर्षेणालिं
गे पुत्रजन्मज्ञानानुमानसंभवाच्च न चाभासत्वेनानुमितेर्भ्रमत्वेन तद्धेतुकं शक्तिग्रहोऽभ्रमः विष
यस्य तथाभावेन तयोर्यथार्थत्वात् यथा कश्चित्तटस्थवंसंचाराधिष्ठितेन दारुघटमानयेति नि
युक्ते स वनमानयति तदा वेतनव्यवहारादिवत् तद्दर्शी बालो व्युत्पद्यते ३ यं क्रियाकृतिज
न्या साज्ञानजन्या ज्ञानतद्वाक्यजन्मेत्यनुमितिपरंपराया भ्रमत्वेऽपि न तद्धेतुशक्तिग्रहः
न त्वन्यशाब्दबोधस्य यथार्थ एव विषयस्य तथाभावादिति सिद्धान्तसिद्धार्थे शक्तिग्रह इति
अतएव यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरं अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमित्य

र्थवादोपस्थिते सुखे वेदादेव स्वर्गपदस्य शक्तिग्रहः ननु चंदनादौ सुखोपरागेण स्वर्गपदप्रयोगाद्वेपता
५० दशायां चाप्रयोगात् दुःखमेव शक्यं वक्तुकिंतच यथा यथा साधनतत्तत्कर्मणि सुखमात्रार्थीन प्रवर्तते इ
त्यर्थवादोपस्थिते स्वर्गपदतात्पर्य न चार्थवादस्योपजीव्यत्वात् न तूपनीते तत्र एव शक्तिग्रहः
57 तस्य स्वर्गपदतात्पर्यविषयत्वेना— स्यदत्तोपपत्तेर्न वाच्यत्वाभिधायकत्वं गौरवात् सुखमात्रे
चाप्रयोगादिति शायित्त सुखत्वं वाच्यं प्रयोगोपाधिर्वेति शायः नचातिशायस्य सावधित्वेन चं
दनसुखेऽस्मादयं स्वर्ग इति धीः स्यात् रसादाविवातिशयस्य जातित्वेनावध्यनिरूपणत्वात् अति
•शायपदप्रयोगस्तु इतरसुखानापेक्षा इति ननु विचित्रहेतुसाध्यतया विलक्षणातिशयस्यानेकसु
खानननुगमात् सुखात्वावांतरजातिशायत्वे स्वनुगमेप्यनध्यवसायेन शक्त्यग्रहादप्रवृत्त्यापत्तेः जातेन
सुखत्वावांतरजातेश्च सुखमात्रसाधारणत्वात् प्रयोगोपाधेर्निशाकार्यत्वात् —केवलक्ष
णा ननु दुःखसंभिन्नसुखस्य शक्यत्वे चंदनादौ स्वर्गपदप्रयोगो लक्षणयापि न स्यात् सा निश
यसुखस्य शक्यत्वे तत्संबंधितया चंदनादौ लक्षणा भवति तस्माद्दुःखासंभिन्नत्वादिनाऽप
लक्षि——— खत्वावांतरजातिरेव शक्या लाघवादिति चेत् न एकजातीयहेतुसाध्ये एक
जातिसत्वेपि विलक्षणहेतुसाध्ये स्वर्गे एकजातौ मानाभावात् विहितकर्मजन्यतावत्तत्तद्विशे
षत्वेनैवाननुगतस्यापि जन्यत्वात् छेदकत्वात् म— धमाग्रं बलक्षणा जामि—— द्यते एवदेव
ताः शवपीं इमुपासीनेत्यादौ लोकप्रयोगत्यानियमाज्ञेराणत्येव व्यवहाराद्यार्थानवध्यवसायेलौ
किके सहस्राक्षादौ विंद्रादिपदशक्तिग्रहः प्रमाणाचेंद्रः सहस्राक्ष इत्यादि विधिसमभिव्याहृतो
र्थवाद एव स्वर्गपदवत् अ— स्वर्गपदे प्रवृत्त्यन्यथानुपपत्या तत्सुखं स्वः पदास्पदमिति ज्ञाने

स्वार्थवादादेवप्राप्तिग्रहः नचेहत्र — र्थवादः किंत्विंद्रः सहस्राक्षा — दिस्तावकत्वेनैवप्रवृत्तिपदमिति
चेत्र न इंद्रंसहस्राक्षइत्यादिप्रसिद्धपदसामानाधिकरण्यप्रत्यक्षतिनोर्वाधकंविनासहस्राक्षस्य
वेंद्रादिपदवाच्यत्वावधारणात् प्रसिद्धपदसमन्वयवलेनप्रतीयमानमर्थमवाधित — — — — — श्री
प्रवृत्तिपरत्वात् मंत्रप्रकाशितप्राशिप्रोषेराग्रुषेत्तश्चद्दिश्यहविस्त्यागेनतत्रैवयाज्ञिकानांदेवताव्य
वहारात् आपिच — — — यत्रांदधादित्यादि — देवतासंप्रदानत्वश्रुतेः शिवादिसहस्रनाम्नांपर्या
न्र यत्वेनश्रुतेर्महाजनपरिग्रहेणाप्रमाणा — दाशदि — देवतायावरदा — श्रुतेश्चवाधकंविनाचतत्रैव
देवता अथदेवताचेत्तन्येतत्त्वातिरेकयागव्यापारइत्तिनाहर्वसिद्धिरितिचेत्र न प्रीतेः स्वरवरू
नेदनुभवस्यचापुञ्जरविनाशित्वात् न तज्जन्यसंस्कारस्यरवाविषयेफलहेतुत्वात् फलहेतुस्या
पिहृतिव्यापारापेक्षायांलाघवेनकृतिसमानाश्रयस्यैवव्यापारत्वकल्पनात् नानायागेष्वेकदाक्ता
नेचेकदासन्निधानंनतुष्टिविप्रावलव प्रतिष्ठाविधिनाप्रतिमादावहंकारवत् अयराजस्त्या
दिफलत्वेनश्रुतेरिंद्रादिष्वेतत्वएवदेवतात्वंतत्स्यनात्तिमानाभावात् किंतदेशानादेशितच
तुर्थ्यंतपदनिर्देश्यपत्वंदेवतात्वमितिइंद्रायेत्यादिपदमेवदेवता अत्राग्निशकाप्राकमात्रेणा
ग्निशकाप्रतानंतरमग्नयइतिनियमतो हविस्त्यागेनपर्यायांतरेणा नचेंद्रोद्देशेनहवि
स्त्यागइंद्रनिष्ठकिंचित्तनकः तत्स्वरूपाजनकत्वेसतितदुद्देशेनक्रियमाणत्वात् ब्राह्म
णायदानवदितिवाच्यं अप्रयोजकत्वात् नदर्थत्वेनक्रियमाणत्वस्योपाधित्व — —
— — — त्यत्रनत्तादर्थ्येचतुर्थी किंतुस्वाहादिपदयोगउपपदविभक्तिरेव अन्यथानमः
स्वस्तिस्वाहास्वधेत्यादि — — — — — — — — — — — — — र्थ्यंतपदस्यदेवतात्वेमानाभावात्

 चतुर्थीं विनापि इंद्रो देवतेति व्यवहार दर्शनात् अग्नये कव्य ---------------- द्यश्च
संगात् इंद्रः सहस्राक्ष इत्यर्थवादस्य इंद्रमुपासीतेत्यादिविधिसमभिव्याहारेणैव ---------
--- ताशिवत्वं नाददीतेत ब्रह्महा देवमुद्दिश्यत्यक्तो पि शिष्टानां शिवत्वनेन व्यवहाराच्च अग्नयपर्वति
S8
------------------ सित्तत्वेनत्त्यात्यागस्य फलहेतुत्वात् ----- त्रागादिदेवतात्वा
त् तत्रैवपिशिवादिवदशक्ति व ---------------------- गमात् तद
वृत्तीत्तावपि --- काशित शिशोव धु पेन मुद्दिश्य हविस्त्यागेन तत्रैव --------
-------------------- तदृश्यत्वात् शिवस्य प्रतिमंत्रवीजा
क्षराणां नानात्वादननु ------------------------- नचम्
- तभेदेनाशीवशरीराणामननुगतत्वेन नवापिनशक्ति - ह -- वाच्यं --------
------------------ ने दृष्ट - शेषोपग्रहीतत्वस्य वा नुगतत्वात्
अदृष्ट प्रतन्य -----------------------------
------ हविस्त्यागभागत्वेनोद्देश्यत्वं देवशत्वं हविःसंवधामंत्र ------------ अन्येषां
----------- यक्तिग्रहः यथावध --- ध्वस्तमशक्ति यारा ही वोपानत्
वैतसे कटे प्राजापत्यं साधनं ----------------- नसप्राचः किं कुगुधाय स्वजं वूनां
----- उतदीर्घप्रउकप्रट्कावंजलानामितित्रेष्वार्थ व्यवहार ------------
प्रत्याप्यानिव व्यवसायांत्तत्पदव द्वेदेशामारायानिष्य - व्यवहाराद्युत्पत्तिः सचाविशिष्टः
--------------- व्यावहाराद्युत्पत्तेः - करस्येवचर्मरागका कस्याप्युपानहोः संभवा

त्यनिपूर्वपदेवसानेसर्वसम-----------------शाननीमोदमाना: प्रदश्यन्ते यवा: कनिश
शालिन: चराहंगावोनुधावंति अप्सुजोवेनसइतिवाक्यशेषरूपच--शेषिनीस्ते घशसिद्धि: स्म
तिरिवेदविकग्राहेयेतिनिरस्तायांस्नेच्छप्रसिद्धोनि:प्रतिपत्ताप्येवव्यवहाराच्छक्तिग्रह: ननुवा--
शेषाच्छूकरादिषुतात्पर्यनिश्चयोनशक्तिनिरायि:कामादिसदृशतयाकांगशूकरादौप्रयोगस्यगौराया
दिनापिसंभवादितिचेत् शूकरादौतात्पर्यवत्पात्रेरपिनिश्चयात् तथाहि पद्यप्यनादिप्रयोग
योगितानशक्तिनियता वैदिकगौरापादिनाव्यभिचारात् तथापिशक्तिरनादिप्रयोगानियता अ
नोवकाहशा-स्यानादिप्रयोगयोगिताशक्तिध्वकाके-कल्प्यतेतिदर्शागौरवं शूकरेत्वनादिवे
दसंबंधात्प्रयोगोनादिसिद्धएव शक्तिमात्र-स्यत इतिलाघवमित्यादि---शूकरेशक्तिरे
व अप्यकाकवत शूकरोप्पसदृशाएवसूसदृशास्यगव---: -----कांपंवित्साहश्यंका
का------निचेत् न शूकरयोर्वराहशब्दाद्बुद्धिस्यत्वेऽनयोऽकोवाच्यइति---स्वान्तरो
धात् तयोरन्योन्याये----------इतंगिन्नासमानस्यस्यन्तिविषयइतिनन्निरा--
-----तात्पर्यग्राहकवाकाशेषस्याविनि:-------------पंचित्साहश्यस्यसर्व
त्रसुलभत्वेनतात्पर्यानवधसायादिति इतराज्वितेशक्तिरित्यपिगुड----------
---नशक्ति: ननुव्यवहारादनुमितेइत--चितज्ञानेपदकारणत्वग्रहात्तत्रैवशक्तिग्रहा
ति--------------------तत्यागोहेत्वभावात् --पदार्थमात्रे व्यवहारात्तस्या
नुपस्थिते:उपायांतरात्तदुप-------------भावात् अत्तइतराज्वित----
-ज्ञानशक्तत्वेनज्ञातंपदस्यार्थान्वयानुभावकमित्यन्विताभिधानमितिचेत्-------

ना

काक

त·चि·म· —पदार्थज्ञानोपस्थितौपदार्थज्ञानंविशे मितितदुपस्थितौतस्यापिविषयत्वात् विशिष्टस– श·वि·
५८ तस्य——————————नियमादितितत्रैवशक्तिक——यतिलाघवात् नत्वन्वयांशे
59 पिगौरवात् अस्तुवाशक्यसम्बि——————————स्यागः अन्यलभ्यत्व
——भ्यनात् अनन्यलभ्यस्यैव र्थत्वात् शक्यमगहीनमा——————————— शब्दा
————तस्मात्सर्वैः शक्यमंव्यवहाराद्दुपस्थितेकार्यान्वितज्ञाने अन्वितज्ञानेवापदकार
तत्र: रान्वयग्रहा शक्ति————————————न्यैलभ्यत्वप्रतिसंधानेपिनतत्यागः
——कल्पनाविपरीतत्वादित्यपिरव——या———————————न्वेतरपदल
भ्यत्वेनतथ्यानत्वेवमन्वये त—तरपदाशक्यत्वात् शाक्यत्वेवा——दादिति———
————————तज्ञातंपदंस्वार्थस्मरणद्वाराकांक्षादिसहकारवशा————व्याह
तपदार्थेनसहस्वार्थ————यंमनुभावयतिस्वभावादित्यतत्यैवान्वयज्ञानलाभात् किं
रात——————य———कावपिवयाविशेषज्ञानार्थमाकांक्षा—रवश्यंमपेक्षणात्
त्रि याकारकपदयोः अन्येक——————————र्थबोधकत्वेवाक्यार्थद्वयधीप्रसंगात्
नचैकमेवान्विताभिधायकं इतरत्तु प्रतियोगिसारकमितिवाच्यं अविशेषात् अशाक्या
न्वयानुभवेऽतिप्रसंगात् अन्वयेपिशक्तिरितिचेत् न अशाक्यमपिहिशक्यान्वयंबोधय
तिनान्यं शक्यान्वयत्वस्यस्वरूपसतोनियामकत्वात् अन्यथातवापिअप्रतीकारात् नन्वे
वंपदानामन्वितज्ञानजनकत्वोत्तत्रशक्तिरस्त्येव अशक्तस्याजनकत्वात् नचापिपदाद
न्वयबोधइतीष्यरेष्टासत्वात् इतिचेत् सत्यं किंत्वन्वयबोधेसतीसाध्याघ्रियते नतुज्ञाना स्वरूप

८
घटज्ञानशक्तत्वेनज्ञानादेवघटान्वयबोधोपपत्तेः यथातवजातिशक्तपदस्यात्मव्यक्तिज्ञाने
इष्टंचज्ञानकरणोसामान्यसंबन्धतयाज्ञातस्यापिविशेषबुद्ध्युपायत्वं यथावन्हिसामान्य
व्याप्ततयागृहीतधूमस्यवह्निविशेषबुद्धिजनकत्वं अथघटज्ञानत्वंमित्तसान्वितघटज्ञानेप्यस्ती
तिनेनरूपेणान्वितघटज्ञानेपिज्ञानापत्तिर्व्याप्रियतइतिचेत् सत्यं किंतुघटज्ञानत्वंश
क्यतावच्छेदकमन्वान्वितघटज्ञानत्वंगौरवात् अन्यलभ्यत्वाच्च एवंचजातिवाचकपदस्य
व्यक्तानिवेकैवशक्तिरन्वयांशेस्वरूपसत्पदार्थांशेज्ञाताव्याप्रियते जातिव्यक्त्योःस्वसा
स्वचित्तसंवेद्यत्वात् तथा घटज्ञानादिकंतुनान्वयविषयतानियतं स्मरणोव्यभि[illegible]दि चारा
न्निचेत् घटानुभवविशेषंप्रतिघटपदत्वेनकारणतासतःशाब्दानुभवोन्वयविषयता
नियतएवकेवलेस्यशब्देनाननुभवात् स्मरणंचप्रतिपदत्वेनजनकता व्यभिचारा
त् --संबंधितयाज्ञातत्वेन स्यादेतत् अन्वयतात्पर्यकतयाततत्प्रतिपादकंपदमिता
विवादं तात्पर्यनिर्वाहिकावृत्तिःसाचेन्नगौणी नवालक्षणेतिशक्तिः अथान्व
येलक्षणैवस्वार्थसंबंधिनितात्पर्यात् पदार्थोपस्थितउनंतरंतदन्वयोपपत्तेश्चनच व
त्तिद्वयविरोधः अन्वयांविशेषणतयापदार्थोपस्थितेः नचलाक्षणिकानामन्वयाननुभावात्
अन्वयानुभवः कथमितिवाच्यं पदार्थस्मरणादन्वयेशा[illegible]त्वाच्च पदानांशक्तयाननु क्ते=
भावकत्वयासर्वत्रलाक्षणिकस्यैवानुभावकत्वादिति तन्न वृत्तिर्हिजातौपयुज्यते नरूपसत्ती
अतिप्रसंगात् नचलस्वार्थसंबंधितयान्वयःशाब्दवतोवाक्यार्थस्यापूर्वत्वात् किंचशाक्य
र्थपदा संबंधितयान्वयेलक्षणार्थेशक्तिकल्पनांवरंलाघवादन्वयेशक्तिरस्तुकिंवृत्तिद्वयकल्पनया
त

60
एवंस्थितेप्रयोगोपि अन्वयः पदशक्यः अन्यलभ्यत्वं विनापदप्रतिपाद्यत्वात् पदार्थवदिति उ
च्यते वृत्तिविनापितात्पर्यनिर्वाहात् किंवृत्त्या पदानामेककमेणान्वयबोधजनकत्वसंभवा
त् अन्यथाऽशक्यात्तात्पर्यनिर्वाहोदृष्ट इतिलक्षणोच्छेदः अथशक्तिविनापिशक्यसंबंधा
त्तन्निर्वाह इतिनतत्रशक्तिः तर्हिवृत्तिविनापितन्निर्वाह इतिकिंवृत्त्या अतएवानुमानमप्र
योजकं अन्यथापदप्रतिपाद्यत्वादेवशक्तिसाधनेवृत्त्यन्तरोच्छेदः अतएवधूमोस्तीत्य
त्रधूमपदस्यवन्हिपरत्वेपिवन्हौनलक्षणा शक्त्याधूमोपस्थितावनुमानद्वारात्तत्प्रतीतिसं
भवात् तथागच्छगच्छसिचेत्कांतपंथानःसंतुतेशिवाः ममापिजन्मतत्रैवभूयाद्यत्रगतोभ
वान् नितिवाक्यस्यमागाइत्यत्रतात्पर्येपिनलक्षणा गमनस्यप्रियामरणहेतुत्वंहि वाक्या
र्थः ततोगमनंमयानकर्तव्यंप्रियामरणहेतुत्वादित्यनुमानादेवगमनेऽकर्तव्यताबोध
नेनतात्पर्यनिर्वाहात् यत्रहिशब्दयासाक्षात्परंपरयावानतात्पर्यनिर्वृत्ति तत्रनलक्षणा ह
ननुघटमानयेत्यत्रघटत्वैकमन्वयविशेषजिज्ञासाभवति नचसामान्यांनचयमेवविशे
षेस्यादित्यन्वयसामान्येशक्तिरितिचेत् न कारकेनाक्रिययाचक्रियाकारकसामा
न्याक्षेपात् तदुपपत्तेः इष्टफलादौरसविशेषजिज्ञासानत् एतेनयदुक्तमन्वितपदार्थेष्वि
मैकैवशक्तिः तवत्वेकापदार्थेऽपरात्वन्वयइतिनिरस्तं अन्वयशक्त्यभावात् नचैवमन्वा
यानुभवेपदविनियोगोनस्यादितिवाच्यं अन्वयानुभवार्थमेवपदार्थपदानांशक्तिकल्प
नात् तस्मात्पदंकरणंपदार्थस्मरणंव्यापारः आकांक्षादिसहकारात्स्मारितान्वया
नुभवःफलं स्मरणंनव्यवधायकं व्यापारत्वात् नचस्मरणद्वारापदार्थएवकरणं
पदार्थ

तस्यानागतत्वादिनास्य स्मरणेऽन्वयानुभवोद्बोधाजनकत्वात् तथापि पदार्थस्मरणमेव करण
मस्तु आवश्यकत्वात् अत एव चिंतावशोपस्थितपदार्थानामन्वयबोधात् काव्यादिरि
तिचेत् न स्मरणस्य निर्व्यापारत्वेनाकरणत्वात् अनन्यथासिद्धान्वयव्यतिरेकाभ्या
माकांक्षादिमत्पदस्यान्वयानुभवविशेषे कारणत्वात् पदार्थस्योपस्थितेः संसर्गधीः
मात्रहेतुत्वेपि शाब्दसंसर्गधीविशेषे पदस्यैव हेतुत्वात् गौः कर्मत्वमानयनमित्यत्र प
दार्थज्ञानेप्यन्वयज्ञानानुदयात् -दविशेषोपस्थितपदार्थज्ञानस्य हेतुत्वे पदविशेष
स्यैवावश्यकत्वेन हेतुत्वाच्च काव्यस्थले पदार्थज्ञानव्यापारकमुत्प्रेक्षादिसहकृतं मनए
यथा वानुभवकरणं न चैवमुत्प्रेक्षायाः पृथक्प्रमाणत्वं व्याभिचारिजातीयतया लिंगादावितप्र
माकरणत्वावच्छेदकानतिप्रसक्तानुगतरूपाभावात् -व्यापारत्वाच्च किंतु प्रमाणस
हकारिणाः सा अत एव मानसे लिंगपरामर्शे व्याप्तिस्मृत्यादि न पृथक्प्रमाणं पदमंतरेणा ण।अ॰
पियोग्यताज्ञानेऽन्वयबोधो भवति अतः पदार्थस्मरणमेव पदानामुपक्षयः तदुक्तं प्र
श्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः खुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीरितिचे
त् सत्यं प्रयोजकवाक्योच्चारणानंतरं प्रयोज्यव्यापारदर्शनात् अन्वितज्ञानोपपत्त्यर्थं
पदस्यैव शक्तिः कल्प्यते अध्यमनस्तस्यैव कारणत्वात् पदार्थे शक्त्यंतरकल्पने गौरवा (वधारणा
त् न दोषः आध्यस्यादभिभात् त्यातात्पर्यापगमादपि पदानामेव सा शक्तिर्वरमभ्युप
गम्यतामिति श्वेतोऽश्वो धावतीति धीश्चालिंगजा पदस्य तु तत्कारणस्याभावादिति एवं
पदार्थमात्रे शक्तौ पदार्थो निरूप्यते तत्र शक्याकारः व्यापानयनादिव्यवहाराद्यत्तावशक्ति

61

रुचिन्नात्तथाप्य -- व्यभिचाराभ्यामत्र न शक्तिग्रहः समुच्चयेन शक्यत्वे गां दद्यादित्यादौ सर्वोपाद
नासामर्थ्यात् एवं तत्र शक्यत्वे -- वसायः न च गो व्यक्तिमात्रमर्थः मात्रशब्दस्य सर्वार्थत्वे उक्त
दोषात् सामान्यार्थत्वे व्यक्तेरप्रतीतिः नानार्थत्वे च सर्वा सां ग्रहत्यैकं ज्ञात्मशक्यत्वं शक्तौ चा
शक्ये च गौरवं अरुष्टीयां गवि व्यवहाराभावश्च नापि गोत्वेनोपलक्षिता व्यक्तिः शक्या धेनुप
दवत् अतो न शक्यानंत्यं न व्यभिचारो न सर्वाग्रहो न नानार्थत्वं गोत्वे वस्तो सामैक्यादिति वाच्यं
रूपान्तरेण विज्ञातमन्येन रूपेण हि उपलक्ष्यते यथा काकेन गृहविशेषो गोत्वे न धान
कर्मविशेषः स्यन्तो विलक्षणाः नेतु काकाद्याकारेरो वनत्प्रतीतिः न च व्यक्तीनां जातिवि
ना रूपान्तरमेकमस्ति सा यत्ने वारोपदात् गौरित्येव प्रतीतेः गोत्वविशिष्टे च कार्यान्वा
या गोत्वं विशेषणं नोपलक्षणं तदन्ये त्वकार्यान्वये उपलक्षणं यथार्थवान् स्वी देवदत्तश
ब्दवाच्य इत्यत्र वासः न च गोत्वैकत्वेन व्यक्तीनां एकत्वं क्रियते अशक्यत्वात् न त्वाप्यत्ते अ
सत्त्वात् न च तदेकत्वमेकव्यक्तेरेकत्वं असंभवात् नापि व्यक्तिशक्या गोत्वमवच्छेदकं का
रणत्वे दंडत्ववत् एवं हि गोः पात् न गोत्वविशिष्टबुद्धिः स्यात् शक्तिग्रहाहि नसंस्कारम
चिवाङ्गोपदादेव धेनुपदादिव गोत्वविशिष्ट ---- बोधश्च न तद्देवपरंपरासंबंधादि
ति चेत् तत्र हि धान कर्म विशेषस्यावश्यकत्वं तु गमाय गोत्वमवच्छेदकम -- इचेपरीत्यं
गोत्वस्य वृषभेपि सत्त्वात् इहतु व्यक्तिरपि तयाति प्रसक्तो निजाति विशिष्टैव साशक्यास्या
त् व्यक्तनत्व जातेः शक्योपलक्षणत्वे शक्यावच्छेदकत्वे वा ज्ञावशक्यत्वात् लाघवाच्च आ
तेरेव शक्यात्वात् न व्यक्तिः धेनुपदे तु गोत्वं न तत्प्या ताघसंगात् अ त्ता हि जातिविशि

ष्टंशाब्दंस्वव्यवहारेशास्वहेतृतयाजातिविशिष्टज्ञानस्यावश्यमित्तित्वादिति चेत् न विशेष्यभे
दाद्विशिष्टानामनेकत्वे व्यक्तिवाच्यत्वाभ्यदोषप्रासात् विशेषणस्यैक्येन विशिष्टानामैक्यस्यो
पलक्षणापत्तवदृष्यत्वात् तस्माद्व्यक्तेरपदार्थत्वेजातिरेवपदार्थः वस्तुतस्तुव्यक्तौजातिरनु
गमिकाविशेषिकावावश्यवाच्यावेतिनागृहीतविशेषणान्यायेनसैववाच्या अत एवजातावपि
पिव्यक्तिरेवविशेषाधर्मान्तराभावात् यवेत्तरावृत्तित्वेसतिसकलगोवृत्तित्वादेरुपाधेरपिव्यक्तिघ
टितत्वात् नागृहीतविशेषणान्यायेव्यक्तावपि इत्यु--यमपिवाच्यमिति न जातेः स्वत एवव्याव
त्तत्वात् अन्यथाजातिव्यक्त्योर्व्यावृत्त्यान्योन्यज्ञानादन्योन्यव्यावृत्तत्वेऽन्योन्याश्रयः स्वतो
व्यावृत्तत्वंचनस्वयमेवस्वव्यावर्तकत्वं स्वस्मिन् स्वावृत्तेः नापिव्यावर्तकंविनैवव्यावृत्तत्वसंभ
वात् किंस्वाश्रयवत् स्वात्मनिव्यावृत्तधीजनकत्वंस्वभावत्वं परेषांमन्यविशेषवत् व्याव
क र्त्तधर्मोविधर्मान्तरादेवव्यावृत्तत्वात्तत्रनवस्थाप्यात् अत एव किंविद्धिस्वत एवाविलक्षणा वस्तु
मित्याहुः --तवाव्यक्त्याव्यावृत्तत्वेनयावोधिताजातिरेवपदार्थोलाघवात् न सैवैपरीत्यंउभ
यंवा गौरवात् कुतस्तर्हिव्यक्तिधीःजातिशक्तादेव कथमन्यशक्तावन्यधीः स्वभावात्
तत्स्वभावत्वमेवव्यक्तिशक्तिंविनानिर्वहतीति चेत् न गोपदंहिनियमतोजातिव्यक्ति
वोधयति तत्रास्यजातिशक्तिधीरेवसहकारिणीकल्प्यतेलाघवादावश्यकत्वाच्च नतुव्य
क्तिशक्तिधीरपि गौरवात् जातिशक्तिज्ञानेसत्यपिनाविनाव्यक्तिवोधेविलंवैभावात्
यथानचपदार्थशक्तादेवा न यधीः यथाजातिशक्तमेवपदंव्यक्तिंवोधयति अत्राशक्यते
पिजात्याश्रयत्वस्यनत्याप्तकल्पनेगौरवादिति चेत् अन्यलभ्यस्यापदार्थत्वात् अन्यथा
तियामकं यथाघ्रमापिसाधीश्वयंवोधयाति तत्रघयोजकत्वेनलक्षणशक्तिरेवास्तुजात्याश्रयत्व पं. ५३

न्वयोपि शक्यः स्यात् लक्षणा घृष्ठेदश्च अपवा जातिशक्तिज्ञानाज्जातिधीर्भवन्ती व्यक्तिमपि ८
गो---- व्यक्तिं विनाजानेऽभावात् योयेन विना न भासते तेन धीहेतुस्तमपि बोधयति यथा ज्ञा
नधीहेतुस्तद्विषयं यथा वा सवाधिकरणसिद्धान्ते ज्ञानादिनित्यत्वं अन्यथा पदं जातिमपि न बो
धयेत् केवलायास्तत्प्रतीतेः तथा च जातिशक्तिकल्पना गौरववैयर्थ्यं तस्माज्जातिज्ञानार्थ ८
क्लृप्ता शक्तिर्व्यक्तिमपि बोधयति एकवित्तिवेद्यत्वनियमात् एतेनैकवित्तिवेद्यतैव व्यक्तिशक्तिं
विना न स्यात् ज्ञापकाभावात् नहि व्यक्तिज्ञानमहेतुकं जातिहेतुकं वा सर्वासत्तनन्तत्वप्रसंगा
त् नापि जातिधीहेतुकं संविदैक्यापत्तेरिति निरस्तं जातिशक्तेरेव व्यक्तिज्ञापकत्वात् ननु गा
तिं विना प्रत्यक्षादिना व्यक्तिज्ञानादन्यैव व्यक्तिधीसामग्री जातिविशिष्टज्ञाने चोभयज्ञापकसा
मग्रीद्वयसमाजादावश्यं अत एव व्यक्तिं विना जातेरस्मरणेन जातिस्मरणस्य व्यक्तिविषयत्व८
नियमात् जातिज्ञापकमात्रमेव व्यक्तिज्ञापकं कल्प्यते सामान्यकल्पनायां बाधकाभावादिति
निरस्तं जातिं विनापि व्यक्तिस्मरणात् तत्रान्यैव सामग्री जातिविशिष्टस्मरणं चोभयांशस्मा
रकसमाजादिति अत्र ब्रूमः जातिव्यक्तिप्रत्यक्षादिबोधे तथैव सामग्रीद्वयस्य नियमन्वय
व्यतिरेकग्रहात् शाब्दे तु व्यक्तिबोधे जातिशक्तिज्ञानमेव हेतुर्लाघवात् न सामग्र्यन्तरं त
त्त्वे तेन विना विलम्बाभावात् एवं च जातिशक्तत्वेन ज्ञानं पदं जातिविशिष्टस्य स्मारकम
नुभावकं च ननु ज्ञाने शक्तिः शक्यत्वात् तथा च यस्य ज्ञानं शक्तिः न घटकं जातिव्यक्ति
ज्ञाने च शक्तिरिति जातिवद्व्यक्तिरपि शक्येति चेत् न यद्विशेषणं ज्ञानं ज्ञाने शक्ति - पयु तथाहि
ज्यते तत्र शक्तिज्ञाने विषयतया शक्यत्वावच्छेदकं शक्यं जातिज्ञानं च शक्यमिति जा

देवदत्तवाक्यं तद्व्यक्तिजातित्ववच्छेदकं गौरवात् नच शाक्यज्ञाने नियतविषयत्वमेवच्छेदकं
शाक्यत्वं व्यवहारान्तमित्त शाक्यानुभवविषयारणामन्वय—संबंधिभितिमात्रस्यामविश
मत्वापत्तेः एवंच जातिव्यक्तिजनकत्वादुभयत्रापि शाब्दशक्तिः जात्यंशेसा ज्ञातव्यक्त्यं
शेस्वरूपसतीहेतुः लाघवादितिकुजपशक्तिवादः एवं सैवन देवदत्तेनैवज्ञाताऽज्ञाताचवा ज्ञाने
चिकाश्चवाचिकावेत्यत्र जातिव्यक्त्यवच्छेदभेदेनाविरोधः त्वयाप्यन्वयेकत्रशक्तिस्वीका
रात् व्यक्तेःशाक्यत्वेपिज्ञातशक्तिशब्दजनितज्ञानविषयत्वं तद्वत्त्वं वाच्यत्वं नास्ति नचैवं
परिभाषा शाब्दजन्यज्ञानविषयत्वेनवाच्यत्वेलाक्षणिकादेरपिवाच्यत्वापत्तेः व्यक्तेःश
क्यत्वेपिव्यक्तिशक्तिज्ञानंनकारणं व्यक्तिज्ञानत्वव—च्छेदकमितिलाघवं यत्तनछ
दर्शनाद क्तत्वेनज्ञातादेवनदर्थबोधः शक्तिभ्रमादपिधीसंभवात् न—योग्यतायन्वयानुपपत्ती
विनापदादुपस्थितिःशक्तिसाध्येतिव्यक्तिरपिशक्येति तन्न—येशक्तेरकल्पनात् अ
न्यथातवान्वयेपिशक्तिःतद्वत्ताच्छेदश्च नन्वनजातिरर्थः—वद्वाराभावेनव्युत्पत्तेर
सिद्धेः कारकोपरक्ताक्रियाहि व्यवहारगोचरः जातिश्चनक्रिया नित्यत्वात् नकारकक
र्त्रादि क्रियायास्तत्रासमवायात् क्रियाफलभागित्वाभावात् कर्तृव्यापारानाश्रयत्वात्
अवेतनत्वात्—संयोगविभागाभावात् क्रियानाधारत्वाच्चेतिचेत् न व्यक्तिव्यवहारादे
वोक्तन्यायेनजातौशक्तिग्रहात् जातिसविकल्पकात् व्यावर्त्ततया ज्ञातायांव्यक्तौक्रिया
न्वयः सविकल्पकंरा—त्वनद्वाराज्ञातिजन्यमितिपरंपरयाजातेरपिकारकत्वेनान्वयः य
धानकेनतायाव्यक्तेकारकत्वं नहि गौर्गच्छतीत्यतो व्यक्तिमात्रंयातीति कस्यचित्प्रतीतेः

त॰चि॰म॰ किं—जातिविशिष्टायाः तथाचोभयमपिकारकं श्लोकस्तु केवलजातिव्यक्त्योरकारक श॰वि॰
६३ त्वात् क्रिया ——————— यतयाजातेरवच्छेदकतयाऽऽरुण्यादिवत् एवंचजातिश
क्यपदोऽर्थात्तिरनुभवःशाब्दोव्यक्तेरौपादानिके ——————— येतुजातिशक्त
63 मेवपदंजातिव्यक्त्योःस्मारकमनुभावकंचेति व्यक्तेरपिश—त्वं नचवृत्तिंविनाऽन्वय—
———————:शाब्दत्वं वृत्तिविनाप्येकवित्तिवेद्यत्वनियमेनजातिशक्त्यादे
वव्यक्तेरनुभवात् अन्यथाजात्यन्वयो ——————— विनाजातेरनुनुभवा
त् अतएवजातिशक्तिरेवव्यक्तिंबोधयतीतिगुरवः किंचशक्त्योपस्थापितयानु
भवयतिपदान्तरंकारणत्वं अतोजातिवदुपस्थापितायाव्यक्तेरपिअनुभवःपदात्
ननुतच्छक्त्योपस्थापितन—— गौरवात् नचैवमशक्यपरत्वेलक्षणा यथा—— एव
ज्ञानान्नशक्तिः तथालक्षणापिन तत्किमशक्योऽसत्व्यःप्रयोगः सत्यं शक्त्यासाक्षा
दुपस्थितएवतस्यगुरव्यत्वात् स्वशक्तानित्वाधिकं वस्तुतस्तु जातिशक्त्यादेवव्यक्ति
धीसंभवात् नव्यक्तौशक्तिः यदिचततोनधीः तदातत्रशक्तिर्वस्यात् अन्यथात त
१८= धीर्नस्यादेव ननु जातिभ्यामप्येकोजातिवा नुभवःक्रियते तत्रजात्यंशोपदस्य व त्य=
त्यांशोजातेरनुभावकत्वमयमेवोपादानार्थइतिचेत् नर्हिजातेःकाभरणत्वापेक्षया
शक्तिज्ञानेऽनुपस्थितव्यक्तेरवच्छेदकत्वमात्रकल्पनेवलघीयसीजातिश्चप्रमाणांतरं नापा
तः अतएवव्रीहीनवहन्तीत्यादौव्यक्तौनलक्षणा तत्साध्योपस्थितेर्जातिशक्तित एव
सिद्धेः ——इवागवावच्छेदकत्वेनारुण्यादिवत् व्रीहित्वेप्यवघातान्वय इति यत्नोच्यते

---- ज्ञाने गोज्ञाने - शक्तं पदमित्याकारः शक्तिः ग्रहः तथा च शक्यज्ञाने विषयतया जातेर
वच्छेदकत्वं व्यक्तिमादायैव प्रतीयते केवलायाः व्यक्तिं विना जातेर प्रतीतेः - एवं जातेरवच्छे
दकत्वेनानागृहीतविशेषणान्यायेन व्यक्तेरवच्छेदकत्वं च -- प्रतिशक्यज्ञाने विषयतयावच्छे
दकत्वात् जातिवत्तस्यापि शक्या तस्मात् परिहरैकवित्तिवेद्यत्वान्नेयमं स्वीकृत्य व्यक्तेर्वा --- तं
-------- तया ज्ञात एव यत्र यस्य ज्ञानं सत् तत्राव च्छेदकः व्यक्तिज्ञानत्वेन ज्ञान एव तत्र
ज्ञाने शक्तिधारि ---------------- तन्त्याद्य व्युत्पत्तौ वित्तिमात्र विषय ज्ञात एव ज्ञा त्वेनः
ने प्रवर्तकत्वं ज्ञातं भवतयोर्ज्ञानं प्रवर्तकं ज्ञानो ---------------- वर्तकत्वेनामि
त्तिमात्र ज्ञानमपि प्रयोज्यस्यानुमायवालस्तत्रापि गृह्णीयात् एवं तत्रापि कार्यी -----
--- कस्यात् तत्वेन ज्ञान एव ज्ञाने शक्तिग्रहादिति चेन्न वित्तिमात्र ज्ञानत्वं कार्यीत्वित ज्ञा
क नत्वं च विनापि प्रवर्तज्ञान घटज्ञानत्वादिकं ज्ञातुं शक्यमिति न तयोरवच्छेदकत्वं किंतु घट
ज्ञानत्वादिकमेव लाघवात् तयोरपि तत्र एव --- च्च किंच पदस्य व्यक्तिज्ञानार्थं शक्यं जाते
विषयतया व्यक्तेरवच्छेदकत्वमात्रं कल्पयति लाघवात् जातिविषयत्व व व्यक्तिविषय
त्वस्य ज्ञानवित्तिवेद्यत्वेनावश्यं शीघ्रोपस्थितत्वात् न तु जातेः शक्तिं तद्बोधंकारस्ता - रेवा
तद्बोधकं: [illegible]त्वं गौरवात् --- ग्रहकाले कल्पनीयोपस्थितिकत्वाच्च अन्यत्र व्यवहारानुमि प्रथमं
नव्यक्तिज्ञाने शक्यानुविधाना --- शक्त ---------------- जातिज्ञाने व्यवहारजनक
त्वेन तदा तस्यानुपस्थितेः पश्चाच्छक्तेर्व्यावृत्त्यर्थं मन्तुगमार्थं ----------------
--- तरेण तात्त्वा जातिज्ञानेपि तत्पदस्य कारणतां प्रत्येति तथा च व्यक्तिशक्तिज्ञानमपि

त॰वि॰म॰ कारणानु जगन्न शक्ति --- नान्यथासिद्धिः व्यक्तिज्ञानकारणतानामुपजीव्यजातिज्ञानकारणता शा॰वि॰
६४ ताग्रह इति उपजीव्यविरोधात् एतेन जातिरेव शक्या लाघवात् शक्तिग्रहजन्यसंस्कारस्य
व्यक्तिविषयत्वनियमेन पदाज्जातिस्मरणानुत्पद्यमानमवरं वे व्यक्तिविषयं संस्कारस्य
६५ नियतोद्बोधकत्वेपि जात्यंशोद्बोधकादेव व्यक्त्यंशोद्बोधानिर्[redacted]मकल्पना यथा पदेजाघट
संस्कारादेव नियता शक्तिस्मृतिः पदविनापि च सर्वा जातिस्मृतिर्व्यक्तिविषया अन्यथा
केवलजातिस्मरणापत्तेः संस्कारसहितास्पदादेव जातिविशिष्टानुभवोपि इंद्रियादि
वद्वृत्यभिज्ञा अत एव भाष्यं संस्कारशाद्बशक्तिभ्यां विशिष्टानुभव इत्यतमपास्तं उक्तं । स्तुवीत ॥
व्यायैर्जाति वद्व्यक्तेरपि शक्यत्वात् विशिष्टानामा --- व्येन्वे इत्र विशिष्टेन तस्यांविता यगो
त्वमादाय गोत्वविशिष्टं शक्यमिति शक्तिग्रहः यथा क्वचिदेव धूमे धूमो वह्निव्याप्य इति ^
बुद्धिः यथा वा तत्वैव कार्यीणामानं त्योपि क्वचित्कार्यैकत्वं तत्स्यादि --- कृतिमादाय धर्म
शि कार्यं शक्यमिति लिङ्गादेरष्यर्थशक्तिग्रहः अवच्छेदकैक्याच्छक्तेरेकत्वं तद्वदेव यथा
व्यव -------------- ना॰ अथवा गोत्वेन सामान्यलक्षणया ज्ञाने सर्वत्र गवि गोत्व
५ मादाय शक्तिग्रहः घ ------------------- त्वमिष्यत एव --- तेन घटत्वा
दिसर्व प्रकारकज्ञानवत्त्वेनासर्वैकोदासीनन गोः शक्यत्वायत्किंचित् ------- गाहा । दा
पादानात् नोपादानाच्छक्यत्वमेकोपादानेऽनध्यवसायो वा अन्यथा न वाच्येक वेत्तिवे
यतया पूर्वकपरत्वे उक्तदोषेकागतिः कावागति र्व्यक्तिवाचकपथ्यादिपदानां भट्ट
--- नु जातिरेव शक्या लाघवात् व्यक्तिस्त्वाक्षेपलभ्या ननु नाक्षेपः एको वित्तिवेद्यता

नयोः समानानोहिभावः सामान्यंसमानांव्यक्तिंविनानभासत इतिचेत् न स्वरूपेणाकाराः
जातिः नचसामान्यत्वंतस्याःस्वरूपंतद्धर्मत्वात् ------ लोचनेपिसानभासेत कथंसामा
न्यत्वेनाव ---- जातिर्व्यक्तितोभिन्नतयाशक्ये - भिधीधानव्येतिचेत् न शब्दे ------
---------- वोधवात् ननुव्याकृता ---- वाच्याव्यावृत्तबुद्धिंविनाव्यक्तिविशेषानाप्रात् दे
व्या -------------------- गतत्वमप्य --- यमा - विनानभासत इतिजाति
वि --- दोवव्यात्तिरितिचेत् न स्वतो ---------------------------
-- मात्रस्यवाच्यावृत्तिकत्वेऽन्योन्याश्रयः अनवस्थावा ननुगोरिति ---------
------------------- त्मकालभेदाग्रहात्साश्रांता वाधकाभावात् नचाचगो
पदाजोत्व ची ------------------------- ततोव्यत्तयनुमितिरिति ज्ञानपरं
कः परयोस्यनाद्यरंजातिवित्तिवेद्यत्वंव ------------------- हिशब्दस्यवोधकत्व
अतोव्युत्पत्तिपर्यारलोचनयायुगपत्ज्ञानमसिद्धं अतएव ------- कल्पन ------
- अन्यथाकर्तृनप्यादोषेनस्यात् शब्दात्मकर्तृका -- एवक्रियाया - वगमात् नच
ज ------ त्वेनव्यक्तिविषयत्वानियमः व्रत्यक्तादौतस्यव्यक्तिधीहेतुसमाजा - नत्वा
त् अतएवनजातिधीहेतो ------ धीहेतुसहकारितानियमः समाजस्यार्थसिद्धत्वात्
गोत्वंगवाविषय - तीतिविषयःजातित्वात् -------- त्वा ------ मात्रंधीसिद्धेश्च
अप्ययद्यत्परतंत्रं तत्तेनैकावित्तिवेद्यंत्वंयथार्थपरतंत्रज्ञान ------------------
----- व्यक्तौभासमानायामेवभासत इति चेत् न परतंत्रत्वंहिन परसमवेतत्वं चंप

त·चि·म· कादिस्तद्वत्सभगतिष्ठ गंध ------------------------- प्रसिद्धेः न ि शा·वि·
६५ त्, स्मिन् भासमान एव भासमानत्वं सा ध्याविशेषणत्व ---------------------
65 ------------------ नीति: -- विगोत्वमित्तिकश्चित्प्रत्ये ीति चेत् अयलोच्यते
विशेषणत्वं विना ----------------------------------- त्वात् जातेः
स्मरणमालोचन --- जाति विशिष्टगोचर संस्कार ---------------------- ति
जातिमात्रस्मरणात् अत एव ततोजातिं वि नापि --- चिर व्यक्तिस्मृतिः अस्तु वा
--------- नमपि संस्कार जा --- शब्दव्युत्पत्ति --- नजातिमात्रस्मरणा --:
न च स्मरणस्य विशिष्टस्य नत्वमेव अनुभवस्यापि तथात्वे निर्विकल्पकासिद्धिप्रसंगा
त् एकवित्तिवेद्यत्वेपि प्रथमदर्शनवत् शाब्दज्ञोत्व स्मरणमालोचनमेव गोत्वे गोव्या
क्ति यत्तित्व वैशिष्ट्यस्या शक्यत्वेन तदविषयत्वात् न चालोचनस्येंद्रियजन्यत्वान्न स्मृ
तित्वं ज्ञानत्वसाक्षाद्व्याप्यधर्मत्वेन स्मृतित्वस्यालोचनवृत्तित्वात् नन्वदोषात् व्यक्तिधी
र्व्यक्तित्वेन न चारूपांतरेण गौरित्येव प्रतीतेः नापि गोत्वेन गोत्वस्य गोत्वविशिष्ट
भेदेनाक्षेपा- वादितिचेत् न विशेषणविशेष्ययोर्भेदेनानुमानाविरोधात् अत एव
गोत्वं व्यक्त्याश्रितं जातित्वादिति पक्षधर्मताबलात् त्वाध्ययव्यक्तिसिद्धिः -- पत्तेर्वात
त्सिद्धिः नत्वव्यक्त्या विना किमनुपपन्नं व्यक्तिं विनापि गोत्वस्यातद्वृत्तेश्चासिद्धेः कथम
र्थापत्तिरितिरितिचेत् न व्यापकं विना व्याप्यस्यासिद्धेः उच्यते गामानयेत्युक्ते गोत्व
विशिष्टस्य क्रियान्वयबोधात् गौरित्याकारको विशेष्याबुद्धिः कारणं सा च न शाब्दं

विना आक्षेपाद्व्यक्त्याश्रितं गोत्वमिति धीर्न तु गौरिति नचैवं व्यक्तेः क्रियान्वयोपि गो
त्वाश्रितत्तया निराकांक्षत्वात् राजपुरुषमानयेत्यत्रेव राज्ञः अन्वये वा व्यक्तिमानयेति
धीः स्यात् न तु गामिति किंच गोत्वं न व्यक्तिव्याप्यं नहि यत्र यदा या गोत्वं तत्र तदा वा गो
पत्नीत्वं ता व्यक्तिरिति वान्नियमो व्यभिचारात् नापि गोत्वं गवाश्रितं गोत्वादित्यनुमितिः व्याप्ति
ग्रहशरीरत्वात् न च जातित्वं व्यक्त्याश्रितत्वे लिंगं जातित्वस्य पदादनुपस्थितेः तत्पत्वे वा जाति
विशिष्टैव व्यक्तिः अपि च लिंगमनुपपन्नं च तथाश्रयेव्यापकमुपपादकं च बोधयति नचैवं गो
त्वाश्रये व्यक्तिबुद्धिः वयं तु ब्रूमः व्यक्तेरपदार्थत्वे विभक्त्यर्थसंख्याकर्मत्वादेर्व्यक्तावनन्व
यस्यात् रूपविभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् प्रकृतितात्प
र्यविषयेन तदन्वयव्युत्पत्तौ लक्षणोच्छेदात् गोरवं च आख्यातसंख्यापि नानुमितेर्नान्वेति
किं तु भावनान्वयिनीत्युक्तं न प्रथमान्तादुपस्थितेन पदान्तरादुपस्थितिरेव तत्रा[illegible]र्थः क्षेपा
[illegible] एव न व्यक्तेराक्षेपः किं तु लक्षणया गोपदाद्गौरिति व्यक्तिधीरिति मन्तुनः यद्वाहु
जातौ वा तत्त्वासत्वेन हि कश्चिद्विवक्ष्यति नित्यत्वाल्लक्षणीयायाः व्यक्तेस्तेहि विशेषणो
इति उच्यते स्वार्थादन्येन रूपेण ज्ञाने भवति लक्षणा ताररूपेण जातिगंगापदस्येव
नचेह गोत्वादन्येन रूपेण व्यक्तेरुपस्थितिः किं तु गोत्वेनैव तद्व्यक्तित्वेन सास्नादिमत्वेन
वोपलक्षकत्वे गोपदा[illegible]त्वादिरूपेण धीः स्यात् नापि गोत्वसंबंधित्वेन गोत्वविशिष्टत्वेन ल
क्षणा गोत्वे हि न साक्षादानयनाद्यन्वय इति व्यक्त्यवच्छेदकत्तया तस्यान्वये गमकत्वात्तं
लक्षणायापि गोत्वावच्छिन्नैव व्यक्तिः क्रियान्वयिनी प्रतीयते न केवला व्यक्तिरिति गो

त॰ चि॰ म॰ त्वविशिष्टस्य लक्षणत्वे युगपदुपस्थितिद्वयविरोधः गोत्वेपि वा लक्षणा अपि च जातिमत्त्वेश शा॰ वि
६६ क्तिः न वा व्यक्तौ लक्षणा जातौ शक्यसम्बन्धयोगाभावात् न योगान्मूलकत्वात् प्रयोगो
10 हि व्यवहारहेतुज्ञानार्थं न च जातिमात्रे निर्विकल्पकाद्यक्तिमनादाय केवलं जातौ
व्यवहारः तस्य विशिष्टज्ञानसाध्यत्वात् गांपश्येति गौरस्तीत्यादावपि गोत्वविशि
ष्टस्यैव ज्ञानं व्यवहारश्च तस्मादेकवित्तिवेद्यत्वनियमाज्जातिविशिष्टं शक्यं यदि
च तत्तीयायाः कारणत्वैकत्वेव गोगोत्वे शक्ये तदा गोत्वं गोव्यक्तिश्चेति धीः स्यात् न तु स्यं॰
गौरिति वैशिष्ट्यावगाहि धीवा ज्ञानो घट इत्यत्रैव विशेषणताविशेष्यभावोर्थात्तरं एवं तत्त्वा
देतत् जातिविशेषवदवयवसंयोगानुपाख्याकृतिरपि पदशक्या गोपदादाजात्याकृ
तिविशिष्टस्यैवानुभवात् पिष्टमयो गाव इत्यादौ गवाकृतिसदृशाकृतौ लक्षणा विष्ट
संयोगविशेषस्याशक्यत्वात् जात्याकृतिव्यक्तिनां प्रत्येकमात्रपरत्वे लक्षणैव प्र क
त्येकस्य जात्याकृतिविशिष्टादन्यत्वात् यथा गुरूणां कार्यशक्त्या या लिङ्गो लोके
कार्यत्वपरत्वे अत एव व्यक्त्याकृतिजात्यस्तु पदार्थ इति पारमर्षसूत्रं एकत्वेन शक्या
एकवित्तिवेद्यत्वसूचनाय पदार्थ इत्येकवचनं एवं च पञ्चपङ्कजपदशक्यं ततो नि
यमतः पङ्कजनिकर्तृपद्ममिति प्रतीतेः अवयवानां तत्रासामर्थ्यात् रूढिं विना योगमात्रात्
कुमुदे प्रयोगधीप्रसंगाद्य न तु रूढावपि योगात् कुमुदे तौ कर्त्तोन स्यात्तां रूढ्या प्रतीतिर्वा
धादिति वाच्यः वयं तु नियमतो रूढ्यास्य तं पद्ममेव व्यक्तिवाचक इत्यस्य येन पङ्कजनिक
र्तृत्वया ऽनुमाद्यते बाधकं विना व्यक्तिवचनानां सन्निहितविशेषपरत्वानियमात् यथा
नि

गेयीतिरूढंतत्पदेनप्रकरणादिसंनिहिता रूढ्या गाभिहिताव्यक्तिर्बोध्यते एवंचसर्वत्राव
यानुभवसामग्र्यैवेतिनकुदृष्टीः नवात्तदर्थप्रयोगः नन्वेवंरूढिरेवास्तुतत्तएवोभयला
भात् किंयोगरूढ्या न अवयवशक्तेःक्लृप्तत्वात् योगिकार्थानुभवाच्च यद्यपिरूढ्यार्थे
वयोगार्थएवचानुभूयतेतदाविवादएवनस्यात् अननुभवेनैवतद्विशेषात् अत्रमीमांस
काः नतावत्स्मृत्यर्थशक्तिः पंकजपदप्रयोगविषयेनियतपद्मानुभवजनितसंस्कारात् स्मृतेरे
वोपपत्तेः स्मृतेस्तदनुभवत्वनियमात् नाप्यनुभवार्थंनियमतः स्मृतपद्मादायव्यक्तिवच
नन्यायेनावयवैः पंकजनिकर्तृपद्ममित्यनुभवसंभवात् स्मृतिश्चरूढ्याऽन्यथावेत्तिनावि
शेषः शक्तिंविनानियमतः प्रयोगएवकुतइतिचेत् पूर्वप्रयोगमपेक्ष्यावयवानांयुक्तन्या
येनपद्मानुभवजनकत्वनियमात् पूर्वप्रयोगोपितत्पूर्वप्रयोगमपेक्ष्येत्यनादित्वेव अथा
नियतोद्बोधस्यसंस्कारस्यशक्तिंविनानियतोद्बोधेहेत्वभावान्नियतास्मृतिरेवनस्यादिति
चेत् न कदाचिच्छक्तितोप्युद्बोधाभावेनशक्त्यास्मरणात् शक्तिंविनापिनियमतः शक्ति
स्मरणाच्च उद्बोधकंचननियतंसदृशापदशक्तिसंबंधिज्ञानानांप्रत्येकंव्यभिचारात् किंतु
यत्रस्मृतिः तत्रतत्कालोत्पन्नमनियतमेवोद्बोधकंकल्प्यतेफलबलात् कार्योन्नेयधर्मि
णांयथाकार्यमुन्नयनात् नचपद्मवत् तद्व्यापकादेरपिस्मृतिप्रसंगः स्मृतिबलेनोद्बो
धकल्पनमितितत्रस्मृत्यभावेनतदुद्बोधाभावात् तस्माच्छक्तिंविनाशक्तिरिवपद्मत्वस्य
नियतास्मृतिः नचैवंगवादिपदेपिनशक्तिःस्यात् व्यवहारकालीनसंस्कारादेवगवादिस्मृतिसंभवा
दितिवाच्यं नहितत्रस्मृत्यर्थशक्तिः किंत्वनुभवार्थंपदादन्यतोगवादेरनुभवासंभवात् अवयु

त॰ चि॰ म॰ त्वत्रस्य तत्तोनुभवासंभवाच्च पश्चादनुभवस्य योगादेवेति न समुदायो हेतुरन्यथासिद्धत्वात् अतोना शा॰ वि॰
६२ नुभवबलात्समुदाये शक्तिकल्पनं नन्वेवं तावादिपदानां प्रमेयत्वे शक्तिरस्तु गवादिस्मृतिसंस्का
रादितिचेत् न गोव्यवहारस्याहि स्वोपपादके गोज्ञाने पदशक्तिकल्पनं न त्वनुपपादके प्रमेयत्व
67 ज्ञाने गोपदात्प्रमेयो गौरित्यननुभवाच्च अथैवं संस्कारादेव तीरादिस्मृतिसंभवे गौणलाक्षणि
कोच्छेदः तीराद्यनुभवार्थं हि न तत्कल्पनं तदनुभवस्येतरपदादेव सिद्धेः तयोरननुभावकत्वा
त् तस्मान्नियतास्मृतिर्वृत्तिसाध्येति तयोः कल्पना तथा च नियतपदस्मृत्यर्थं पंकजपदेपि वृत्तिर्वे
न शक्तिकल्पनमावश्यकं तद्वारणाद्यभावादितिचेत् गंगायामित्यादौ वृत्तिं विना तीरादेरपदार्थ
त्वे विभक्त्यर्थान्वयस्तत्र न स्यात् विभक्तीनां प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः पंकजस्य
तु पंकजवाक्यघटितपाद्यत्वेन पाचकादेरिवाविभक्त्यर्थान्वयोपपत्तेः यत्तु शब्दोपस्थितस्य शाब्दान्व एव
यबोधः अन्यथा प्रत्यक्षोपस्थिते कलायेपि पचतीत्यन्वयबोधः स्यादिति तन्न पदस्य तात्प
र्याग्रहात् तन्न हेमवत्येव किं पचतीत्युक्ते वहूपदर्शितकलायादौ अन्यथादेवाघृतस्मृत
कलायपदात्कुतो नान्वयबोधः द्वारमित्यादावपि न विधेहि पदाध्याहारः किंतु तदर्थस्यैव ला
घवात् न च पचमानयेत्यादौ शाब्दानुभवे पदस्योपस्थापकपदजन्यत्वादन्यत्रापि तथेति वाच्यं
शाब्दप्रमानुभवे हि तदन्वयबोधतात्पर्यकपदत्वेन कारणता न तूपस्थापकपदत्वेना
नापि गौरवात् अथैवं जनिकाल एव प्रयोगस्यात् न तदत्यये न हसतीति हि दंडे दंडीतिव्य
पदिश्यत इति चेन्न न पाचकादिपदवत् उपत्ययस्य योग्यताशक्तत्वाल्लक्षकत्वात् उप शा॰
जादौ तथा निर्णयात् अन्यथायोग्यरूढ्यादावपि जनिकाल एव प्रयोगस्यात् योगत्यागे

केवलरूढिवादे विवादाभावश्च तथापि कुमुदे लक्षणा न स्यात् योगार्थस्याबाधनादिति चेत्
न वक्ष्यमाणेतित्वात्तस्यासाधुत्वं गमकाभावान्नियमतः स्मृतपद्मत्वस्यान्वयानुपपत्त्यनंतरमेव कु
मुदे धीरिति न लक्षणाव्यवहारो वस्तुतोऽनुरुध्यतैव नवापि पद्मत्वस्य योग्यतयोऽन्वये यो
गादेव कुमुदे धीर्न लक्षणायेति उच्यते आसत्तिबुभुत्सत्वस्य ज्ञानानंतरं नियमतो ऽन्वयप्रति
योगिस्मृतिनतत्तद्रूढसंस्कारोद्बोधकं प्रतिबंधकं विनापदज्ञानमेवादृष्टानुभिधानत्वात् अनुगत पद
त्वात् लघुत्वाच्च न तु घटितपदार्थस्मृतिकालोत्पन्नमनंतमदृष्टचरमनिर्वचनीयं गौरवात्
अतः पद्मस्मृतावपि गृहीतसंबंधपंकजपदमापतत्येति संबंधत्वेन शक्तिसिद्धिः एवं रथका
रशब्देऽपि जातिविशेषे रूढिर्न स्यात् संस्कारादेव तदुपस्थितिसंभवात् तथा च वर्षासु रथका
रोऽग्नीनादधीतेत्यत्र रूढ्यर्थस्य बलवत्त्वेन शीघ्रमुपस्थितत्वाज्जातिविशेषवत एवाधान
विधीयते इति राद्धांतव्याघातः यथा च शब्दः संनिधिरन्वयबोधं प्रति शोकमासत्तिप्रयुक्ताशेषस्या
देतत् पद्मोतीयत एव योगरूपसंबंधेन पंकजपदादेव स्मृतिरस्तु एवं च पद्मे विभक्त्यर्थान्वयः शाब्दा त्व
नुभवश्चेवशाश्चोपपद्यते पंकजपदप्रतिपाद्यत्वात् न च प्रतिपाद्यता वृत्तेः तदुभयोपयोगिनी घ॰
पाधकमानयेत्यादौ वाक्योपस्थाप्येतदभावात् नच शाब्दवृत्त्यैव स्मृतिः किंतु संबंधिज्ञानाद्वृ
त्तेरपि संबंधत्वेन स्मृत्युपयोगात् अन्यथा पदाद्वृत्तेः स्मृतिर्न स्यात् गवादिपदे त्वेव स्मृतिसंभ
वेऽप्यन्वयानुभवार्थं शक्तिरित्युक्तं एतेन पंकजपदान्नियमतः पद्मज्ञानं न वृत्तिं विना अतो लक्षणा
द्यभावे शक्तिरित्यपास्तं ज्ञानं हि स्मृतिरनुभवश्चाविनाप्युपपन्नं तां कल्पयति अनन्यलभ्यस्यैव शक्तिं
शब्दार्थत्वात् अन्यथा शक्तिं विना पदान्नोपस्थितिरित्यन्वयेऽपि शक्तिर्लक्षणा छेदश्च
जं पंकमवधनुच्यत इति घसिद्धार्थपदसामानाधिकरण्यात्यत्रस्य ज्ञापकं तात्सिध्यातिनन

अतएव पू॰पं॰१

त•चि•म• नच्चोक्तं पंकजपदं पद्मशक्तं नियमतस्तत्स्मारकत्वात् पद्मपदवदिति निरस्तं शक्तेर्व्यभिचारात् श•वि•
६८ अनन्यलभ्यत्वस्य पद्मानुभावकत्वस्य वोपाधित्वाच्चेति उच्यते नियतपद्मस्मृतेस्तत्संबंधे
न पंकजपदसाध्यत्वे पद्मवत् तथाप्यव्यापकयोरपि नियतस्मृतिप्रसंगः अत्र पद्मे प्रयोग एव
पद्म एव प्रयोग इति नियतसंबंधेन पद्मेतरव्यावृत्तेन पद्मस्यैव पदात्स्मृतिः न चैवं नियतप्रयोगा
देव शक्तिसिद्धिः अनन्यलभ्यस्यैव पदार्थत्वादिति चेत् तर्हि ज्ञातस्यासंकेतत्वे सकलप्रयो
गादर्शिनो वृद्धस्य पद्म एव गृहीतप्रयोगस्य समव्याप्तिज्ञानाभावान्न नियतपद्मस्मृतिः
स्यात् स्वरूपसतस्तस्याज्ञातत्वे वा गृहीतपद्मप्रयोगस्यापि ततो नियतः पद्मस्मृतिप्रसंगः
अथ यादृशप्रयोगस्त्वया शक्तिग्राहकत्वेनाभिमतः स एव पद्मस्मारकोस्तु न च पद्मत्वस्ये
व प्रयोगसमव्याप्तत्वेन गृहीतस्य सौरभादेरुपाधेस्तत एव ततः स्मृतिप्रसंगः न वापि शक्तिग्र
हसंभवात् तयोस्तुल्यत्वेपि शक्तिग्राहकप्रमाणाभावात् लाघवादितर्कावतारान्नोपाधौ श
क्तिरिति यदि तदा तर्कसहकृत एव शक्तिग्राहकत्वाभिमतः संबंधः पद्मस्मृतिहेतुरस्तु तर्काद्यनवधा
त्र गृहीतप्रयोगस्य पद्मस्मृतिदर्शनात्तैस्तथेति चेत् नानेन वापि तर्कं विना शक्तिग्राहकाभावात् कथं पद्म
स्मृतिरिति तुल्यं न चैवं तत्र एव शक्तिग्रहोपि स्यात् अनन्यलभ्यस्यैव शब्दार्थत्वादिति मैवं एवं
गवादिपदेपि शक्तिग्राहकत्वाभिमतादेवंविधप्रयोगादेव ज्ञानाद्वादेः स्मृत्यनुभवोस्यातां किं शक्त्या
तस्मात्तत्पदार्थीनां नियतास्मृतिः शक्तिसाध्या वा नियतसंबंधसाध्या इति साध्या वा तत्रपरि
शेषादि शक्तिसाध्यैव न च शक्तिस्मृतौ व्यभिचारः शक्तिस्मारकत्वाभिमतात्पदात्पदार्थस्यै
वाहं त्यस्मरणात् शक्तेः हेत्वभावात् कल्पनागौरवाच्च संबंधिनं विना संबंधस्यास्मरणे न प्रथमं
भि

68

पदार्थस्मरणस्यावश्यकत्वाच्च पदार्थस्मृतेश्च शक्तिविषयत्वे मानाभावात् उद्बुद्धसंस्कारविष
यत्वाघटितशक्तिरपि तद्विषयः तदा पदार्थशक्तत्वेनैव ज्ञानस्य पदस्य शक्तिस्मारकता न तु शक्तिसंबंधि
त्वेनान्यथातिप्रसक्त्यात् यथा पदान्नियमतः स्मृतिर्नियतसंबंधसाध्या शक्त्यापि समं पदस्य शक्त्याः
अयत्वमेवानियतः संबंधः अपि च कुमुदेऽवयवशक्तिप्रतिबंधार्थं रूढिं न चान्वियतपद्मस्मृतिरेव
प्रतिबंधिका रूढिं विना नियतस्मृतेरभावात् अत एव न व्यक्तिवचनन्यायोपि न चैकं पदं एकदाऽ
कनेकरूपेण प्रवर्तते अतो न पद्मत्वपंकजत्वयोर्धीरिति वाच्यं अवयवसमुदाययोर्भेदात् बोधक
रणादिपदे व्यभिचाराच्च तर्हि तत्र वैध्यत्वानावयवशक्तिप्रतिबंध इति चेत् तत्रावयवार्थक्रिया
त्वेनाप्रतिबंधात् नानार्थे च नानार्थानुभवाद्वैकशक्त्यान्यशक्तिप्रतिबंधः यत्त्ववयवशक्ति
स्मृतिकाले समुदायशक्तिस्मृतिनियमे हेत्वभावान्न तयाप्रतिबंध इति तत्र समुदायस्य
तावदवयवरूपत्वेन सर्वावयववाद्वोभयशक्तिस्मृतिसंभवात् मंत्रपपदे तथ्यादर्शनात् अप्ययं
कपदोत्तरजपदं प्रतिबंधकं गोवलीवर्दवत् पंकजानि सहप्रयोगे उत्पत्त्ययस्य कर्तृविशेषपद्मत्व
अतिविशेष्य: रत्वं वा जनेः पद्मपरत्वं वात्यभावादेव कुमुदबोधजनकत्वं वा चक्षुष इव रसे कुमुदेऽवयव
शक्तिकुंठत्वं वा कल्प्यतां तेन न कुमुदे धीरिति चेत् तर्हि ज्ञातपद्मप्रयोगस्य कुमुदसाधारणबो
धानस्यात् न भवत्येवेति चेत् किमवयवव्युत्पन्नस्य न तोऽर्थद्वयस्य एव न भवति यद्यपि
कजत्वेन पद्ममेवानुभूयते आद्यो घर्मदुरजादिपदादिव तत्स्माद्यीसत्त्वे कथं नानुभवः
द्वितीये कुमुदमप्यनुभूयेताविशेषात् न चैवं पंकजशब्दस्य सामान्यशक्तत्वात् तत्रान्य
यवशेन विशेषतः पद्मकुमुदधीसंभवान्न तु छिन्नबालतत्रणस्यात् इति वाच्यं नहि यो

त·चि·म· ज्ञानद्वारा तिमयेन सामग्रीतानुभावयति यदि च पद्मकुमुदयोस्तुल्यत्वं तदागृहीतपद्मप्रयोगस्य पद्मान्व श·खं·
६८ यानुपपत्ति पद्मस्येव कुमुदधीर्न स्यात् स्याच्च कदाचिद्विप्रतीत्यं अतः पद्मे रूढिरेव कुमुदे च यथाल
क्षणात्वावयवार्थः कुतस्तत्र शक्तिरिति धर्मान्तरं वा शक्तेरनुद्बोधादभिभवो वा तत्र कारणां
69 तरं वा दृष्टव वरं कल्प्यं रूढेर्योग प्रतिबंधकत्वं मंडपादौ दृष्टमेव अत एव पंकजावयवैः पद्मे
वानुभाव्यत इत्यवयवनियमकल्पनात् कुमुदे च प्रयोगो अन्यथा रूढावपि योगात्कुतस्तो
कुमुदे यथोद्भित् पदस्य योगात् खनित्रे रूढ्या कर्मविशेषे प्रयोग इति निरस्तं अगृहीतानियत
पद्मप्रयोगस्य कुमुदस्याधारत्वे पदर्शनात् रूढिवादे तु सैव प्रतिबंधिका मंडपपदवत् ज्ञातस्यावा
वयवनियमस्य प्रयोजकत्वे पद्मे शक्तिरेव पद्मज्ञानजनकत्वज्ञानस्य शक्तिनिर्वाहकत्वात् उद्भित्प
राय देवावयवार्थः कर्मयोग्यत्वादेव नाबीयते न तु रूढ्या प्रतिबंधात् अवयवार्थान्वययोग्ये खनि
त्रेन प्रतिबंधः योगेन खनित्रेपि प्रयोगात् एवं रूढियोगाभ्यामुद्भित्पदस्य नानार्थतुल्यतैव
उभाभ्यामेकार्थानवगमात् ननु गृहीतपद्मप्रयोगस्यावयवैः सह प्रयोगे पद्ममेवानुभाव्यते
इति स्वभावकल्पनमस्तु नैवं बहुत्पत्त्यंतरं स्वरूपसत एव प्रयोगग्रहस्य शक्तिग्रहस्येवोपसंदा
नत्वात् उपसर्गस्येव धातोः प्रकर्षादिबोधकत्वे उपसंदानं विना च कुमुदबोधो भवत्येव यत्तु
पदानां स्वार्थान्वयबोधसामर्थ्यमुपजीव्य कुमुदाबोधार्थं नान्विताभिधाने ऽवयवनियमः
कल्प्यते उपजीव्यविरोधात् किंतु समुदायस्य कुमुदे स्वार्थत्वाभाव एवेति तन्न एवं हि स्वार्थ
त्वाभावेन समुदायात् कुमुदधीर्न स्यात् अवयवेभ्यस्तु स्यात् एवेति मैवं पदानां न हि स्वभावा
धीनं बोधकत्वं किंतु शक्तिज्ञानाधीनं अज्ञाताच्छक्तेरबोधकत्वात् शक्तिभ्रमेणाबोधकत्वाच्च

तथाच बोधकशक्त्यभावादेवाबोधकत्वं कार्याभावे हेत्वभावस्यैव तंत्रत्वात् धातोश्चोपसर्गो
पसंदानस्य प्रकर्षादौ शक्तिधीरिव स्यादेतत् यथा सर्वनामत्वमहत्पदे बुद्धिस्थत्वं संबोध्यत्वो
च्चारयितृत्वं प्रयोगोपाधिः तेन बु[illegible]स्त्यादिकमेव तद्बोधयति तत्रैवं प्रयुज्यते न तु बुद्धिस्थ
त्वादिकमुपाकं तेन रूपेण ज्ञानाभावात् तथा पद्मत्वमपि प्रयोगोपाधिरिति चेत् तेन हि द्वि = २
तावयवशक्तिर्विच्छिद्यते पंकजत्वसत्त्वात् नापि कुमुदे तात्पर्यमपोद्यते बाधकं विना तस्यौत्स
र्गिकत्वात् नावयवार्थानुज्ञानं प्रतिबध्यते शक्त्याकांक्षादितात्पर्याणां सत्त्वेऽन्वयज्ञानस्या
वश्यकत्वात् उपादेरन्वयबोधप्रतिबंधाहेतुत्वात् नापि प्रयोगो वार्यते इष्टकुमुदधीहेतुतया इष्टसा
धनताज्ञानस्य न लिंगककार्यताज्ञानस्य वा प्रयोगहेतोः सत्त्वेऽप्रयोगस्याहेतुकत्वात् अत्र हिमादिपदेवा
त्वमात्रशक्तेः शक्तिग्रह— सहकारितया स्वरूपसदेवोच्चारयितृत्वादिकं धीनियामकं स्वभावात् नि
यमस्तु तस्यैव बोधनादिति स्वरूपसतस्त्वोपाधित्वं पद्मत्वं तु न साधारणावबोधदर्शनात् न तु कुमुदे (तथा कुमुद
पूर्वपूर्वेषामप्रयोगादाधुनिकानामप्रयोगः न च प्रयोगमात्रं को हेतुरिति वाच्यं प्रयोगाणां हि मे
लकेन कार्यता किंतु प्रत्येकं तत्रोत्तरस्य पूर्वो हेतुः यथा पूर्वांगोत्तरस्य अन्यथा गोमात्रे केतुरित्य
त्र किमुत्तरं न वेति चेत् न प्रयोगहेतोः सत्त्वात् पूर्वप्रयोगस्याहेतुत्वात् पूर्वप्रयोगसत्त्वात् वाप्यव
यवव्युत्पन्नेन पावकादिपदानां नवकाव्यानां गौरणालादरिणीक देवदत्तादिशब्दानां च प्रयोगात् स्या
देतत् ग्रामगामादिपदेऽन्वयबोधाभावात् साधुत्वज्ञानमपि हेतुः न चैवं तद्देव हेतुरस्तु किं शक्त्या
गौरणालादरिणीक मुखवा विवेक प्रसोपाधिवानुपाधित्वाभ्यामस्त्यितिवाच्यं प्रथमं व्यवहारेण शब्दस्य
ज्ञानकरणतावगमात् तत्रैव शक्तिकल्पनं ततो ग्रामगामादौ व्यभिचारादाकांक्षादेरिव साधुत्व
ज्ञानस्य हेतुत्वकल्पनात् साधुत्वं च न पूर्वप्रयोगप्रवाहाविच्छेदः न च काव्यादौ तदाभावात्

त॰चि॰म॰ किंतु भ्रमादिजन्यत्वाभावः कुमुदे न तत्प्रयोगो बोधकत्वभ्रमात् नचैवं भ्रमजन्यत्वाद् बोधकत्वं अबोधकत्वे शा॰वि॰
७० च बोधकत्वभ्रमजन्यत्वमिति अन्योन्याश्रयः पूर्वभ्रमजन्यत्वेनोत्तरं प्रतिबोधकत्वभ्रमात् अतो बोधक
70 त्वभ्रमादुत्तरस्य प्रयोगो भ्रमजन्यः पूर्वपूर्वस्यापीति तत्र भ्रमपरंपरैव मूलं एवं ग्रामगामादेरपि कथं
मिदं ज्ञातव्यमिति चेन्न ग्रामगमनकर्तरि ग्रामगामपदस्यैव ग्रामणीकानां कुमुदे त्वस्य निरुपाधिप्रयोगा
भावात् अत एव साधुत्वभ्रमात् कुमुदसाधारणबोधोऽपि कुमुदे ह्यसाधुत्वात्समुदायेन तत्र पंकजन्मक
त्वं लक्ष्यते नचासाधुत्वे ग्रामगामादिपदवल्लक्षणापि न स्यात् यथैतस्यासाधुत्वात् उच्यते पंकजन्म।
कर्तरि तत्प्रयोगस्य भ्रमाद्यजन्यत्वेन साधुत्वं कुमुदे न तथेति चेत् न पुंडरीकत्ववत् पद्मत्ववच्च तस्य व्यक्ति
स्थानीयत्वात् प्रतिवाक्यार्थं च साधुत्वस्याहत्य त्वेऽभिव्यक्तौ भ्रमाद्यजन्यत्वस्य गृहीतुमशक्यत ज्ञान
या पावकादिपदप्रयोगो न स्यात् पाककर्तृजातीये भ्रमाद्यजन्यत्वस्य ग्रहणवत् पंकजन्मकर्तृजाती जा॰
येऽपि ग्रहणात् येन रूपेणान्वयबोधस्तस्य कुमुदवृत्तित्वात् अथ पंकजपदं कुमुदे वृत्त्यंतरं विना
न साधु वृत्त्यंतरं विना वृद्धैस्तत्राप्रयुज्यमानत्वात् यः शब्दो यत्र वृत्त्यंतरं विना वृद्धैर्न प्रयुज्यते।
स तत्र वृत्त्यंतरं विना न साधुः यथा गंगापदं तीरे यथा वा ग्रामगामपदं ग्रामगमनकर्तरि न प्रयु।
ज्यते च वृत्त्यंतरं विना पंकजपदं कुमुदे तस्माद्वृत्त्यंतरं विना न तत्र साध्विति चेत् न व्यर्थविशेष
णत्वात् तत्राप्रयुज्यमानत्वस्यैव व्याप्यत्वात् आकांक्षादिमद्वाक्यासाधुत्वे अवयवार्थान्व
याबोधकत्वस्य व्याकरणास्मृत्यनुपगृहीतत्वस्य पक्षधर्मावच्छिन्नसाध्यव्यापकस्योपाधित्वा
च्च पक्षेऽप्यभावेन साधनाव्यापकत्वात् पंकजशब्दः कुमुदे साधुः साधुत्वे सति कुमुदबोध
प्रयोजकाकांक्षादिमद्वाक्यत्वात् साधुत्वे सति यद्वाक्यं यद्बोधप्रयोजकाकांक्षादिमद्भवति तत्
तत्र साधु यथा तरुप्रसूनशब्दः कुसुमे यथा वा पाचकादिशब्दः पाककर्तरि तथा पंकज

पदं कुमुदे तस्मात्तयेति सत्प्रतिपक्षाच्च वस्तुतः साधुत्वज्ञानं च हेतुः अवयवादिव्युत्पन्नेन अप्रमाप्रजन्यत्व
दृष्टप्रयोगमज्ञानपि नवकाव्यादिप्रयोगात् कुतस्तर्हि ग्रामगामादौ वान्वयबोधः असाधुत्वनिश्चयादि
ति ब्रूमः साधोरप्यसाधुत्वनिश्चयेनाबोधकत्वात् अभिनवकाव्यादौ नासाधुत्वनिश्चयः संशयश्च न
प्रतिबंधकः अन्यथा योगरूढिसंशये सति अभितवव्युक्तो पाचकादिपदप्रयोगो न स्यात् अन्ये तु ततो
ऽन्वयबोधो भवत्येवापभ्रंशादिव यथा न वसाधुत्वभ्रमात्साधुत्वं तस्य नास्तीत्यदेव अपरे त्वत्राकांक्षो
वनास्ति घटः कर्मत्वमित्यत्रेव यत्र गमाद्यनुत्तरापरत्वेन शक्ति कुशाहर्वित्तरकाशत्वेनेवेति त
त्र कर्मोपपदधात्वन्तरापरत्वेनैव शक्तेः ननु तत्तद्धात्वनुत्तरारात्वेन गौरवात् न तत्तद्धात्वनांव
शिष्याज्ञाने शक्तिग्रहानुपपत्तेः कर्मण्यणिति सूत्रार्थज्ञानतः कुंभकारादिप्रयोगानुप
पत्तेश्च शक्तिसंदेहात् असाधुत्वं च न भ्रमादिजन्यत्वं अनाप्तोक्ते साधुत्वापत्तेः षड्काद्यु
दीरिते ग्रामगामादौ भ्रमाद्यजन्यत्वाच्च किंतु महाजनपरिगृहीतव्याकरणस्मृतिनिषिद्धत्वं
अनाप्तोक्ते ऽसाधुत्वापत्तेः ननु परिगृहीतत्वं वेति वक्ष्यन्ते पदस्य साधुत्वं वृत्तिरेव वृत्तिश्च
शाब्दबोधहेतुः पदार्थोपस्थित्यनुकूलः पदपदार्थयोः संबंधः गव्यस्य साधुत्वं वाकांक्षादिमत्त्वा
र्थान्वयबोधकत्वे सति व्याकरणस्मृत्यविनिषिद्धत्वं तस्मात् कुमुदपंकजशब्दस्य साधुत्वे सति ।
प्रयोगाप्रतिबंधकत्वेन समुदायशक्तिसिद्धिः न चैवं लाघवाज्ज्ञशब्द एव शक्तिरस्तु न समुदा
ये मंडुरजादौ पद्मधीप्रसंगात् पंकोत्तरजपदत्वेन शक्तिरिति चेन्न तर्हि सर्वत्र तत्तद्वर्णानंतरं
एव त्ववर्णा शक्तिरिति समुदायशक्त्युच्छेदः न चैवमेवाविनिगमकाभावादिति समुदायः
तत्र ब्रूमः — — हि याशक्तौ नु भावयति साशक्तिः न च समुदायः पद्मानुभवे हेतुः अवयवा

म

त.चि.म. देवतदनुपपत्तेः एवंच प्रतिबंधकमात्रे शक्तिपदं पारिभाषिकं शक्तित्वादनुभावकत्वसाध्यत्वे त्वन्यो शा.वि.
७१ न्याश्रयः प्रतिबंधकत्वेनावगतेः शक्तित्वाप्रसिद्धेश्च मंडपादौ त्वनुभावकत्वेनैव शक्तिसिद्धिः किंच
रूढियोगयोर्विरोध एव परं रूढ्या योगप्रतिबंधः मंडपादौ तथा निर्णयात् अन्यथा लंबकर्णादौ
अपि योगप्रतिबंधः स्यात् नचेह विरोधः पद्मद्वयोः समावेशात् योगार्थस्य धीश्चोभयतुल्या य
त्पंकजमानयेत्यादौ रूढ्या शीघ्रोपस्थापितं पद्ममेव क्रिययान्वीयते नपंकजनिकर्तृत्वस्यवाक्या
र्थत्वेन विलंबप्रतीतिकत्वात् एवंचाविरोधेपि रूढेर्योगापहारितेति तन्न क्रियापदतदर्थयोग्यता
दिज्ञानाधीनत्वेन क्रियान्वयबोधस्य विलंबितत्वात् रूढ्यवयवार्थयोरन्वयबोधस्य सामग्रीसत्वे
न प्राथमिकत्वात् तस्मान्न प्रतिबंधकत्वेन रूढिसिद्धिर्नवा तया योगप्रतिबंधः इति अत्रोच्यते
स्म= नियमतः पद्मस्मृत्यर्थमेव रूढिः रूढ्या च नियमतः स्मृतं पद्ममेवावयवैः पंकजनिकर्तृत्वेनैवा
नुभाव्यते बाधकं विना व्युत्पत्तिवचनानां संनिहितविशेषपरत्वनियमात् अतः सर्वत्र पद्मानुभ
वसामग्र्येवेति वक्रमुदे धीप्रयोगो नचैवमनुभवाजनकत्वेन तस्याः शक्तिः याज्ञाता नियमतः
शाब्दं ज्ञापयन्ति सैव हि शक्तिः ज्ञप्तिस्तु स्मृतिरनुभूतिश्चेति नियतस्मारिकापि शक्तिः व
स्तुतस्तु स्वार्थस्मृतिद्वारावयवानामिव समुदायस्य स्वार्थान्वयानुभावकत्वमविशेषादिति
पश्चादनन्यादिकापि रूढिः पंकजमानयेत्यादावानयनादिना स्वार्थान्वयानुसमुदायावय भवे
वयोर्हेतुत्वाच्च तस्मान्नियतस्मृतिहेतुत्वेनैव रूढिसिद्धिः नतु प्रतिबंधकत्वेन यदि वा नियतास्मृतिः प्रकारांत
रेणाभवति तदा योग एव न रूढिः रूढिन्याये नैव कुमुदधीप्रयोगयोरभावादिति गोपदस्यमविविदेऽहीतप
दस्य कर्मविशेषे रूढिरेव लाघवात् ननु मेडोरण्डः स्वरक्रतुसमूह इत्यनुशासनात् योगोपि डोस्वप्रत्यय
ग

योलोके कर्त्तरि कर्मविशेषे च शक्तिर्नक्लृप्ता अतः प्रत्ययशक्तिनियामकं च गम्युत्तरत्वमहः पदोत्तरत्वं च कल्प्य
तथा च गौरवं एवं चेनु पदेष्वेकैकस्यातिप्रसक्तत्वात् गोत्वविशिष्टध्यानकर्मणि रूढिरेवानियमतो गोत्व
विशिष्टोपस्थितेः ननु योगोपि दानभानुकृशान्वादौ भिन्नार्थत्वेन तु प्रत्ययशक्तेरकल्पनात् गमे
र्डुत्रिः स्वः कृतो दाभाभ्यां नुर्धेश्चेत्यादिस्मृतिर्घ्नेर्डव दिवत् कायं चित्युत्पादनपराः अत एव भग
वान् पाणिनिरर्थानुगमात् समुदायशक्त्यपेक्षया गौरवात् ओपादिप्रत्ययेषु न शक्तिरिति पंच
पादिकाविहितानुणादिप्रत्ययानुणाद्यो बहुलमिति एकेनैव सूत्रेणाविहितवान् यत्र तु प्रत्य
ये शक्तिस्तत्र प्रत्येकमेवास्तु नयत यत्तु धेनुगोत्वं न शक्यं किंतु शक्योपलक्ष्यतया शक्त्युपाधिः
यत्र गोत्वं तद्धानकर्मशक्यं शक्यास्तु उपलक्ष्या महिष्यादिव्यावृत्ता धानकर्मविशेषा एव अनु
गमस्तु उपलक्षणैक्यात् न चैवं लाघवात् गोत्वं शक्यं धानकर्मत्वमुपाधिः उपलक्ष्यस्य गोत्वस्या
तिप्रसक्तत्वात् गोत्वविशिष्टधानकर्मत्वस्य तित्वेकैव शब्दसंस्काराभ्यां जन्यते न तु मयस्मरत्व
नंतरं परस्परमन्वयबोधः अवयवशक्तेरभावादिति तन्न शक्तिं विना नियतगोत्वोपस्थित्य
भावात् उपलक्षणैक्येनोपलक्ष्यैक्याभावाच्च अन्यथा महिष्यादिव्यावृत्तधानकर्मत्वेपि न
नक ५ शक्ति धर्मिगोत्वे शक्त्युपधीपिंडमात्रे शक्यं अग्रे च संस्काराद्युपस्थित्योस्तयोः कर्मणा धेनु
पदादन्वयो भासत इति धानमपि न शक्यं [illegible] दिवानुगतविशेषेणां शक्त्युपाधी विशेषे
च शक्तिरनुगमान्ति प्रसंगाभावाच्चोपाधिनैवात् तदौपाधिककारणादिपदानां विशिष्टे शक्ति
र्नस्यात् न च अवयवार्थं कजनिकर्तृत्वानुभवः समुदायाच्च पद्मस्मरणं स्यान्न तु पंकजन्म कर्तृ
पद्ममित्यनुभव इति वाच्य[illegible] अवयव समुदायस्मारिकजनिकर्तृ पद्मानां पंकजनिकर्तृ पद्ममित्यनुभवो

तथं

न

 ऽवयवसमुदायाभ्यां संभूयप्रत्यते समुदायोपस्थितपद्मेन समं स्वार्थो योऽवयवैरवयवजनितानुभवोप
 स्थितपंकजनिकर्तृत्वेन समं स्वार्थान्वयः समुदायेन वानुभावितं --कांक्षाद्युपतपादानां तात्पर्यविषय

त्वोपस्थितार्थान्वयबोधकत्वनियमात् न च वाक्यांतरे तथात्वादर्शनबलेन नैवं व्युत्पत्तिरिति वाच्यं

वाक्यांतरेऽपि समुदायशक्त्यभावेन तथात्वेऽप्यत्र समुदायशक्तिबलात्पदविधयाऽशक्याविषया वैकस्मा
न्व देकपदोपस्थितयोः पंकजन्मकर्तृपद्मयोरन्वयो बोध्यते समुदायेन पदैकवाक्यतावत् पंकजं कुमु
दमित्यत्र समुदायेनैव पंकजन्मकर्तृत्व मात्रान्वय स्वार्थपद्मसंबंधि लक्ष्यते कुमुदे साधुत्वात् कथं तत्र
लक्षणेति चेत् न समुदायस्य तत्रासाधुत्वात् यत्र तत्र पद्मत्वमयोग्यतया नान्वेति योगादेव मुद्दे त्य
वृत्त्या कुमुदे पंकजन्मकर्तृत्वमनुभूयत इति तन्न कुमुदेऽवयवशक्तेः समुदायशक्त्याऽऽत्मनाप्रति
बंधात् तथैव तदवगमात् ननु यदा व्युत्पत्तिवचनन्यायात् कुमुदधीर्न त्ववयवशक्तिप्रतिबंधात् त
दा पंकजशब्दात् उपस्थिते पंकजं पद्ममिति वाक्यार्थेऽयोग्यतया पद्मपदादपदवाक्येकवाक्यत
या पंकजनिकर्तृ कुमुदमित्यनुभव इति चेत् तर्हि पद्मानुभवेऽन्वितत्वेनोपस्थितस्य पंकजनिकर्तृत्व
स्यान्वयाकांक्षा नास्तीति स्वतंत्रोपस्थित्यर्थमवश्यं लक्षणा यथा पुरोडाशकपालेपदेऽपि ष्टाऽ
न लक्षणा न च प्रथममेवावयवकुमुदपदैरयोग्यतयाऽस्मृतं पद्मं त्यक्त्वा स्वार्थान्वयानुभव इति
वाच्यं कुमुदपदतदर्थयोग्यतादिज्ञानात् पूर्वमेव पंकजशब्दात् पंकजं पद्ममित्यनुभवात् विलंबे
हेत्वभावात् स्थलपंकजं तु विजातीयमेव साजात्येऽपि तत्र लक्षणा यत्त्वयोग्यतया योगार्थो
नान्वेति किंतु योग्यतया रूढ्युपस्थितं पद्मत्वमेवान्वीयत इति तन्न पद्मत्वस्य योगार्थसातत्वेनोप
स्थितानिराकांक्षत्वात् स्वतंत्रोपस्थितये लक्षणायाऽवश्यवाच्यत्वादिति नन्वेवं पंकजपदस्य वा
त्या

पभ्रंशानामपि शक्तिः तत्तो नियमेनार्थप्रतीतेर्व्यवहाराधीनव्युत्पत्तेरविशेषात् अन्यथा
स्मातिवत्त्वंतरेतेभ्योऽर्थधीर्न स्यात् न च लक्षणा मुख्यार्थाभावात् न चापभ्रंशेन स्मारितसाधु
शब्दादन्वयबोधः साधुशब्दमजानतामपि पामराणां तत्तोऽर्थप्रतीतेः तदर्थकसंस्कृतेनार्था
प्रतीतेश्च शक्त्यारोपात्ततोऽर्थप्रत्यय इति चेत् न मानाभावात् व्यवहारादिना तत्र शक्तिग्र
हे बाधकाभावात् न च शक्तिसाध्यं शक्त्यारोपात् संभवितुमर्हति आरोपितदहनभावादपि दाहा
पत्तेः अप्यज्ञायमानकरणप्रयोजकरूपवत्तयाज्ञायमानादेव फलवाष्पे धूमभ्रमोपाधावनुमि
तिवदिति चेत् तर्हि तदेव फलस्याय थार्थत्वापत्तिः अन्यथापभ्रंश एव शक्तिः साधुश
ब्द एव तत्र येति किं न स्यात् न च सादित्वाद्देवदत्तादिशब्दवदाधुनिका एव तत्र संकेताः गवादि
पदे त्वनादित्वात् शक्ति रिति वाच्यं सजातीयप्रयोगजन्यप्रयोगत्वस्य भ्रसाधजन्यत्वस्य वाना
दित्वस्यापभ्रंशेऽपि सत्वात् अनेकदेशीयापभ्रंशेषु संकेतपितॄणामस्मरणाच्च न चापभ्रंशानां देश-
भेदेन एकत्रार्थे बहुत्वात्संस्कृतस्यैकत्वाल्लाघवेन तत्रैव शक्तिः प्रमाणवत्तो गौरवस्यैष्टत्वात् अन्य
थानानार्थोच्छेदः प्रतीत्यन्यथानुपपत्तिस्तुल्यैव ननु उभयोः शक्तत्वेन साधुसाधुविभागाभावा
त् तद्व्यवहारविरोधः साधुभिर्भाषितव्यं नापभ्रंशितवै नम्लेच्छितवै इत्यादिकविधिनिषेधानुपपत्ति
श्चेति चेत् तर्हि शक्तत्वाविशेषेऽपि तदाभियुक्तैः पाणिन्यादिप्रणीतव्याकरणोपगृहीतानामे
व संस्कृतानां साधुत्वमस्तु न त्वपभ्रंशानां साधुत्वं स्मर्यते तद्विषया एव साधुभिर्भाषितव्यमि
त्यादि विधयः तेषामेव धर्मोपयोगित्वं स्वभावादेव बीजस्येवांकुरे तस्मादपभ्रंशोऽप्यर्थप्र
त्यायकत्वाच्छक्त इति उच्यते एकत्र शक्त्यान्यत्र तदारोपात् तदर्थप्रतीत्युपपत्तावेकत्रैव श
क्तिर्लाघवात् अनन्यलभ्यस्यैव शब्दार्थत्वात् अन्यथा वृत्त्यंतरोच्छेदः तदाह भगवान् जैमि

त॰ चि॰ म॰ निरासार्थोऽन्याय्यश्चानेकशक्तत्वमिति। सा च शक्तिः संस्कृत एव सर्वत्र तस्यैकत्वात् नापभ्रंशेषु ते श॰ वि॰
७२ षां प्रतिदेशमेकत्रार्थे भिन्नभिन्नरूपाणां तावच्छक्तिकल्पने गौरवात् पर्यायवत्कुमर त्वं चोभयत्रापि
न च देशभेदे पिशाचकृतस्यैकरूपत्वात् तत्रैव शक्तिः संस्कृतभवत्वान्तस्य देशियभेदेन तस्याप्यने
73 कत्वात् एवं शक्त्यारोपादर्थप्रत्ययोपपत्तौ नापभ्रंशे शक्तिः ननु म्लेच्छादीनां संस्कृतमजानतां क
थं तत्र शक्त्यारोपः उच्यते केनचिद्गोशब्दे प्रयोक्तव्ये प्रमादाद्गावीशब्दे प्रयुक्ते व्युत्पन्नस्तत्र गोश
ब्दमुन्नीय ततो गां प्रतीत्य व्यवहृतवान् यथाहुः अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णय इति पार्श्वस्थस्य च व्युत्पित्सोर्गावीशब्दादेवायं गां प्रतीत्या
नीत्यवगत्य गावीशब्दस्यैव गोशक्तत्वेन प्रतीत्यान्येषां व्युत्पादको बभूवेति तत्र भ्रमत्यपभ्रंशे शक्ति
त्वभ्रमः एवं च प्रथमं व्युत्पन्नस्यापभ्रंशेन स्मारितसाधुशब्दादर्थप्रत्ययः तन्मूलश्चाननुसंहित
साधुशब्दानामपि शक्तिभ्रमाच्छक्तिमत्तया ज्ञायमानस्यैव शब्दस्य ज्ञानहेतुत्वात् यत्तज्ज्ञानस्य भ्रमत्वे जनक
शाब्दज्ञानायथार्थत्वं लिंगभ्रमजन्यानुमितेरिवेत् तन्न न हि शक्तिज्ञानयथार्थत्वं ज्ञानप्रमा शाब्द॰
यां प्रयोजकं अनाप्तोक्ते व्यभिचारात् नापि जनकज्ञानभ्रमत्वेनायथार्थत्वं भ्रमानुभव
साधे व्यभिचारात् प्रमाजनकत्वं चापभ्रंशस्यावश्यकं शाब्दप्रमाप्रयोजकात् योग्यतादेः
यथार्थत्वबोधाद्वा ननु शक्तिज्ञानयथार्थत्वमपि तन्त्रं गौरवात् अबाधितसंसर्गज्ञानजन
कपदार्थोपस्थापकत्वादित्यन्ये संसर्गबाधकप्रमाविरहादित्यपरे ननु साधुत्वं न प्रतिपा
दकत्वं अपभ्रंशेऽगतिव्याप्तेः नापि यत्र यस्यानादिप्रयोगः स तत्र साधुः हेऽरयो हेलय इति व
दन्तोऽसुराः पराबभूवुरिति वेदश्रवणादलिशब्देऽपभ्रंशेगतत्वात् संज्ञासंज्ञापनात् लौकिकगौणालाक्षा

शिकयोरसाधुत्वापत्तेश्च तथाभ्युपगमे वेदे पितयोः साधुत्वं न स्यात् अनादित्वं सजातीयप्रयोगपूर्वकत्वं
मपभ्रंशेपि नियमतस्तथात्वं च सर्गादौ स्वतंत्रपुरुषप्रयोगे ऽव्यापकं भ्रमादिजन्यत्वमपभ्रंशेपि न च
साधुत्वं जातिर्गोत्वादिव्यापिका तथा चानुपलब्धिबाधः व्याकरणसंस्कृतश्रोत्रग्राह्यत्वात् न च संज्ञाशब्दा
नामसाधुत्वापत्तिः तत्रापि प्रकृतिप्रत्ययाहसंभवात् गाव्यादिशब्देपि तत्साधुत्वं स्यादिति चेत् यत्रार्थे संभवाः४
तथासंभवः तत्र तथैव गवादौ तु न तथेति तत्रासाधुत्वमिति चेत् न जातिरूपत्वे सप्रतियोगिकत्वा
नुपपत्तेः सर्वस्य सर्वत्र साधुत्वापत्तेः ननु गोशब्दो ऽग्ने प्रयुक्तः साधुरेव ज्ञापकश्च न भवति न च तत्त्वेना
ज्ञानादिति चेत् एवं गावीशब्दोपि कयाचिद्व्युत्पत्त्या कचित्साधुरिति साधुत्वजातियोगात् तत्रापि साधुः
स्यात् प्रतिशब्दं भिन्नतद्विषयजातिस्वीकारे ऽननुगमः तारत्वादेस्तु जातित्वेप्युत्कर्षरूपतया ऽवधि
विरूप्यत्वात् नापि यत्तत्प्रयोगार्हत्वं साधुत्वं एकमवच्छेदकं विना प्रतिशब्दमर्हत्वस्य दुर्निरूप्यत्वा
त् साधुत्वेनैव यत्तेविधानात् चांडालाद्युक्तमास्यापि साधुत्वात् यत्ताग्रहणोपि साधुत्वव्यव
हाराच्च नापि धर्मजनकशब्दत्वं अपभ्रंशेपि गतत्वात् पतितोच्चार्यमाणस्यापि साधुत्वा
च्च नापि वेदस्य शब्दत्वं अपभ्रंशोऽलिशब्दे गतत्वात् संज्ञाशब्दे तदभावात् भाषायां सदवसश्च
वद्व्यादेः साधुत्वानुशासनविरोधात् सर्वेषां साधुत्वेन सप्रतियोगिकत्वानुपपत्तेश्च नहि
कचिद्विषये तद्वेदस्यं कचिन्नेति श्रूयते विरोधात् नापि व्याकरणव्युत्पादशब्दत्वं संज्ञा य
शब्दे तदभावात् साधुत्वेनासिद्धव्याकरणप्रवृत्तेः साधुत्वाज्ञाप्यस्य व्याकरण
शब्दवाच्यत्वात् उच्यते यः शब्दोईश्वरेण संकेतितः स तत्र शक्तः साधुरित्युच्यते परे
षां पदपदार्थयोः स्वाभाविकसंबंधवदस्माकमीश्वरसंकेतस्य नियामकत्वात् यथावा

 याकाचिद्दोषधीनकुलदंष्ट्रासंस्पृष्टासाविषं हंति तथाप्रतिपादकत्वाविशेषेपीश्वरसंकेति।
 ता एव शब्दो धर्मोपयोगिनः स्वभावात् तद्विषया एव साधुभिर्भाषितव्यमित्यादिविधयः ईश्व
 रसंकेतितत्ता नंच व्यवहारादुपमानात् प्रसिद्धार्थपदसामानाधिकरण्यादाप्तोपदेशाद्वव्यव
हाराद्विशब्देपि वाक्यशेषात् कोशात्तदभियुक्तेंद्रियारोग्यादिप्रणीतशब्दानुशासनाच्च ते।
षांसाधुसाधुभागएवाधिकारात् नच्चक्तं नत्रनत्वमभिप्रयोगानन्वादिति अभियुक्ताश्चये
यत्रयान्निबंधप्रयोजनाः तेत्र स्वरूपत्वादोषाणांतानेवाधिकृतामन्ता इति नवसाधुत्वसिद्धेशब्दा
नुशासनतत्सिद्धत्वंतितद्वीरित्यन्योन्याश्रयः पूर्वपूर्वशब्दाख्याख्याने न साधुत्वमवगम्योत्तरा।
नुशासनप्रवृत्तेः सर्गादौभगवत एवतत्प्रणीतव्याकरणाद्धासाधुत्वनिश्चयेनोत्तरव्याकरण
प्रवृत्तिः विश्रामविश्रमशब्दयोश्चसाधुत्वेपाणिनि वृद्धगोभिव्याकरणाविरोधेपिवोश्रमेर्विक
ल्पइष्यते इतिमहाभाष्यकारवचनादुभयमपिसाधु ननुमैत्रादिशब्दानामीश्वरसंकेतित्व
तत्वाभावाद्साधुत्वे यज्ञादौ नप्रयोगः स्यादितिचेत् न द्वादशेक्षिपितानाम् कुर्यादित्यनेन
सामान्यतस्तेषामपीश्वरसंकेतितत्वात् ननुवासुदेवशब्दस्यवसुदेवापत्ये व्याकरणेन व्युत्पा
दनान्नैवसाधुत्वं नत्वाधुनिकसंकेतविषये अपत्ये प्रकृतिप्रत्ययविकल्पना कर्तव्या तर्हि भाग
गावीशब्देपितथात्वंसंभवतीतितस्यापिसाधुत्वंस्यादितिचेत् न द्वादशेक्षिपितानामकु
र्यादिति सामान्यतस्तस्यापीश्वरसंकेतितत्वेन साधुत्वनिश्चया व्याकरणस्य तद्विशेषविष
यत्वे सत्त्व ननु गावीशब्दे तथा अपभ्रंशस्तु का संकेतितशब्दादश्वादिषु संकेतितगोशब्द
दानधर्मार्थनिश्चयः शक्तितदारोपवत्त्वं तत्रतादात्म्याभावादितिचेत् न येनशब्देनोपास्थि

तेषैंगवादि शब्दसंकेतग्रहस्तस्मादेवगवादिपदेनस्मारितादर्थप्रत्ययात् चेष्टास्मारितपदादिवेति
संप्रदायः अत्रवदंति नेश्वरसंकेतितत्वं साधुत्वं तस्यनिःप्रतियोगिकत्वेन सर्वत्रसर्वसाधुत्वाप
त्तेः नापियः शब्दोयत्रेश्वरेणसंकेतितः सतत्रसाधुः गोणालाद्विशिकयोरसाधुत्वापत्तेः
केवलयोः प्रकृतिप्रत्यययोर्वाधातिग्रामागामादेश्चसाधुत्वापत्तेः वाधतीत्यादौवसमुदायस्या
संकेतितत्वेवाधतइत्यपिनसाधुःस्यात् प्रकृतिप्रत्यययोःप्रत्येकंसंकेतात् अन्वयस्यप्रत्येक
शक्तिलभ्यत्वात् प्रत्यतप्रकृतिप्रत्ययसमुदायोनसाधुःस्यात् समुदायस्यासंकेतितत्वात् ईश्वर
संकेतमज्ञात्वापिव्याकरणव्युत्पाद्यत्वमवधार्यसाधुत्वव्यवहाराच्च शक्तत्वंसाधुत्वमित्यपिन
ईश्वरसंकेतोक्तदोषप्रसंगात् अत्रोच्यते व्याकरणव्युत्पाद्यत्वंसाधुत्वं यःशब्दोयस्मिन्नर्थे
व्याकरणव्युत्पादितःसतत्रसाधुः अत्र एवगावीशब्दोव्याकरणोक्तव्युत्पत्त्यभावमर्थंव्युत्पाद
यतिनतत्रसाधुरसाधुरप्यत्र नाप्रमपुराणादौबहुलमित्यादिनाव्याकरणेनव्युत्पादनात् के
वलप्रकृतिप्रत्यययोर्वाधातिग्रामगामादेश्चनतव्युत्पाद्यत्वं तत्प्रयोगस्यानभिधानान्निषे
धात्तच गोणालाद्विणिकयोश्चप्रयाप्रतिपादकत्वंनव्युत्पन्नमपितत्रतच्चोक्तितयोरपिसाधु
त्वे तस्माच्छक्तत्वे ईश्वरसंकेतितत्वंवाज्ञात्वापिसाधुत्वव्यवहारात्तज्ज्ञानाच्चव्यवहाराच्च
नतत्साधुत्वं किंतुव्याकरणपरिगृहीतत्वतदभावाभ्यामेवप्रामाणिकानांसाध्वसाधुव्य
वहाराताद्वेनैवतेन चसाधुशब्दस्यव्युत्पादकत्वमेवव्याकरणत्वमित्यात्माश्रयः शब्द
गुणदोषविज्ञैरभियुक्तैः प्रकृतिप्रत्ययादिपरिकल्पनयाशब्दान्वाख्यायकस्यव्याकरणा
त्वात् नचसाधुत्वेसिद्धेव्याकरणव्युत्पाद्यत्वमित्यन्योन्याश्रयः पूर्वपूर्वव्याकरणातःसाधुत्वम

त॰चि॰म॰ वगम्योत्तर व्याकरणेन व्युत्पादनमित्युक्तत्वाच्च ननु तद्धीजनकतावच्छेदिकायाः शक्तेः तद्धी- श॰वि॰
७५ जनकताविषयकेश्वरसंकेतस्य वा ज्ञानादर्थप्रत्यय इत्यावश्यकत्वात् लाघवाच्च तद्धी-
75 जनकत्वज्ञानमेवार्थप्रतीतौ हेतुरस्तु किं शक्तेरीश्वरसंकेतस्य वा ज्ञानेन अन्यथा मी-
मांसकस्य शक्तिज्ञानादर्थप्रत्ययो नैय्यायिकस्येश्वरसंकेतज्ञानादिति व्यभिचारेणैकस्या-
पि कारणतानस्यात् अत एव लौकिकानां शक्तीश्वरसंकेताज्ञानेपि वृद्धव्यवहारादर्थज्ञाने
शब्दस्य जनकत्वमवधार्य शब्दादर्थप्रत्ययः न चैवं लक्षणोच्छेदे गंगापदाद्धिलंवितार्थधी-
वा र्न स्यादिति वाच्यं लाक्षणिकस्यानुभावकत्वात् तथात्वेपि तीरज्ञानजनकत्वेन ज्ञानस्य न तीरज्ञा-
पकत्वं किंतु प्रवाहज्ञापकत्वेन लाघवात् अथ ज्ञानजनकताज्ञाप्यसंबंधाधीना अस्मदादौ तथा-
दर्शनादिति संबंधत्वेन शक्तिसंकेतयोरन्यतरसिद्धिरितिचेत् न तद्धीजनकत्वेन ज्ञातत्वस्यैव
संबंधत्वात् न च तद्धीजनकत्वमेव नम्रत्ते संबंधज्ञानं विनैवेति वाच्यं तदापि ज्ञानजनकत्व
ज्ञानेनैव ज्ञप्त्यादिवत् अत्रापि संबंधत्वेन शक्तिकल्पनात् अन्यथान्योन्याश्रयः संबंधज्ञाने
जनकत्व सति ज्ञानं तस्मिंश्च सति संबंधज्ञानात् यथार्थतद्धीजनकत्वज्ञानं यत्र भवति तत्र तत्पूर्वं संबं-
धो नास्त्येवेति चेत् अस्त्येव पूर्वपूर्वं यान्तद्धीजनकत्वेन ज्ञानत्वस्य एवं पूर्वमपि सत्त्वात् एतावता
शक्तिः संकेतो वा संबंधोस्तु तथापि तद्बोधस्य नार्थप्रत्यायकत्वं गौरवात् किंतु तद्विषयकधी-
जनकत्वज्ञानस्यैव एवं च पदधीजनकत्वेन ज्ञानं यत्पदं यदनुभवं जनयति तथैव न तत्र शक्तत्वं
ननु शक्तिरीश्वरसंकेतो वा ति उच्यते देवदत्तादिपदादर्थबुद्धौ संकेतज्ञानस्य कारणत्वावधार-
णादन्यत्रापि तत्कल्पनात् नहि अस्माद्धदाद्‌वमर्थो वो द्धव्य इति यत्र तत्र संकेतः मद्बोधकेनात्

तत्तदर्थप्रत्ययः संकेतज्ञानात्पूर्वं तत्प्रयोजनकत्वस्य नन्तुहस्यवाऽसंभवात् सादिपदेष्वनन्यथा अत्र
नादिपदेष्वर्थप्रत्ययस्यान्यथापि भावात् ननत्वकस्यनेतिचेत् न पदत्वस्यैव प्रयोजकत्वे संभ
वति तत्रविशेषणेगौरवात् संकेतएवमुख्यावृत्तिः तात्पर्यनिर्वाहकत्वात् अन्वयशक्तियोग्यपरस्या
पकत्वाच्च लक्षणाचवृत्त्यंतरं यत्रवाक्यार्थान्वयानुपपत्त्यावाच्यस्यसंबंधोपस्थापिते वाक्यार्था
न्वयः यथागंगायांघोषइत्यत्रगंगापदस्यतीरे ननुच्यते वाक्यार्थस्यतुवाच्यार्थसंबंधानुपप
त्तितः तत्संबंधवशाप्राप्तस्यान्वयाल्लक्षणोच्यते अथतीरशाब्दजन्योपस्थितेः शक्तिसाध्यत्वा
त् अन्यथाननत्रप्राबल्यं तात्पर्यंवा तयोः शक्यनियतत्वात् किंच तीरयदि तात्पर्यम
वधृतंतदातन्निर्वाहकत्वेनशक्तिरेवकल्प्या क्लृप्तत्वादित्यनादिपदवत् नानार्थनैवयुक्ता न
चक्लृप्तवृत्त्यंतरंकल्पनमिति उच्यते गंगापदस्यलक्षणीयतीरादिसहस्रेषुप्रत्येकंशक्तिकल्पने तन्नुर्थ हा =
लक्षणीयेषुप्रत्येकंवृद्धव्यवहारांतरापेक्षापिस्यात् तथाचगौरवमननुभवश्च लक्षणानुशक्यसंबं
धरूपैकार्थलक्षणीयविषयकवृद्धव्यवहारांतरानपेक्षात्वात्तिलाघवात् सैवयुक्ता नचगौरवमपिव्या
प्यंप्रामाणिकत्वात् लक्ष्यत्वाभिमतान्वयबोधस्यशक्तिग्रहंविनानुपपत्तेः लक्षणायाः क्वापिकार
णत्वाग्रहादितिवाच्यं शक्तिंविनापितीरान्वयबोधोपपत्तेः तथाहि व्युत्पन्नोनिरूपितान्वयभा
वस्यगंगायांघोषः प्रतिवसतीतिवाक्यंश्रुत्वादिश्यति इदंप्रमाणं आप्तोक्तत्वात् संभवतीवे
दंतथा यथावस्त्रेणापिधेहीत्यत्रकर्मतापन्नद्वारेव्याहृतेयोग्यइतरपदैः स्वार्थान्वयबोध
ते तथाशक्त्यागंगापदस्मारितमुख्यार्थस्मारिततीरे योग्याकांक्षितेइतरपदैः स्वार्थान्वयबो
धोत्रापिसंभवतीति ततोमुख्यार्थस्मारिततीरेघोषादिपदैः स्वार्थान्वयबुद्धिरस्योत्पाद्यते एवं

किंच शक्तिग्राहकव्याकरणस्य सत्वात्तत्य साधारणत्वात् पदानां संबंध
वाक्यार्थान्वयबोधकत्वं बोध्यते -- पंक्ति ६

यतीरान्वितवाक्यार्थबुद्धिः तीरप्रतीतिवद्वृद्धव्यवहारादिदर्शनं विनैव जायते यदानं स्मृतयोग्याभि
तस्यार्थप्रतिपादनेऽस्य प्रागेव व्युत्पन्नत्वात् एवं च तीरस्मृत्यनुभवयोः शक्यसंबंधज्ञानादेवोपपत्ते
र्नशक्तिः स्वार्थसंबंध एव लक्षणा पश्चात्तु परं परया गंगासंबंधितीरं प्रतिपत्तयेऽनेनोक्तमगंगाप
दं प्रयुक्तमिति तात्पर्यधीर्जायते गंगास्मारिततीरान्वयबोधश्च न तात्पर्यज्ञानमपेक्षते न्यायत एव
तीरस्य प्रथमं वाक्यार्थान्वयबोधोपपत्तेः अन्यथानिश्चितेऽस्यार्थसंबंधिनोऽन्वये तद्विशेषज्ञाना
र्थं तदपेक्षास्तु न वा तदर्थमपि योग्यतादेरेव तद्विशेषलाभात् अन्यथानुपस्थितविशेषेता
त्पर्यस्यापि ज्ञातुमशक्यत्वात् शक्तिस्मारितप्राक्संबंधो वा तज्ज्ञाप्यशाक्यसंबंधस्मृतिर्वा लक्षणा
उभयथापि लक्षकपदस्य तद्द्वितात्पर्यज्ञानं लक्षणायामप्रयुक्तमेव उक्तन्यायेन शब्दात्परं परया
शाक्यस्मृतेः तात्पर्यग्रहात् पूर्वमेव तद्व्यापकारणादुत्पत्तेः शक्योपस्थापितार्थे शब्दतात्पर्याल्लक्ष
णा भवति तात्पर्यानुपपत्तिरिति च लक्षणास्थले लक्ष्यवस्तुतः तात्पर्यमस्तीत्येवं परं न त्वेवं ता
त्पर्यानपेक्षणोपपन्नतीरं बोधान्वययोग्यं तत्र कदाचित्तीरान्वयबोधोऽपि न इति चेत् शक्यमुपस्थि ५८
तियोग्यकं प्रतितत्तेनैवान्विताभिधानमिति व्युत्पत्तेः शाब्दत्वं तीरस्याध्याहृतस्येव इतरपदैस्ती
रान्वितस्यार्थान्तराभिधानात् तदेवं वृद्धव्यवहारादिदर्शनं विनैव तीरादौ लक्षणेति स्थिते अत्र
यदा यदा गंगायां घोषः प्रतिपन्नमानयत्तिवाक्यानंतरं प्रयोजनस्य तीरोषितघोषानयने प्रवृत्तिरुप
लभ्यते किं तीरेपि गंगापदस्य शक्तितत्स्वार्थेन संबंधात् स्मारिततीरे तात्पर्यमात्रं तीरान्विताभिधानं तु य
द्यत्नैरेवमप्ययोग्यार्थपरत्वाभावेन ग्रामारोपादारोक्तलोपपत्तेरितिविकाचित्किन्नवाल: तीरादौ
न शक्तिः तथा सत्येकार्थसंबंधिमुवकुंठकपदस्य वक्ष्ये शक्तिरेवं यदा तरेन्मतेऽभ्युपशक्तिग्रहार्थवद्

व्यवहारापेक्षात्र तथा सैव गौरवं अतस्तदर्थसंबंधिनितीरादौ तात्पर्यमात्रं लाघवादितितत्र लक्षणा

मेवकल्पयति यस्यचैवंविमर्षः अप्रसंलक्षणिकपदश्रवणे न जायते तस्य तत्र शक्तिबुद्धावपि यदाल

क्षणाख्यवृत्त्यंतरज्ञानं पूर्वोक्तन्यायेन जायते तदाप्रसावगतशक्तिज्ञानं ममभ्रम इति कल्पयति लाघ

वादिति अन्यत्र तु यत्र प्रयमावगतस्य सत्यत्वकल्पनं तदुपपादककल्पनं च तल्लाघवादेवात्र तु न तथा

ऽन्यथा संबंधि सहस्रेष्वपि शक्तिकल्पनाप्रसंगात् एवं च लक्षणास्थलेपि यस्य प्रयोज्य व्यवहारादा प्राबु

त्पत्तिस्तीरादौ स यदा तीरनीरयोरन्वयबोधयोग्यप्रयोगे नीरव्यवहारं पश्यति तदा तत्रैव शक्तिस्तीरधी

स्तु प्रयोज्यस्य लक्षणावत्सा शान्मम तदनां गच्छत्वेभयत्र शक्तिरेव न लक्षणा तुल्यवद्युत्पत्तेरेकत्रा

प्रत्यक्षोपमर्दहेत्वभावात् यत्र तु न तथा तत्र अनेकार्थत्वमेवा क्षादिपदे तावदन्यतरत्वं तत्राव

गतमस्तीतिचेत् न तावदन्योन्याभाववदन्यत्वं हि तत्तु न च तावदन्योन्याभाववदन्यत्वेन रूपेण

तावता पदादुपस्थितिः किंतु प्रत्येकत्वेनैव किंच यदि तीरेपि शक्तिस्तदा सन्नीरमात्रे किं तु गंगा

तीरे तथा च विशिष्टशक्तौ विशेषणशक्तिराजन्यकीनाग्रही तविशेषणान्यायात् अन्यलक्षणापक्षे

यथा प्रवाहे शोपलक्षणेनव्यावृत्ततीरविशेषस्यान्वयेन तीरांतरस्य तथा प्रवाहोपलक्षिततीरे शक्तिरस्तु न

तु तीरे प्रवाहेपीतिचेत् गंगापदशक्तौ प्रवाहस्य शाक्यत्वेन विशेषणत्वसंभवति नोपलक्षणत्वं विशेषणत्वासंभ

वे सत्येवोपलक्षणत्वादतः प्रवाह एव शक्तिः किंच तीरे शक्तावुपलक्षणत्वं प्रवाहस्य न शक्यतावच्छेदकत्वं

शक्यावर्तमानत्वात् नापि धेनुपदे गोत्वस्येव शक्त्युपाधित्वं गौरवात् अन्ये तु नीरे तीरे च व्यवहार एव

विलक्षणः तीरे ऽनुपपत्तिं विनैव व्यवहारो निरुपाधित्वाच्छक्त्युपपाद्यः तीरे त्वनुपपत्त्या हि सोपाधिक एव व्य

वहारः स च शक्त्यभावोपपाद्य इति तन्न लक्षणायामव्युत्पन्नो बालः प्रयोजयस्य तीराविता न यनावि

कलनात्र तत्र शक्तिज्ञानं भ्रम इति कल्पयति यत्र तु भयानुगत मेकमवच्छेदक मस्ति उभयत्र प्रयोगः ८

77

व्यवहारं पश्यत् अन्यत्र दृष्टां शक्तिं कथं न कल्पयेत् अथ लक्षणया तीरत्वेनोपस्थितौ तीरान्तरान्वयोऽपि
स्यात् गंगातीरत्वेनोपस्थितौ तु गंगापदवृत्तिद्वयविरोधः गंगोपस्थितेः शक्तिसाध्यत्वादिति चेत् न लक्षणाधीन
तीरस्मृतेर्हि न गंगासंबंधित्वेन तीरं विषयः किंतु यद्वस्तुतया गंगासंबंधितदेव तीरत्वेन परिधीयते संबंधिद
र्शनजस्मृतेस्तत्संबंध्यविषयत्वात् यथा पदं हस्तिदर्शनात् पदार्थहस्तिपकस्मृतेर्न पदहस्तिविषयत्वं अ
त एव तीरान्वितवाक्यार्थबोधेऽपि न गंगासंबंधित्वेन तीरं विषयः अपि च गंगायामित्यादिपदानामाकां
क्षत्वेन प्रामाण्यात् संसर्गपदप्रतिपाद्यान्वयबोधकत्वरूपमेकवाक्यत्वमवगतं मुख्यार्थस्यायोग्य इति
योग्यमाकांक्षितं चामुख्यार्थोऽपि पदप्रतिपाद्यः कल्प्यते अन्यथैकवाक्यत्वभंगप्रसंगात् न चापदार्थे
नैव योग्यतादिमतान्वयबोधकत्वमस्तीति वाक्यं गंगापदवैयर्थ्यप्रसंगात् प्रतिपाद्यतावल्लक्षणीयस्य
लक्ष्येनैव स्वार्थसंबंधेन न तु शक्त्या गौरवात् तदन्वयबोधश्चेतरपदेनैव शक्त्या पदोपस्थापितस्य पदे
नान्वयो बोध्यतेऽन्यत्र तथादर्शनादिति चेत् न लाघवेन पदोपस्थापितस्यैव तंत्रत्वात् यथा च
लाक्षणिकस्य पदान्तरेणान्वयप्रतिपादकत्वे अननुभावकत्वात् लक्ष्यस्मृतौ संसर्गकारित्वं अ
त एवनैराकांक्षत्वमपि तथापि घोषादिपदानां समभिव्याहृतपदप्रतिपाद्यान्वयबोधकत्वमवगतं तच्च न
लक्षणां विनेति तां कल्पयति यच्च सामान्यतो गंगादिपदार्थान्वयोऽज्ञात इति तच्छक्यार्थपरंपरया गंगादिपद
स्मारितेनैव तीरादौ लक्षणा कल्प्यत इति तत्र प्रथमं गंगापदार्थान्वयबोधकाभावात् अन्वयबोधेऽपि लक्षणाया
गंगापरिच्छिन्नतीरस्य घोषान्वयबोधेऽपि गंगाया अन्वयबोधाविषयत्वेन तदन्वयस्यास्मारकत्वात् यच्च गं
गायां घोष इत्यादेरेकवाक्यत्वं पदस्मारितार्थान्वयबोधकत्वरूपमवगतं तच्च यद्यपि गंगापदार्थस्य सा
क्षाद्घोषाधारत्वायोग्यत्वान्न संभवति तथापि गंगासंबंधितीरे योग्यघोषान्वयात्तीरावच्छेदकतया

गंगापदार्थस्य घोषान्वयादेकवाक्यत्वं संभवति अत एवाक्यत्वस्य सामान्यतोवगतपदार्थान्वयस्य च रक्ता
र्थगंगापदस्मारितस्वार्थसान्वययोग्ये समभिव्याहृते प्रकरणादेरनुपयुक्तत्वात् अपिच अध्याहारेऽप्य
नुपस्थापितेनान्वितत्वाभिधानमस्तु तस्यापदार्थत्वे पीत्तरपदैरन्वयबोधात् अत्र तत्स्वरूपपदार्थत्वमेव
स्यं वाच्यं न त्वप्रत्यंतर्भावादेकमन्यथा गामुच्चारयेत्यादौ द्वितीया अधाबाकीयंत्तामेत्यादौ प्रत्ययोनस्या
त् अर्थप्रत्ययत्वेनाप्रतिपदिकत्वात् तस्मादम् ------ प्रत्ययानुशासनात् गौरस्तीत्यादौ उभयपरत्व -- किंच
------ परत्वमेवस्यात् तस्य प्रत्यन्नेरातशीघ्रमुपस्थितत्वात् प्रत्ययमूले स्मृतपदार्थस्यान्वयोभ
वतीति चेत् उक्तदोषात् ------------ णस्यान्वयपरत्वानियमात्च तस्परतन्निधानस्यान्विता
भिधानोपयुक्तत्वात् किं विभक्त्युपनीतान्वयप्र ---------------- ना उपस्थितस्याकांक्षादि उ
विरहेणाक्रियान्वयोमेस्यात् स्मअपदे द्वितीयार्थकर्मत्वान्वय इतिचेत् न विभक्तेः ---------- तस्वार्थान्व
बोधकत्वस्य व्युत्पत्तिसिद्धत्वात् अत एव गंगायामित्यत्र सप्तम्यर्थान्वयार्थ तीरे लक्षणा अन्यथा त्वदुपनीत
तीरस्यान्वयबोधसंभवे लक्षणोच्छेदः मन्वेवं जवगडदशमाहेत्य -- नरर्थकस्य लक्षणानस्यात् स्वार्थसं
बंधाभावात् प्रत्ययोपस्थितेस्मृतेवा स्वरूपे क्रियान्वय इति दूषितमेवेतिचेत् न नहि जवगडदशमाहे
त्यत्र समुदाये क्रियान्वयः समुदायस्योच्चारणासंभवात् किंतु संघटनंतरमस्तुतक्रियापदेन प्रत्येकैकवर्णा
स्यार्थान्वयबोधनं प्रत्येकवर्णस्य च शक्तत्वेन स्वार्थसंबंधादेवस्य स्मितूलक्षणा स्तोमेप्येवं स्वार्थ
संबंधाग्रहेच स्वरूपोपस्थितिः शक्तिभ्रमात् निरर्थकस्य स्वरूपेशक्तिरेव वृत्त्यंतरं विनैवोपस्थितेः शा
क्तितावच्छेदकत्वादित्यप्याहुः अन्ये तु पदस्य स्वबोधकत्वं वृत्तिं विनैव अन्येन हि अन्यबोधके ति प्रसंगाद्वृत्ति
कल्पनं स्वबोधकत्वे च न तथा यथा घटस्य स्वबोधकत्वं समसंबंधं विनैव एवं च समबोधि स्मिन् विभ
त्वं तेत्व

स्यर्थान्वयोपि नचपदस्यत्वभावात् स्वबोधकत्वे सर्वत्र स्वबोधप्रसंग इतिवाच्यं इत्यादिपदस्यार्थान्वयानुप
पत्त्यादेः सहकारित्वात् यथाघटस्यस्वबोधकत्वे इंद्रियसंबंधाद्यपेक्षेति यत्तुस्वार्थसंबंधिवितात्पर्यं लक्षणा
तात्पर्यं वतत्प्रतीतिमुद्दिश्यउच्चरितत्वमिति तन्न लक्षणस्य तयेहिलक्षणासाचस्वार्थसंबंधितानादेवे
त्य ------ व्यर्थत्वात् संबंधिधीःसंबंधिस्मृतिहेतुःक्लृप्ता नतुतत्तात्पर्यधीरपि तस्यालक्ष्यस्मृति
नन्यत्वेनान्योन्याश्रयप्रसंग --------- नंचलक्षणाबीजानुपपत्तिज्ञानेऽन्वयानुभवेवोपयुक्तं
अतोऽस्याक्योपस्थिति तर्हिहेतुश्चाक्यसंबंधोव ------------- तात्पर्यमनुपयुक्तमेव लक्ष्यतात्प
र्यात् लक्षणातात्पर्यांद्वि वृत्तिरितिनुलक्षणास्थलेवक्तुतोलक्ष्ये ------------- तत्परं किंचैवं
सर्वेपितत्तात्पर्यकत्वमेव वृत्तिरस्त्वाकिंशक्त्या तात्पर्यमेववृत्तिंविनाननिर्वहतीतिमत्र --------
---- वादितिचेत् तर्हिलक्षणापितन्निर्वाहिकैव नतुनदेव अपिच तात्पर्यानुपपत्तिर्लक्षणाबीजं
नचतदनुपपत्तिरेवतद्बीजंविरोधात् अतएवापाक्येतात्पर्येनलक्षणा वृत्तेस्तात्पर्यनिर्वाहकत्वा
त् निर्वाहकंसंबंधमपश्यत अपास्यतात्पर्याभावात् शक्त्याशाक्यसंबंधेनवापदादयमर्थज्ञानाति
त्यपि प्रायेणापदप्रयोगोनतुतात्पर्यादिवायम - मर्थज्ञान - ीति भुध्यारंभिया तात्पर्यमात्रस्यवृत्तित्वे
सर्वस्यसर्वत्रप्रयोगेनानःर्थोक्तेदश्च स्वार्थसंबंधेनेदंपदपदार्थंबोधयिष्य ----- रपिपामेतदक्ष
णा तद -- पज्ञानंविनाप्रोतलक्ष्यानुपस्थितेरित्यन्ये तन्न अयमभिप्रायःप्रयो ------ य
थाशक्त्यायमर्थंबोधयि ---- त्याभिप्रायः - नुसएवलक्षणागौरवात् किंतुस्वार्थसंबंधएवलक्ष
णा -------- पस्थितिसंभवात् वृत्तस्तत्रैवोपयोगात् तस्यवाबोधकत्वेस्वार्थसंबंधेनायंबो
धयिष्यतीत्या ----- वात् वक्तानाप्तःस्यात् तात्पर्यधीस्त्वन्वयबोधेतुरितिउक्तं शाक्यसंबंधश्चा
हे

विनाभाव एव यष्टीः प्रवेशय — वाः कोशान्तीत्यपि प्रवेशनक्रोशनसमये यष्टीघरमंचस्य कुरुषयोर्थ
क्षिर्मवाविनाभाव एव एवं च्छत्रिणो गंधंतीतिकाकेभ्यो दधिरक्षतीमित्यत्राजहत्स्वार्थलक्षणायामपि
शक्तिग्राह्याः मंचस्थपुरुषगतत्वेनाथछत्रिणोऽविनाभाव एव काककुक्कुरादीनां दध्युपघातकत्वेन तुल्य
तु परस्थितिसमये काकस्य कुक्कुरादिषाविनाभावः यत्र तु पघातकत्वेन काकमात्रमुपस्थितं न कुक्कुरादि त
त्र काकपदे दध्युपघातकत्वे लक्षणापि नास्ति दध्युपघातकत्वेनानार्द्रि ताद्रक्षणोपदेशान हित्वादि
ति संप्रदायः वस्तुतस्तु शक्यसंबंध एव लक्षणा अतिप्रसंगश्च संबंधस्याविनाभावरूपत्वेपि तात्पर्या
दन्वयनियमः शक्यसंबंधमात्रलक्षणापक्षेपि लक्षणाबीजं तात्पर्यानुपपत्तिः पदस्य वृत्तिं विना लक्ष्ये ।
तात्पर्यानिर्वाहात् न तु शक्यान्वयायोग्यत्वं बीजं यष्टीः प्रवेशयेत्यादौ अजहत्स्वार्थायां च यष्ट्या घन्व — शाक्य
ययोग्यत्वेपि लक्षणासत्त्वात् तात्पर्यानुपपत्तिस्तत्रापि लक्ष्ये तात्पर्यं विना लक्षणानुदयादिति संप्रदायः
वस्तुतोऽन्वयपरत्वमात्रस्य मुख्येन्वयायोग्यत्वमेव लक्षणाबीजं गंगायां घोष इत्यादौ पूर्वोक्तन्याय । शब्दः
येन लक्ष्ये तात्पर्यग्रहात् पूर्वमेव मुख्यस्यान्वयायोग्यत्वज्ञानेन लक्षणोपपादनात् अस्तु व — — — पि लक्ष्ये
तात्पर्यग्रहः न — — — मुख्येऽन्वयानुपपत्तिरेव लक्षणाबीजं प्रथमोपस्थितत्वात् तात्पर्या — — —
— — — — — — — लक्षणाबीजत्वसंभवात् — — — ः प्रवेशय — — — अजहत्स्वार्थायां च मुख्यान्वयानुपपत्तिरेव
तथा हि येन प्रवे — — — — नाप्रवेशयेत्यस्य भोक्तृप्रवेशनस्यैव परत्वं यांतीत्यस्य छत्रितदितरघटितगमनस्य
मुख्यकत्वपरत्वं च ज्ञातांतर — — — — — — — नगमनयोरन्वयायोग्यावेव यष्टिछत्रिणो अपचकरणादिनै ।
वेतरपदवयष्टिछत्रिपदयोरपि लक्ष्ये तात्पर्य — — — तन तत्तदनुपपत्तिरेव लक्षणाबीजमिति चेत् न लक्ष
णातः पूर्वमवश्यं लक्ष्योपस्थितौ तत्र तात्पर्यग्रहे वा — नाभावात् लक्षणायाः चान्यथापि संभवात्
भावो वा तत्रा[illegible] भयानुपपत्तिस्तथापि अन्वयानुपपत्तिरेव लक्षणाबीजं गंगायां घोष इत्यादौ पूर्वोक्त
नि

त॰चि॰म॰ न्यायेन तात्पर्यग्रहात् पूर्वमेव मुख्यार्थस्यानुपपत्तेः क्लृप्तत्वात् ननु पदार्थविशेषस्मृतौ तदन्वयबोधे वा शा॰ शि॰
७९ प्रकरणादेः सहकारिता ननु तात्पर्यग्रह इति चेत् न प्राबल्ये ऽननुगमात् तात्पर्यग्रहे तु तद्व्याप्यत्वेनानु
79 गमात् तात्पर्यव्याप्यत्वग्रहे तात्पर्यग्रहः संभवत्येव वृक्षौ हौ चित्रगोपदार्थस्यान्वययोग्यत्वादन्यपदार्
र्थे तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति चेत् न तत्रापि चित्रगोस्वाम्य-- यन पद-- न-- पंप
दार्था--- पपत्तिः यद्यपि लक्षणायाम् अयोग्यत्ववान्निराकांक्षत्वमप्यस्ति ------------ शा॰ शोणइत्यत्र
स्यानिविडाधाराकांक्षि ------- णाकांक्षा एवं समूहगमनस्य छत्रि --------------- परिस
माप्तेः तथा --- मयं निमित्तं अन्यतरज्ञानेपि लक्षणा- भावात् नैकैकमेव निमित्तं अननुगमात्
अ ---------------- ते न चानुगमेऽन्वयानुपपत्तिरेव लक्षणाबीजं तस्या उभ--- सत्वात्
लक्षणास्थले यस्मृत शक्यान्वय ---------------- पदात्पुनः शक्यस्मृतिः स्मृत शक्यात् स्व
संबंधेन तीरस्मृतिः शक्तेः शक्यस्मृतौ प्रवाहस्य संबंधेन ----------- र्थावधारणात् अ
तः शक्यस्मारितत्तीरस्येतर --- देवान्वयबोधः अत एव ला -लिकं पदं नानुभा ---- न्वयप्र
तियोगिनस्तीरस्य ततोऽनुपस्थितेः अन्वयप्रतियोगिपस्थापकत्वेन पदानामन्वयानुभावकत्वा दे
त् न च गंगापदात् स्वशक्यसंबंधेन प्रथमं तीरस्मृतिरेव पुनस्तत्स्मरणे गौरवादिति वाच्यं
पदस्य स्वशक्यसंबंधेनान्वयप्रतियोगिस्मारकत्वाकल्पनात् न चैवं तत्कल्पनं लक्षकारणतावत्स्मृति
द्वयादेव तीरोपस्थितिसंभवादिति वाच्यं तत्र गंगापदात्तीरानुपस्थितौ तत्र ------- न्वयानुपपत्तिः
कृ॰ विभक्तेः प्रत्युपनीतस्वार्थान्वयबोधकव्युत्पत्तेः प्रकृत्यर्थोपस्थापकस्यापि विभक्त्यर्थान्वये --
---------- अवश्यानयप्रकृतितात्पर्यविषयस्वार्थान्वयबोधकत्वं विभक्तानां गौरवात्
एवं च प्रकृत्यर्थे विभक्त्य ---------------- एवं कृप्तं तीरस्मारिकत्वेन कन्या वे - न चैव
संबंध

वंगंगापदात्साक्षात्तीरोपस्थितौ शक्तिस्त --------------- स्थितिसंभवात् ---- वं अन्वयप्रति-
योग्युप ---- कतयेतरपदवत् लाक्षणिकपदमप्यनुभावकं स्या ---- न इतरपदार्थैः सह --
--- न्वयबोधकत्वेन कुम्भादि - रपदादेव तीरानुभवसंभवेन लाक्षणिकानामननुभावकत्वात्
स्यशक्यान्वयानुभवे -- नांकारणात्त्वावधारणात् अथयदि गंगापदेनान्वयबोधकं तदा गंगापदोत
भावेन संभूयान्वयबोधकत्वलक्षणानैकवाक्यत्वेन वा प्रमाणान्तं तथा चतुरुभयरक्षार्थं नलक्षणा कल्प
नां न च परंपरया साक्षाद्वा अन्वयउभयप्रतियोगिस्मृतिहेतुत्वेन प्रमाणत्वं स्मृतेरप्रमात्वात् - न चैक
वाक्यत्वं वाक्यभेदेऽपि पदार्थस्मृति सत्वादिति चेत् आद्योक्तत्वात् गंगापदांतर्भाविनान्वयप्रमाप्रयोजकत्वं सं
भूयान्वयप्रमाप्रयोजकत्वं संभूयान्वयबोधप्रयोजनकत्वं च गृहीतं तदुभयमपि तीरोपस्थितिद्वारा संभ
वति न व्याकुलं लाक्षणिकमप्यनुभावकं न चैवं ज्ञाने शक्तिः शक्यत्वादिति लक्ष्यमपि शक्यं स्यात्
प्रवाहशक्तत्वेन ज्ञातादेव गंगापदाच्छक्तिं विनापि तीरानुभवसंभवात् यथा परेषां ज्ञानानि शक्तत्वेन ज्ञाना
देव व्यक्त्यनुभवसंभवात् यथा वास्माकं पदार्थशक्तयेन ज्ञातादेव पदादन्वयानुभवसंभवात् अव्यक्त्य
न्वययोः शक्तिरिति क्वचिद्योगार्थान्वयसंभवेऽपि रूढिः हविकालक्षणाख्या मंडपभोजये च अवयवार्थग्रह य
विशेषस्यान्वयायोग्यत्वात् द्रव्यपर्गृह संबंधित्वानैलक्षणां या मंडपपदेन क्रियते ननु योगात् मंडपानक
र्तरिति मीमांसकाः ननु रूढिः हविकालक्षणानयुक्ता श्रोतार्थपरत्वे संभवति लक्षणाया अन्याय्यत्वा
त् रूढ्यायोगापहारात्तलक्षणेति चेत् न अपहारोहि नियौगिकार्थस्मृतेः स्मारकसंबंधस्य शक्तेः मुख्यते=
दार्थद्रव्ययौगिकेऽपि सत्वात् नापि यौगिकार्थस्य प्रथमस्मृतिः यदेव हि समुदायेन स्वार्थस्मारणं तदावय
वैरपि स्मारकज्ञानेऽवयवानामपि विषयत्वात् प्रस्तुतावयवैरेव प्रथमं स्वार्थस्मारणं अवयवज्ञानस्यापि
कत्वात्समुदाय -- नस्याविलम्बेऽपि ------ न लक्षणाया स्वार्थसंबंधिस्मरणं तदा --- कार्यस्मरणं वा

त॰ चि॰ म॰ चं ------ कान्वयाभि-- यकत्वानुरोधाद्योगार्थबोध एवास्तु नापि समुदायस्यावयवार्थ शा॰ वि
८॰ स्यान्वयबोधबहिर्भूतत्व ------- योग्यतादिबलादवयवार्थान्वयबोधः स्यादेव नतु रू
दा= ढ्यर्थस्य अयोग्यत्वात् नापि लक्षणा -- तत्स्मारितार्थे त्वालाक्षणिकस्यानुभावकत्वात्
80 अपि च मंडपशब्दस्य गृहविशेषे प्रयोगदर्शनात् अवयवशक्त्या च तदनिर्वाहात् समुदाये
शक्तिकल्पना तथा च मंडपानकर्त्तरि तथापि योगे प्रयोगस्यादर्शनात् तत्रावयवशक्तिकुं
ठनमपि कल्प्ये कार्यान्तरोधित्वात्कल्पनायाः अन्यथाऽन्ये कार्यरूढ्याऽन्नादिपदादिवत्
क्वचित् मंडपानकर्त्तर्यपि वा गमः स्यात् बहुव्रीहौ समुदायशक्ताव -------- शक्तिकुं
ठनं अवयवार्थे लंबकर्णादौ प्रयोगप्राचुर्यात् कुंठनस्य प्रयोगाभावकल्प्यत्वात् एवं च
मंडपादिपदेऽ ---------- कुंठितत्वात् रूढ्यर्थस्योपस्थितस्य परंपरयापि वाक्यार्थे प्रतीत्य
न्वयायत्तत्त्वविकाल न तरोतीति चेत् तन्नोपपत्ति ---- यत्र सा वैश्वदे -- मिक्षा वाजिभ्योव ---
--- त्वमिक्षा भाउत्पत्ति शिष्टत्वेन विश्वेदेव - वर्षं वाजमन्त्र मामिक्षारूपे तद्देशामक्तिने विश्वेदेवा एव
त्तिचतुर्थ्यंतवा ------ रोनामिक्षा ------- नां विश्वेदेवानामुपस्थितेर्वाजिनस्यापि विश्वेदेवदेवता
कत्वमेव नतु वाजिनपदात् रूढ्योपस्थितानामश्वानां वाजिनदेवतात्वमिति सिद्धांतः स न स्यात् रूढ्या
योगापहारादश्वानामेव तत्र देवतात्वापत्तेः न चात्र लंबकर्णादिपदवत् वाजिपदस्य विश्वेदेवेषु प्र
योगप्राचुर्यमस्ति अथान्वयप्रकारो विभक्त्योपनीयते सा च यत्र॰ समभिव्याहृतानां तस्यान्वयबोध
यति विभक्तिश्च समुदायात् अतः समुदायोपनीतस्य रूढ्यर्थस्यैवान्वयबोधो न योगोपनीतस्ये
ति चेत् न पंकजनिकर्त्तरि व मंडपानकर्त्तर्यन्वयबोधसंभवात् नन्ववयवानां परस्परमन्वा
योयोग्यतादिसापेक्षतया विलंबितो रूढ्यर्थधीस्तु न तथेति चेत् अस्तु तावदवयवार्थस्यान्वयधीर्वि

लंबितानन्तरस्मृतिरूपापि साचान्वयबोधोपयोगिनी एवं च यथा पंकजमानयेत्यत्र प्रथमं मंडार्थ
वाक्यार्थधीः ततस्तदर्थितन्नर्थस्तदनु च परंपरया तत्पाद्भूतजन्मानि पंकपदार्थान्वयधीः कार्या
न्वितव्युत्पत्त्यनुरोधात् न तु प्रसिद्धपंकजन्मकर्तृत्वानां प्रथममन्वयधीः तथा मंडपपदे प्यस्ति य-
दि च तत्र प्राथम्येन्वयधीर्योग्यतादिवशाभ्यदा रूढ्यर्थावयवार्थानां स्मृतानां वयवार्थान्वयबोध
संभवात् रूढ्यर्थान्वयबोधस्य इतरपदतदर्थस्मरणाकांक्षायोग्यतादिज्ञानसापेक्षतया वि-
लंबितत्वात् अप्ययावत्तद्वर्णोपेक्षकाशक्तिस्तावत्तांवर्णानां स्मृतिरप्येकैकवर्णबलात्कल्प्य
ते अत एकदा स्मृतसमुदायनिष्ठशक्तिस्मृतिः शीघ्रा अवयवशक्तीनां तु स्मृतिः किंचिद्य
कतिचिद्वर्णस्मृतावितिविलंब इति चेत् न यथा हि मंडपसमुदायगोचराएकास्मृतिस्तथा
मंडादिपदविषयापीति न कश्चिद्विशेषः अतः कथं योगाद्रूढेर्बलवत्त्वमिति उच्यते यदा मं-
डपपदाद्रूढिविशेषस्मृतिः तदैव मंडार्थे पत्तितनिः तत उत्तरं पिबत्यर्थस्य तदनंतरं उपस्थापया
र्थस्य ततो मंडपानकर्तृत्वेन ज्ञानस्य स्मृतिस्तदेवं रूढियौगिकयोर्बलाबलं शीघ्रविलंबितधीकृतमेवा-
तथा च रूढ्यर्थस्य शीघ्रमुपस्थितत्वात् बलवत्त्वमौत्सर्गिकं यत्र तु प्रकरणादिना यौगिकार्थस्य
शीघ्रं धीविषयता तत्र रूढेर्योग एव बलवान् यथाऽग्निर्वृत्राणि सोमो रुद्रैरिंद्रो मरुद्भि[illegible]ताम्राः वै=
दिन्त्यैर्द्ध स्यातां विश्वेदेवैः पित्यत्र विश्वेदेवपदाद्योगेन सकलदेवप्रतिपादकात् प्रकरणबलेन स-
त्रिणिवरुणरुद्रमरुदादित्यरूपसकलदेवतानां शीघ्रं बुद्धिस्थता प्रकरणादवयवार्थसंस्कारोद्बो-
धात् ननु पुरूरवोमाद्रवः प्रभृतिगणो रूढ्यादपि विश्वेदेवपदादेषां धीः एवं तावैश्वदेव्यामि-
क्षा वाजिभ्यो वाजिनमित्यत्रामिक्षारूपान्नस्योत्पत्तिप्रभृति विश्वेदेवदेवतात्वं ज्ञातं वाजिभ्य इति
च तदर्थेन पदाद्धीरूढादपि वाजमन्नं तद्यस्यास्तीति व्युत्पत्त्या वाजिनामाभिधानरूपा तयो गिनां विश्वे
देवानामेव प्रकरणाच्छीघ्रमुपस्थितिर्न तु रूढ्याऽश्वानां तेन वाजिनस्यापि विश्वेदेव एव देवताप्र

१ क्वचित्स्वज्ञानस्य अन्विताभिधानानुपयोगात्
८४ पं० २

त॰चि॰श॰ तीयते ननु रूढेर्बलवत्वादपि रूढ्यर्थधीरेव स्यादिति चेत् न द्वयोरुपस्थितयोरनुपस्थितयोर्वा रूढेर्ब शा॰वि॰
८१ लीयसी अत्र तु प्रकरणात्पूर्वं तरां उद्बुद्धसंस्कारेण योगार्थज्ञाने संभृतसामग्रीकः ननु शाब्दानुभवे
81 शब्दकारिता स्मृतिरुपयोगिनी न तु प्रकरणादिकारितापि शाब्दविषयाज्ञातस्यान्विताभिधानोपयो
गादिति चेत् न प्रकरणादुद्बुद्धमानस्य संस्कारस्यैव शब्दादप्युद्बोध इति प्रकरणसहकृतशब्रादव
यवार्थसंस्कारोद्बोधादवयवार्थस्मृतिः शब्दकारिता शीघ्रा च ननु रूढ्यर्थस्मृतिः तत्संस्कारोद्बोध
काभावात् न चैवं लोके विमंडपादौ योगस्य बलवत्वाल्लक्षणेति वाच्यं प्रकरणाद्यभावे हि शीघ्रं रू
ढ्यर्थप्रतीतौ रूढिपूर्विका लक्षणा प्रकरणादिसत्वे तु मंडपादिपदे पि योगार्थ एव बलीयान् इति न लक्ष
णा अत एव रूढिवृत्तेः प्रकरणादिसत्वे न रूढ्यर्थस्मरणान्न लक्षणा किन्तु योग एव तस्मात्प्रकरणा
द्यभावे तु रूढ्यर्थस्य शीघ्रमुपस्थितत्वात् रूढिपूर्विका रूढ्यर्थसंबंधिनि लक्षणा प्रकरणादिसत्वे च रूढ्यर्थ
स्यानुपस्थितेरिति योग एवेति तत्त्वं न चैवं श्रोत्रस्त्राणीत्यत्र श्रोण्याख्यसामभाग योगिनां प्रयाणां च कु लक्ष॰
न तया योगस्यैव बलवत्वं स्यात् ननु रूढिपूर्विकाऽनुवाके लक्षणेति वाच्यं तत्रापि हि रूढौ योगे
च प्रकरणस्य तुल्यत्वात् रूढ्यर्थस्य शीघ्रमुपस्थितत्वात् रूढिपूर्विका लक्षणैव अत एव वदंति
भवतु रूढ्यर्थस्य शीघ्रमुपस्थितिस्तथापि तस्यायोग्यत्वात् अनन्वये शक्त्योपस्थापिता
वयवार्थस्यैव योग्यतादिमत्वादन्वयबोधो भवेत् प्रतिबंधकस्य रूढ्यर्थान्वयबोधस्याभा
वात् लाक्षणिकार्थस्य विलंबितोपस्थितिकत्वात् नन्वेवं मंडपं भोजयेत्यत्रावयवार्थपरत्वे
ऽवयवार्थानां प्रथममेकमन्विताभिधानं तदनंतरं तस्य वाक्यार्थेऽपरमन्विताभिधानमि
ति तात्पर्यगौरवं रूढिपूर्वकलक्षणायां तु एकत्रान्विताभिधाने तात्पर्यमिति लाघवमिति चे
त् न सामग्रीसत्वेनावयवार्थान्वयबोधस्य गौरवेणापहस्तयितुमशक्यत्वात् लक्षणाये

तात्पर्यग्राहकस्याभावात् भावेवान्यायाभिधानस्य व्यर्थत्वात् ननु रूढ्यर्थस्य प्रथमं स्मृतत्वा
त् तस्य च लक्षणाया परंपरया प्रयोजकत्वसंभवेन त्यागायोगात् दूरं तत्तत्स्यान्वयबोधः इति चेत्
नहि प्रथमं रूढ्यर्थसमकालं वा स्मृतस्य मंडपाद्यवयवार्थस्य बाधकं विनान्वयरहितार्थत
त्यागोपि नोचितः तत्यागहेतो रूढ्यर्थान्वयबोधस्याभावात् अथ च रूढ्यर्थोपस्थितिरेव योगार्था
न्वयबोधप्रतिबंधिका ननु रूढ्यर्थान्वयबोधो गौरवात् यत्र च प्रकरणादिना योगार्थान्वयबोधः
तत्र रूढ्यर्थस्मृतिरेव नास्ति संस्कारोद्बोधाभावात् किंतु प्रकरणपाद्याभ्यां अवयवार्थस्य संस्का
रोद्बोधेन अवयवार्थस्यैव स्मृतिरिति चेत् न अवयवार्थस्य तावदन्वयबोधेवा रूढ्यर्थस्मृतेः प्र
'प्रतिबंध कत्वमा' [illegible]ाभावात् मंडपपदस्य गृहपरत्वे रूढ्यर्थस्यान्वयबोधो योग्यत्वात् न च स्मृतस्याप्य
वयवार्थस्य लक्षणप्रकारस्यायोग्यतादिविरहात् ननु रूढ्यर्थस्मृत्या प्रतिबंधात् इत्थं रूढ्यर्थस्या
योग्यत्वान्नान्वयबोधः अवयवार्थस्य योग्यतादिसामग्रीसत्वादन्वयबोधो भवत्येव यदि च
रूढ्यर्थस्मृत्या प्रतिबंधान्नावयवार्थस्य स्मृतिरन्वयबोधो वा तदा त्वन्मते लंबकर्णमानये
त्यत्र न कुम्भसंनिधाने वक्रग्रीवावयवार्थान्वयबोधो न भवेत् किंतु रूढ्यर्थस्यान्यपदार्थस्यै
व तस्माद्रूढेर्योगापहारित्वं रूढियोगयोर्विरोधे मंडपादौ न तु लंबकर्णादौ अपहारोप्यय
मेव यद्योग्यतया रूढ्यर्थस्यान्वयबोधो भवति नावयवार्थस्य अयोग्यत्वात् ननु यो
ग्यतादिमतोप्यवयवार्थस्यान्वयबोधो न भवति अनन्वितरूढ्यर्थस्मृत्या प्रतिबंधादि
ति तस्मात्तन्यायलभ्या रूढिह्वविकाललक्षणा किंतु यत्र रूढ्यर्थसंबंधिनि तात्पर्यं मानांत
रादवधार्यते तत्र रूढिह्वविकाललक्षणा रूढ्यर्थसंबंधिविशेषज्ञापनार्थं विशेषतात्पर्यग्र

त.वि.म. हस्यावश्यकत्वात् यत्र तु प्रकरणाद्यभावान्न योगबलवत्त्वं तत्र रूढ्यर्थस्य शीघ्रोपस्थितित्वात्तेनैव त शा.वि.
८२ रपदार्थान्वयप्रतीते रूढेर्योगापहारः उपपदधातुप्रत्ययार्थानां स्मृतिस्ततस्तेषां योग्यतादिज्ञा
82 नं ततो वयवार्थान्वयबोध इति यौगिकार्थस्य विलंबितोपस्थितिकत्वात् यथा वर्षासु रथका
रमादधीतेत्यत्र रथकारशब्दात् रूढ्या जातिविशेषवत् प्रतीतेः शीघ्रत्वात्तस्यैवाधानं प्रतीयते त
दर्थानुकूलविद्याप्रवृत्तिरपि तस्याक्षिप्यते ननु रथकारशब्दस्य योगोपस्थितरथकरणयोग्या
न्यतो लब्धविद्यस्त्रैवर्णिकपरत्वं विद्याप्रवृत्तिकल्पनातो रथकारशब्दसंकोचमात्रस्य लघुत्वादि
त्युक्तं शब्दार्थानुरोधेन हि कल्पना न तु कल्पनाभयेन शब्दार्थत्यागः प्रमाणशब्दमूलत्वेन
फलमुखगौरवस्यादोषत्वात् अत एव क्रतुविशेषे हिरण्मयौ प्राकाशावध्वर्यवे दक्षिणां ददा
तीति श्रूयते तत्राध्वर्युशब्दात् रूढ्या ऋत्विग्विशेषस्य शीघ्रमुपस्थितेस्तस्यैव प्राकाशस्वत्व
लक्षणः संबन्धो विधीयते ददातीत्यनुवादः तेन क्रतुदक्षिणायामध्वर्युभागमात्रबाधः
अन्येषामृत्विजां प्राकाशस्वत्वाभावात् क्रतुदक्षिणायामन्वयः यदि वाध्वरं युनक्तीति
धवि व्युत्पत्त्या योगोपस्थितऋत्विङ्मात्रे प्राकाशसंबन्धः स्यात् तदा सर्वेषामेवर्त्विजां क्रतुदक्षिणा
बाधेनाध्वर्युभागमात्रस्य नन्वेवं स्वर्गकामो यजेतेत्यत्र स्वर्गकामत्वेन स्त्रीशूद्रयोरप्युप
स्थितेरधिकारो बोध्यते शब्दार्थानुरोधाद्विद्याप्रवृत्तिरपि तस्याक्षिप्येतेति चेत् न स्त्रीशूद्र
योर्विद्यानिषेधात् स्वर्गकामपदस्य स्त्रीशूद्रेतरपरत्वात् तेन स्वर्गकामपदार्थसंकोचमात्रेण बाधः
संकोचे च न शब्दार्थहानेः स्वर्गकामत्रैवर्णिकस्याधिकारबोधनात् रथकारशब्दे च पदार्थ
मात्रस्यैव बाधः स्यात् यद्यपि संकोचोऽप्येकदेशबाध एवेति सोऽपि न युक्तः तदेशे शब्दार्थहा

नप्रसंगात् तथापि सामान्यबाधादेकदेशबाध एव लघुरिति लक्षणा च पदवृत्तिः वृत्तित्वात् शक्तिवत्
ननु गंभीरायां नद्यां घोष इत्यत्र नैकपदे लक्षणा तीरस्यानदीत्वात् अगंभीरत्वाच्च अन्वयलक्ष्य
कयोरनन्वयापत्तेः नापि पदद्वये प्रत्येकं शक्यासंबंधिनो गंभीरनदीतीरस्य प्राप्तिप्रसंगात्
तस्मात् गंभीरनद्योरन्वयबोधानंतरं वाक्येन स्वशक्यगंभीरनद्यास्तीरं लक्ष्यते वाक्यार्थगंभीर
नदीसंबंधिनस्तीरत्वेन प्रतीतेः न च वाक्ये शक्त्यभावात् तत्संबंधाभावेन लक्षणेति वाच्यं
स्वशक्यसंबंध एव हि लक्ष्यस्य तेन मंत्रेन तु संबंधविशेषः शक्तिः गौरवात् शक्यस्य शक्य
वद्वाक्यार्थेऽपि घोषनद्योरन्वयबोधात् गंभीरनद्योरन्वयबोध एव हि नेति चेत् न प्रथमो
पस्थितत्वेन गंभीरनद्योरन्वयबोधस्य शीघ्रत्वात् घोषतदनुपपत्तिज्ञानाधीनतया तीर
स्योपस्थितिविलंबेन तु घोषयोरन्वयबोधे विलंबात् न चैवं वाक्यभेदः कर्त्तव्याभिधानांतरा भिता
नुकूलत्वेन वाक्यैकवाक्यतावदेकवाक्यत्वादिति अत्र नव्याः वाक्यस्य शक्याभावेन शक्य
संबंधाभावात् न लक्षणा अथान्वयबोधकं वाक्यं पदानि हि संभूयान्वयं बोधयंति न प्रत्येक
मात्रमिति चेत् न पदं हि स्वार्थान्वयं बोधयति न तु समूहः समूहे स्वार्थाभावात् पदस्याप्यज्ञ
वृत्तिबोधकता न चैवं तरपदावच्छिन्न इतरपदे गौरवात् किंच गंभीरायां नद्यामित्यत्र विभक्तिं
विनान्वयबोधाभावाद्विभक्त्यंतर्भावेनैव वाक्यत्वं तथा च लक्ष्ये विभक्त्यर्थान्वयो न स्यात् लक्ष
कार्थस्य लक्ष्यान्वयनियमात् नापि गंभीरायां नदीति विभक्तिप्रकृत्योर्लक्षणा अन्वयस्य तद
शक्यत्वात् विभक्तिश्च प्रकृतिनदीगतस्यार्थस्याभिधानात् गंभीरनदीगतं तस्याप्रकृतित्वात्
वस्तुतः पदलक्षणायैवोपपत्तौ न वाक्ये लक्षणा तथा हि गंभीरनद्योरन्वयबोधोत्तरं नदीपदं
गंभीरपदं वा स्वशक्यगंभीरनद्यास्तीरं लक्षयति न वाक्यं न च पदयोर्विनिगमकाभावेन लक्षणा

त॰ चि॰ म॰ द्वयं वाक्ये वै केवलक्षणेति युक्तं पदे कृप्तत्वात् वाक्यापेक्षया लघुत्वाच्च पद एव लक्षणा अन्यथा
८३ विनिगमकाभावाल्लक्षणाद्वयं पदे वाक्ये चापरा लक्षणेति गौरवं स्यात् अन्वयबोधपूर्विका प्रत्ये शा॰ वि॰
83 कं पदद्वये लक्षणैव वाक्ये लक्षणेति तु परिभाषा पदवाक्ययोर्भिन्नत्वात् वस्तुतस्तु गंभीरपदा
त्स्यार्थपरंपरासंबंधेन तद्योपस्थितौ विलंबात् दीपपदात्स्यार्थसंबंधेन शीघ्रं तीरोपस्थितिसंभ
वात् तत्रैव लक्षणा अथ पदपौध्यनाद्युपमनक्ति सन्नमं पदं गरज्ञातीत्यत्र पदस्य ग्रहणाकर्म
न हि त्वेन प्रहरणकर्मार्हे च्छेदनसाधनत्वेन निरूढेऽष्टसोमक्रियाप्रयनीयमानैकहायन्युपलक्षि अद
तसन्नमपदयोः ष्टसन्नमार्थान्वितपदपदार्थान्वयबोधके वाक्ये लक्षणेति चेन्न अत्राविहि॰
तसन्नमपदयोरन्वयबोधानन्तरं सन्नमपदार्थान्वितत्यार्थबोधके पदपदे लक्षणा ननु वाक्ये
अत एव पुरोडाशकपाले न तुषानुपवतीत्यत्रावघातजनितव्रीहितुषाणां पुरोडाशकपाले
नोपवापो विधीयते पुरोडाशस्य परं प्रयोजनकत्वेनोपस्थिते च कपाले नोपवापप्रयोज॰
नाकांक्षा न चैक प्रयोजनस्य किंप्रयोजनमित्याकांक्षा भवति अन्यत्र विनियुक्तत्वेन प्रा
व्यादन्यत्राकांक्षाविरहेणाविनियोगाप्रतीतिरेव हि विनियुक्तविनियोगविरोधः अत
स्त्राकांक्षोत्थापनार्थं पुरोडाशकपालवाक्ये स्वपुरोडाशप्रापकत्वाधिष्ठाने आश्रयरूपे ल॰ स्व
क्षणेति निरस्तं तत्रापि हि पुरोडाशपदेन पुरोडाशप्रापणप्रयोजकत्वाधिष्ठानं आश्रय
स्वरूपं लक्ष्यते कपालपदं च तत्र कपालत्वविशिष्टबोधकमिति पुरोडाशपदे लक्षणा न
पुरोडाशकपालवाक्ये ननु बहुव्रीहौ चित्रगुमानयेत्यत्र वाक्यार्थे चित्रगोः स्वामिनः संबं
धितयाऽन्यपदार्थस्य प्रतीतिर्वाक्य एवान्यपदार्थे लक्षणा अथ यथा चित्रा गौर्यस्येति विग्र

हवाक्यस्य लक्षणं यत्पदं तस्य तमन्यपदार्थं बोधयति यथा दधिपदस्येत्यादौ लत्वादितीयाकर्मत्वं अन्य
यानत्र कर्मत्वे लक्षणापत्तेः अत्रान विग्रहस्यान्यपदार्थधीर्बहुव्रीहौ शक्तिभ्रमादिति चेत् न
स्य स्यत्तपत्यदानसंबंधिनयोपस्थितेन्यपदार्थेकर्मत्वेनोपस्थितिर्वि आनयनान्वयानुपपत्तेः
रात्तः ऊरुषमानये त्यत्र तात्तरवविशेषणत्वेनोपस्थितेः क्रियान्वयाभावाच्च विभक्तिप्रद ना
न्यपत्यदानुपस्थितेः चित्रगुपदेनाक्रियायाचान्वयबोधोनस्यात् अन्वयप्रकारबोधकविभक्त्य
भावात् न च चित्रायाः गोः यत्रेति विग्रहे तस्य तत्र प्रथमांत यत्रेतिपदानुपस्थितेः प्रथमांतेनत्रा
नयनानन्वयात् प्रथमांतेन विग्रहे तदाभियुक्तैर्बहुव्रीहेः साधुत्वनिषेधाच्च न च चित्रा गौर्यस्ये
तिनमानयेत्यत्र तत्पदार्थस्य क्रियान्वय इति वाच्यं तथाननुभवात् चित्रगोसंबंधिनमानयेति
हिवाक्यार्थधीः विग्रहे तत्पदाप्रयोगे तस्याभावाच्च यत्तदोर्नित्यसंबंधात्तत्पदस्य स्मरणमपीति चे
त् न अध्याहारापत्तेः तथापि चित्रगुमानयेत्यत्र विभक्तिस्तत्पदार्थं तं तस्यार्थं बोधयेत् किं
गोगतमेव विभक्तेः प्रकृत्यर्थगतस्यार्थबोधकत्वव्युत्पत्तेः अत एवान्यपदार्थोपस्थापकेन समा
सेनोक्तार्थत्वाद्यत्पदाप्रयोगः अन्यथा यत्पदप्रयोगोपि स्यात् न च यत्पदाप्रयोगे साधुत्व
र्ष त्वा मेव स्त्रीप्रत्ययस्येवेति वाच्यं गोस्त्रियोरुपसर्जनस्येत्यनुशासनबलाद्ध्रस्वत्वस्यैव साधु यत्पदे –
हत्तार्थत्वं विना नासाधुत्वाय निमित्तान्तरमस्ति बहुव्रीहेर्नित्यसमासत्वेन विग्रहाभावाच्च चि
त्रागौर्यस्येति वाक्यं बहुव्रीहेरन्यपदार्थकत्वनाय अत्र त्वया चित्रगुमानयेत्यत्र प्रक्रांतप्रक्रांतस्यमानयेति र
भावे यत्पदार्थव्यवहारो न स्यात् न च चित्रापदं चित्रगोमितलक्षकं तत्र गोपदार्थानन्वयात्
नापि गोपदं लक्षकं गोस्वामिनि चित्रात्पदार्थानन्वयापत्तेः तस्माद्वाक्यार्थचित्रगोः संबंधिनया ऊरु स्वा
षस्य प्रतीतेर्बहुव्रीहौ वाक्य एव लक्षणेति वार्तिमैतत् वाक्ये निरर्थकतयाऽन्यार्थसंबंधाभावेन लक्षणा
तस्माद्बहुव्रीहौ वाक्य एव लक्षणा ॥ पं. ८

विशेषात् अत्रापि पदलक्षणायैवोपपत्तेश्च तथाहि चित्रगोपदपारस्पर्यबोधानंतरं गोपदं चित्रगोस्वा
मिलक्षकं स्वज्ञाप्यचित्रगोसंबंधेन तत्स्वामिस्मारकत्वात् चित्रापदं गवान्वितत्वार्थबोधकतया मुख्यार्थ श्रा० वि०
मेव कर्त्तृत्वान्वयबोधानुकूलत्वेन न वाक्यभेदोपि नचैवं एकस्यैव गोपदस्यान्यपदार्थे वृत्तौ समासेन स्या
त अनेकस्यान्यपदार्थे वर्त्तमानस्य समासानुशासनादिति चित्रापदस्यापि परंपरयान्यपदार्थ
बोधकत्वात् अत एवाचित्रापदे लक्षणा चित्रापदार्थस्य परंपरयाचित्रगोस्वामिसंबंधात् नचैवमेकपद वाच्यं
लक्षणाया भिन्नपदवैयर्थ्यं इतरपदस्य हि भिन्नेन विशेषस्य लक्षणीयत्वात् नचैवं वाक्यार्थबोधकप
दलक्षणा द्वयमेव वाक्यलक्षणा पदवाक्ययोर्भिन्नत्वात् यत्तु चित्रापदेन गोपदसन्निधानात् स्वार्थ
संबंधिनी गौर्लक्ष्यते चित्रगवा च स्वामिलक्ष्यत इति लक्षितलक्षणयान्यपदार्थधीरिति तन्न एकप
दार्थलक्षणातो लक्षितलक्षणाया जघन्यत्वात् भ्वादयो धातवः चैत्रादीन् भोजयालंवकर्मानपे
न्या: ँदितद्गुणसंविज्ञानबहुव्रीहौ भ्वादेर्विशेषणस्यापि कार्यान्वयात् क्रियावाचित्वनिमंत्रितत्वाद्रूपेण दि
जहत्स्वार्थालक्षणेति संप्रदायः अत्राहुः अनन्तामित्तपदपदार्थविभागस्य चित्रगुसमुदायस्या
न्योन्यान्वितावयवार्थसंबंधिन्यन्यपदार्थे शक्तिः कल्प्यते अतो नानेकार्थत्वं न वाऽवयवार्थ
त्यागो न वा तद्गुणसंविज्ञाने लक्षणा योगरूढिस्वीकारात् अवयवार्थज्ञानेन तत्संबंधितो ग्रा
नात् मंडपादौ चावयवार्थानिरपेक्षैव गृहविशेषधीरित्यवयवार्थत्याग एव समुदाये रूढिः तथा
शक्ति चित्रगवादिपदस्यान्यपदार्थे तात्पर्यमेव नचैवं च तात्पर्यनियमतोन्यपदार्थप्रतीतेः तद
न्याप्रतीतेश्च नियततात्पर्यं विनान्यपदार्थे बहुव्रीहौ नियमतो लक्षणापि न स्यात् तस्मान्नियत
तात्पर्यनिर्वाहिका बहुव्रीहेरन्यपदार्थे शक्तिरेव लाक्षकस्य लक्ष्ये तात्पर्यानियमात् तात्पर्यानि
यमे क्वचिद् बहुव्रीहेरन्यपदार्थपरत्वमपि न स्यात् अथ क्वचिद् बहुव्रीहेरन्यपदार्थे तात्पर्यमपि न भवति

यथा यजमानपंचमा ऋत्विजो लोहितोष्णीषा ऋत्विज इत्यत्र यजमानपंचमत्वलोहितत्वयोर्विधेय-
त्वेन प्राधान्यात् तत्परतयाऽन्यपदार्थे तात्पर्याभावात् एवं क्वचिल्लोकेपीति चेत् तर्हि तत्रान्यपदार्थे धे
तात्पर्याभावात् तदनुपपत्तिं विना लक्षणाविरहादन्यपदार्थे शक्तिरेव अन्यथा तत्रान्यपदार्थबुध्यनुद-
यापत्तिः न च तत्रान्यपदार्थबुद्धिराभिधानिक्येव न भवतीत्युक्तं ऋत्विग्भिः सामानाधिकरण्यानुप-
पत्तेः तस्माद्बहुव्रीहेर्नियमतोऽन्यपदार्थबुद्ध्युदयात् तत्र शक्तिरेव यद्यपि शक्तस्य शक्येन तात्पर्यनियमो
नह्येपि क्वचित्तात्पर्यात् तथापि शक्ये तात्पर्यमौत्सर्गिकं क्वचिदन्यप्रयोगादपोह्यते बहुव्रीहौ चान्यप-
दार्थादन्यत्राप्रयोगाच्छक्यार्थे तात्पर्यनियमो भवति यत्र केवललाक्षणिकस्याभावात् बहुव्रीहेः शक्य-
नियमे परिशेषादन्यपदार्थ एव शक्य इति तन्न शक्तिं विनापि तात्पर्यनिर्वाहात् अत्र ब्रूमः बहुव्री-
हौ न वाक्ये लक्षणा किंतु पदे तस्य च नान्यपदार्थे तात्पर्यनियमः क्वचिच्छक्येपि तात्पर्यात् अ-
पाति न बहुव्रीहेस्य पदद्वयस्यान्यपदार्थे तात्पर्यनियमः न तोऽन्यत्राप्रयोगनियमात् अतस्तत्रिवीहि-
कापदद्वये शक्तिः सैव वाक्ये वाक्यस्य पदद्वयात्मकत्वादिति चेत् अस्तु तर्हि बहुव्रीहिस्थपदे निरू-
ढलक्षणा न चैवान्यपदार्थे तात्पर्यनियमोपपत्तौ समुदायशक्तौ मानाभावात् नवीनास्तु ब-
हुव्रीहावन्यपदार्थस्य लक्ष्यत्वे नियमतो लक्षणीयपदलिंगता न स्यात् लक्षकपदस्य लक्षणीय-
पदलिंगग्राहकत्वनियमात् स्वलिंगापरित्यागाच्च अतोऽन्यपदार्थे शक्तिरेवेति तन्न ब्रूमः बहुव्री-
हेर्लाक्षणिकत्वेन विशेषणपदस्य नियमान्नियमतो लक्षणीयविशेष्यपदलिंगकत्वं समानाधि-
करणस्य समानविभक्तिकस्य विशेषणपदस्य विशेष्यपदलिंगत्वनियमात् भिन्नविभक्तिकयोरि-
वाभिन्नलिंगकयोरपि सामानाधिकरण्येन विशेषणविशेष्यभावाभावात् अजहल्लिंगे तु लिंगा

न॰ वि॰ म विशेषनियमात् अनुशासनात् न तथा अन्यदन्यस्य लिंगं गृह्णातीत्यत्र विशेषणविशेष्यभावस्वभावत्वमेव नि- श॰ वि॰
८५ यामकं अथ नियमतो विशेष्यलिंगकत्वं नैव विशेषणपदस्य बहुव्रीहेः शक्तिं विना न निर्वहतीति चेत् न वि-
88 शेषणपदत्वमेव हि विशेष्यलिंगकत्वे तंत्रं न तु शक्त्यन्वेषणे गौरवात् दंडादिवाक्यस्याशक्तस्यापि पुरु-
षादिविशेष्यलिंगकत्वात् गुणवाचि शुक्लादिपदानां शुक्लः पट इत्यादौ लक्षणया विशेषणानां विशे-
ष्यलिंगत्वाच्च ननु शुक्लादेर्गुणपरत्वे लाक्षणिकत्वेन स्वलिंगप्राप्तौ गुणे शुक्लादयः पुंसि गुणिलिंगास्तु
तद्वतीति लिंगानुशासनात् लाक्षणिकस्यापि विशेष्यलिंगकत्वं न च बहुव्रीहेस्तथानुशासनमस्तीति
चेत् न तस्य न्यायप्राप्तानुवादकत्वात् अत एव शुक्लं रूपमिति शुक्लगुणवाचकत्वेपि लिंगानुशास-
नं परित्यज्य विशेषणपदत्वात् शुक्लपदं विशेष्यरूपपदस्यैव लिंगं गृह्णातीति अन्यथा शुक्लो रूप-
मिति स्यात् किंच बहुव्रीहेर्लिंगानुशासनाभावेन स्वलिंगाभावात् विशेषणोपस्थापकवाक्य-
त्वाच्च विशेष्यपदलिंगत्वे युक्ता यथा दंडपुरुष इत्यादौ वस्तुतो बहुव्रीहेरन्यपदार्थे शक्तावपि
रूपं नाना लिंगकत्वं तथा लिंगानुशासनाभावात् अथ विशेषणपदत्वात् विशेष्यपदलिंगता विशे-
श ष्यपदं च नाना लिंगमतो नाना लिंगत्वमिति चेत् तर्हि लाघवात् लक्षणैवास्तु उक्तन्यायेनैव लक्षणाया-
मपि विशेष्यपदलिंगोपपत्तिरिति तत्पुरुषेपि राजपुरुष इत्यादौ पूर्वपदस्य षष्ठ्यर्थसंबंधेन रूढलक्षणा-
यैव राजसंबंधिपुरुषबुद्ध्युपपत्तेर्न समासे शक्तिः अन्यलभ्यस्य शब्दार्थत्वात् यत्तु समस्यमानपदा-
तिरिक्तं न समासपदं समस्यमानपदानां वृत्त्यभिन्नानामतो न समासे शक्तिरिति तन्न पदतत्समुदाययो- नां
र्भिन्नत्वात् नन्वनुपपत्तिं विना कथं षष्ठ्यर्थलक्षणेति चेत् यदि षष्ठ्यर्थो न लक्ष्येत तदा राजपुरु-
षादौ लाघवादिना द्वाभ्यां सामानाधिकरण्यावगताद्राजत्वविशिष्टपुरुषस्यैवाभेदान्वयः स्यात्

राजवाहनमानयेत्यादौ वाहनपदे वाहनवल्लक्षणास्यात् अथ राजत्वविशिष्टेऽस्मदादीनयनान्वयो
ऽयोग्य इति चेन्न तर्ह्यानयनानुपपत्त्या तात्पर्यानुपपत्त्या वा षष्ठ्यर्थे लक्षणा विभक्त्यर्थाभेदो हि सर्व
त्र नामार्थान्वयोऽतः क्लृप्तविभक्त्यर्थसंभवे विभक्त्यर्थलक्षणौ वोधिता अथ राजपुरुषादावन्वयप्रका
रतया षष्ठ्यर्थसंबंधस्य द्वितीयेन पूर्वपदे लक्षणा न वा समासे शक्तिरिति तन्न नामार्थयोरन्विताभि
धानेऽन्वयप्रकारतया नियतः षष्ठ्यर्थोपस्थितौ हेत्वभावात् शब्दादनुपस्थितस्यान्वयप्रकारतया
भाने मानाभावाच्च चैत्रस्य नप्तेत्यादौ चैत्रस्य नप्तृपदात् शक्यतावच्छेदकतयोपस्थितस्यान्वयप्रकार
त्वेन ज्ञानं राज्ञः पुरुष इत्यादौ विग्रहे समासाभिधानात् लुप्तास्मृता षष्ठ्येव संबंधस्मारिका तेन लक्ष
णा न वा शक्तिरित्येके तन्न राजपुरुषमानयेत्युक्ते पूर्वं नियमेन विग्रहास्मरणात् द्वाराद्विकानां तु
विग्रहाभिधानं समासार्थैकपदत्वपरं विभाषाधिकारे च समासात् शासनं समासविग्रहयोः पर्याय
त्वं साधुत्वं च बोधयितुं विशेषस्तु विग्रहे सोऽपेनावविभक्त्यादिभिः शक्त्याभिधीयते समासे तु
पूर्वराजादिपदेन लक्षणया बहुव्रीहेर्नित्यसमासत्वाभिधानं विग्रहस्यासाधुत्वोपन्यासार्थं गो चित्रा
र्यस्येति विग्रहाभिधानं बहुव्रीह्यर्थकथनार्थं स्यादेतत् विभाषेतिसूत्रेण वाक्यसमासयोस्तुल्या
र्थता प्रतिपादिता वाक्ये च मुख्या वृत्तिस्ततः समासेपि सैव वृत्तिः अन्यथा गत्याप्यतिप्रसक्तेः वाचकस्यै
वानुशासनाच्च यथा लिङादेः न च लाक्षणिकं वाचकं अन्यथा गाव्यादेरप्यनुशासनापत्तेः अ
थ वाचकव्युत्पादनवल्लाक्षणिकव्युत्पादनमपि उभयोरपि तुल्यतयोः पदार्थोपस्थापकत्वादिति चे
न्न न वाचकत्वज्ञानं विना वाक्यार्थज्ञानासंभवं वाचकत्वात् शासनं लाक्षणिकं च शक्यव्युत्पत्त्या परंप
रया लक्ष्यस्मारकमतो न तस्य व्युत्पत्त्यन्तरापेक्षा न चाप्रयोगानुशासनं व्याकरणांसचलक्षणाया

त॰ चि॰ म॰ व्यस्तिञ्च नत्तस्याप्यनुशासनं घोषसमभिव्याहारे गंगापदस्यैवेति वाच्यं गंगायामिति मात्रं ह्यनुशिष्टं श॰ वि॰
८६ तच्च स्नातिसमभिव्याहारे पुंनु तद्वाक्यस्य त्वेन दित्व गंगायामिति पदं नानुशिष्टं किंतु विभक्तिः सा चो
86 भयत्र वाचिकैवेति न प्रातिपदिकत्वे तेर्थव्युपायालक्षणाया वाक्यपेक्षा अत एव विभक्तौ न लक्षणा
अवाचकस्यानुशासनादिति उच्यते साधुपदस्यानुशासनं व्याकरणे तस्य साधुत्वज्ञापक
त्वेनैव प्रामाणिकप्रसिद्धिसिद्धत्वात् अत एव गाव्यादेरनुशासनं तस्यासाधुत्वात् अस्ति च
समासः साधुरतो युक्तं तस्य साधुत्वानुशासनं साधुता च लाक्षणिकत्वेनापि संभवति पद वाचकता वा
नन्यलभ्यत्वादवगम्यते ननु व्याकरणं वाचकत्वानुशासनं प्रयोगमात्रे साधुतां मङ्गीवादीनां प्रपृथ्य
नादिविकरणानां इदं नु मायागमानां वर्णविकार षकारणकारादीनां निरर्थकानामपि साधुत्वार्थम
नुशासनात् अत एव द्वेकयोरित्यानुशासनस्यैकत्व एवैकवचनप्रयोगः साधुरिति साधुत्वज्ञापना
नार्थत्वेन सार्थकत्व अन्यथैकत्व एकवचनस्य स्वादिसूत्रेण विहितत्वाद्वैयर्थ्यं स्यात् द्वित्वादा वा
प्रयोग प्राप्तत्वादेवैकवचनादिति चेत् लक्षणायाप्रसक्तः प्रयोगो साधुरिति ज्ञापकत्वेन सार्थकत्वं एवं च
विभक्तौ न लक्षणा लिङ्गादेरत्वर्थे वाचानुशासनं नास्तीति लोके क्रियाकार्यत्वेन लक्षणा एवं च तृ
तीयाया अपि लक्षणायामकर्मत्वादौ प्रयोगः सामान्यतः साधुः कर्तृकरणयोस्तृतीयेत्यनुशासन
बलात् व्यत्ययेपि च साधुत्वमनुशासनान्तरबलात् तस्माद्यदि समासो नानुशिष्येत तदा तस्य
लोके साधुत्वं न ज्ञायेत प्रत्युत गाव्यादिशब्दवदपशब्द एव स्यात् यदि च विभाषेति सूत्रं न प्रणी
येत तदा तत्प्राकृतेर्थे समासस्यैव साधुत्वं ज्ञायेत न वाक्यस्य तदभिधानशक्तस्यापि प्रौवालह
व्यंकैजादेः विभाषाशब्दः समासविग्रहयोः साधुत्वज्ञापनार्थेन तु विकल्पेन समासस्य सा
पंकजपदादेरित्यर्थः = १

धुत्वबोधकः अवाचकशब्दः समासोतोसाधुर्गाव्यादिपदवत् वाक्यमेववाचकमित्याशंकां
कल्पार्थैवाक्यसमासाविति बोधयन्विभाषापदमेव निराकरोति नचसाधुत्वादेवशक्तत्वं अन्य
लभ्यत्वेनशक्तिनिरासात् तिङन्तकर्तनयोर्व्यभिचाराच्च नत्राहि समुदाये साधुत्वं प्रत्येकं शक्तिरसाधु
त्वंच ननुनामार्थयोः राजसंबंधिपुरुषयोर्विभक्तिं विनान्वयाभावाद्राजसंबंधिपुरुषाप्रतीतेः
विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेश्च राजसंबंधिपुरुषे समासस्य शक्तिरेव एवंचा
रुव्रीहिकर्मधारयादावपिसार्थकत्वेपि प्रातिपदिकत्वविधानं अर्थवदादिसूत्रस्य प्रपंचइति चेत्
उच्यते नीलंघटमानयेत्यादौ नामार्थयोर्विशेषणविशेष्ययोरन्वयबोधे आकांक्षादिक
मेवहेतुर्नतुविशेषणविभक्तिरपि नीलस्य घटकर्मत्वाभावापत्तेरप्याननुभवाच्च नीलविशिष्ट
स्यकर्मत्वं विभक्त्यर्थवहिर्भावेनैव नीलघटयोरन्वयबोधेस्यानत्वन्यथा नचविभक्तिं विनास
मस्यमानपदानांसाधुत्वंनेति वाच्यं विभक्तिं विनापि समासस्य साधुत्वानुशासनात् तस्मान्ना
मार्थयोरन्वयबोधे विशेषणतात् विभक्तिः साधुत्वार्था नतुकर्मत्वाद्युपनायिका एवंचराजसं
बंधिपुरुषस्य विभक्तिं विनापि पुरुषपदादुपस्थितिः अतएवतादृशपुरुषपदार्थविभक्त्यर्थान्व
यः यदिचविभक्तिबलात् क्रियान्वयो नीलमित्यस्याकरणान्यायादार्थः समाजस्तथापि राजसंबंधि
पुरुषयोः क्रियान्वयादार्थः समाजोस्तु नचराजसंबंधिनः कर्मत्वेनानुपस्थितेः नक्रियान्वया
न्वयइति वाच्यं समस्यमानपदार्थान्वयार्थं समासाद्विभक्तिलुक्शासनमतो विशेषणे विभक्त्य
र्थान्वयात् अन्यलभ्ये शक्त्यभावनियमात् समासान्निरर्थकात् विभक्तिश्च समस्यमानपदा
र्थगतमेवस्वार्थमाहतथैवव्युत्पत्त्यंतरकल्पनात् समासेनंतरशक्तिकल्पनातोलघुत्वात् यद्वा
विभक्तेः सन्निहितपदार्थगतस्वार्थबोधकत्वमतोबहुव्रीह्यादावन्वयबोधपूर्वकोत्तरपदेलक्ष

णाषष्ठीतत्पुरुषेचविभक्तिसन्निहितोत्तरपदार्थगतस्वार्थबोधकत्वंविभक्तिसन्निहितपदस्वार्थ
प्रकारत्वयालक्षणायावा एवंनीलोत्पलमानयेत्यादौकर्मधारयेविभक्तिंविनैवनामार्थयोरन्व
यबोधानंतरंविशिष्टस्यकर्मत्वेनक्रियान्वयः कर्मधारयेलक्षणाशक्तिर्नवालक्षणा ताभ्यांविना
पिविवक्षितार्थान्वयबोधोपपत्तेः ननुनीलघटयोःसामानाधिकरण्यंप्रतीतेस्तत्रलक्षणैव
अन्वयप्रकारत्वादिनाचतत्पुरुषमानेराजपुरुषादौषष्ठ्यर्थोपस्थितिरपितथास्तु अत्रब्रूमः
कर्मधारयेसामानाधिकरण्यंनामार्थयोरभेदोवा गुणगुणिनोःसमवायोवाऽनुभूयते
सचान्वयएवनत्वन्वयप्रतियोगीअतोऽन्वयप्रतियोगिनोरुपस्थितिमभिपदात्प्रतीयतेवेति
नतदर्थंलक्षणा राजपुरुषइत्यत्ररत्नराजसंबंधिपुरुषयोरन्वयोऽनुभूयतेराजसंबंधिन
श्चान्वयप्रतियोगिनां उपस्थितिर्नराजपदे षष्ठ्यर्थलक्षणांविना राज्ञःपुरुषंराजसंबंधिनं
पुरुषंराजपुरुषमानयेत्यादौपर्यायत्वात्राजसंबंधिनःपुरुषेचयोऽनुभूयतेराजसंबंधी
अन्वयप्रतियोगित्वेन एवंचबहुव्रीहौसर्वपदानांषष्ठीतत्पुरुषेपूर्वपदस्यान्यपरतयालाक्ष
णिकत्वात्ताभ्यांकर्मधारयोबलवात् नेत्रसर्वेषांपदानांस्वार्थपरतयामुख्यत्वात् अतएव
वैतयाऋचानिषादस्थपतिंयाजयेदित्यत्रकर्मधारयएव मुख्येशब्दस्वरसात् षष्ठी
तत्पुरुषेचषष्ठ्यर्थलक्षणापत्तेः एवंचेस्थपतिनिषादप्रतीतेन्तस्यैवाधिकारात्तदपूर्वे
णास्यनिर्वाहकतयैवस्थपतिनिषादस्यैवयागानुकूलविद्याप्रयुक्तिराक्षिप्यते अन्यथाऽस्वार्थ
हानिप्रसंगात् नन्वत्रषष्ठ्यर्थलक्षणयालब्धविद्यस्त्रैवर्णिकएवनिषादानामीश्वरोऽधिका
रीबोध्यते नत्वीस्थपतिनिषादः अलब्धविद्यप्रयुक्तिकल्पनात्तःषष्ठ्यर्थलक्षणायालघुत्वा

दिति चेत् न मुख्यार्थत्वस्याधीनकल्पनागौरवेण मुख्यार्थो न हीयते किंतु बाधकं वि-
ना मुख्यार्थान्वयबोधस्य प्रामाणिकत्वात्तदनुरोधेन तदुपपादकं कल्प्यते फलमुखगौरवं न दो-
षाय प्रमाणवतो गौरवस्य न्याय्यत्वात् न चाक्लृप्तकल्पनाप्रसंग एव मुख्यार्थान्वयबाधकः
अक्लृप्तस्य प्रागनवगमात् मुख्यार्थान्वयबलादेव तदवगमे उपजीव्यविरोधात् अन्यथाप्रती-
तानुपपत्तिबलात्कल्पना न स्यात् अक्लृप्तकल्पनागौरवेण कल्पकस्य बाधितत्वात् अथ शूद्र-
स्य वेदपाठनिषेधात् ईश्वर निषादोऽधिकारि बोधयितुं न शक्नोति इति मुख्ये बाधकात् न कर्मधार-
यः न चेश्वरनिषादे विधिबलाद्वेदपाठनिषेध एव बाध्यत इति युक्तं षष्ठ्यर्थलक्षणाया अबाधे संभ- ध्यः
वति निषेधकवेदबाधकल्पनाया अन्याय्यत्वादिति चेत् न सामान्यनिषेधस्य तद्विशेष-
विधानेनेतरपरत्वात् यथा हिंस्यात्सर्वा भूतानीत्येतत् छागमालभेतेत्यत्र एवं निषादप-
दस्य मुख्यत्वे शूद्रपदे संकोचमात्रं शूद्रपदस्य निषादपरत्वे निषादपदस्य मुख्यत्वबाध एव
यद्यपि संकोचोऽप्येकदेशबाध एव तथापि संकोचे द्वयोरपि मुख्यत्वरक्षणादबाधाच्च संको-
च एव ज्यायान् अन्ये तु नात्र षष्ठ्यर्थो लक्ष्यते अनुपपत्त्यभावात् अतः समासस्य षष्ठ्यर्थ-
मंतर्भाव्य शक्तिरेव अन्यथा कर्मधारयेऽपि पदार्थयोः सामानाधिकरण्यप्रतीतेः न चापि लक्षणेति
तुल्यं अप्यन्वयप्रकारतया सामानाधिकरण्यप्रतीतेर्न लक्षणा तर्हि षष्ठ्यर्थेऽपि न लक्षणा न चा-
न्वयप्रकारतया नियमतो विशेषोपस्थितेः प्रमाणं तस्मादुभयत्र समासस्यैव बोधकत्वं कर्मधा-
रयस्य बलवत्त्वमुत्सर्गतः सामानाधिकरण्यस्याविनत्वात् निषादस्थपतौ तु स्थपतिपदार्थस्ये-
श्वरस्य प्रतियोग्यपेक्षत्वात् तत्स्मरणसमर्थः षष्ठीतत्पुरुष एव निःप्रतियोगिके कर्मधारयः नी

लोत्पलमित्यादावुत्पलस्यानिःप्रतियोगिकत्वात् तथापि त्वनिषादे स्थपतेस्त्रैवर्णिकस्याधिकारः
तेष्वर्थस्य सजातीयापेक्षत्वात् नरपतिपदान्नरपतेर्नरस्येव निषादस्थपतिपदान्निषादस्येव स्थ
रस्य प्रतीतेरिति तन्न राजवाहनादौ पूर्वपदे षष्ठ्यर्थलक्षणायैव राजसंबंधिप्रतीतेः समासे
शक्त्यभावात् अनुपपत्तेस्तत्रैव उपकुंभमित्यादावव्ययीभावो द्विपिप्पलीत्यादिस्थतत्पुरुषः पू
र्वपदार्थप्रधानत्वं कुंभस्य समीपे पिप्पल्याः द्वित्वतात्पर्यात् अतस्तत्रोत्तरपदे षष्ठ्यर्थलक्षणा
न तु समासे शक्तिः नञ्समासे अब्राह्मणमानयेत्यत्र पर्युदासे पूर्वपदे नञि उत्तरपदार्थसदृ
शात्तान्यलक्षणा अघटः पट इत्यादौ च प्रसज्यप्रतिषेधार्थे नञि सामानाधिकरण्यादभावा
त् लक्षणा व्यासेपि न घटः पट इत्यादौ यथा शुक्लः पट इत्यत्र शुक्लवल्लक्षणा न पचतीत्या
दौ प्रसज्यप्रतिषेधेन नञोऽसामर्थ्येन सुबंतसंबंधेपि न समासः विभाषाधिकाराद्विकल्पेन
समासानुशासनात् यजतिषु च ये यजामहं करोति नानुयाजेष्वित्यत्र पर्युदासेन नञा तेनाय
मर्थः यजतिषु यागेषु अनानुयाजेषु अनुयाजव्यतिरिक्तेषु ये यजामह इति मंत्रं करोति अथ
नानुयाजेष्वित्यत्र न पर्युदासेन नञा तदा हि पदद्वयस्यान्यपरत्वं स्यात् समासापत्तिश्च तस्माद्
दनुयागात्करोति नान्वयात् प्रसज्यप्रतिषेधः तेनानुयाजेषु ये यजामहमिति मंत्रं न
करोतीत्यर्थः एवं च नानुयाजेष्विति पदद्वयस्य नान्यपरता न वा नञोऽसामर्थ्यं त्यागः
समासाभावेन साधुता चेति चेन्न समासस्यानित्यत्वात् नानुयाजेष्विति पर्युदासे नञ् न
चैवं वाक्यवृत्तिपदत्वान्नञोऽन्यपरत्वाभावः गौर्वाहीक इत्यादौ वाक्येपि गवादिपदस्यान्यप
रत्वात् यदि च प्रसज्यप्रतिषेधे नञ् तदा मंत्रे विधायकतन्निषेधयोर्विरुद्धार्थत्वेन वाक्य

भेदापत्तिः तस्मात्प्रथमप्रतीतैकवाक्यताबलादेकवाक्यत्वे संभवति वाक्यभेदस्यान्याय्य
त्वात् नञ्पदे लक्षणा कल्प्यते न त्वत्र पदद्वयस्य स्वार्थान्वयानुरोधादेकवाक्यतात्यागः नहि पदा
र्थानुरोधेन वाक्यार्थकल्पनं किंतु वाक्यार्थानुरोधेन पदार्थकल्पना न पदं च केवलेऽत्रा
त्यैव नञ्पदाद्येव सर्वत्र समासानित्यत्वेन प्रयोगोपपत्तेः अन्यथा प्रसज्यप्रतिषेधेन
ऽत्र स्यात् न त्वपदे नैव गतार्थत्वात् असमानो नाइत्यत्राऽपदमेव निषेधवाचकं समासवाक्य
भेदेन नञो द्वैविध्यात्तत्त्वाभिधानं इतरेतरद्वंद्वे च धवखदिरौ छिंधीत्यादौ विभक्त्युपनीतद्वित्वस्य धव
खदिरयोः प्रत्येकं न योग्यत्वेन वा साकांक्षत्वं द्वित्वमपि न प्रत्येकं योग्येन वा साकांक्षं एकत्र द्वित्वाभावात्
न च व्यासज्यवृत्तित्वेन द्वित्वमेकाश्रितमिति वाच्यं स हि द्वित्वसाकांक्षत्वेति द्वित्वं च तं यत्र द्वित्वं परिसमाप्य
ते एकस्य तथात्वे घटो वरश्चेत्येकत्रापि स्यात् अतो द्वंद्वे पदद्वयार्थस्य नान्वयबोधः बोधे वा धवद्वया
धीः खदिरद्वयधीः स्यात् तस्मात्पदद्वयार्थे द्वित्वान्वयानुपपत्त्या साहित्यावस्थापन्नमये द्वित्वान्वययोग्यं
रसहि तत्साकांक्षत्वेति खदिरं घटोपस्थितये धवपदे साहित्यलक्षणा ननु खदिरसहितस्यैकत्वात्खदिरसहि
तो धव इतिवद्द्विवचनानुपपत्तिः धवसहितखदिरसाहित्यावस्थालक्षकत्वे च तस्या एकत्वादेकवच
नापत्तिः अवस्थाश्रययोरुपसर्जनत्वेन द्विवचनानुपपत्तिश्चेति चेत् अत्र केचित् अवस्थाल
क्ष्यत्वेपि तदाश्रयगतसंख्यार्थबोधकत्वमेव द्विवचनबहुवचनयोः पदवृत्तिवैचित्र्यात् तथैव व्युत्पत्तेः
पथ्या गुणवाचिनीलादिपदं क्वचित् गुणमात्रवाचकं क्वचित्तु उत्पलादितद्द्रव्यपरं अन्यथा नीलः प
ट इति सामानाधिकरण्यं न स्यात् एकत्रवृत्त्यभावात् यत्तु लक्षितसाहित्यावस्थाश्रयमुभयं ल
यत्ती [illegible]ति तत्र लक्षितलक्षणाया जघन्यत्वात् वस्तुतस्तु साहित्याश्रयः प्रधानं साहित्यं तत्र विच्छेदकत्त
या गुणीभूतं पदेन लक्ष्यते तेन साहित्यावस्थस्यानेकत्वाद्द्विवचनबहुवचने भवतः अत एवेतरेतरद्वंद्वः

त॰चि॰म॰ सर्वपदार्थप्रधानः धवश्चखदिरश्चेति विग्रहे सान्तव्येवार्थविवरणात् समाहारे तु साहित्यावस्थाप्रधानं पदा प्रा॰वि॰
८९ र्थो गुणीभूतः तेन तस्यैकत्वाद्द्वेरीपटहमित्यादावेकवचनं धर्मधर्मिणोश्च तात्पर्यभेदात् द्वंद्वयोर्भेदः अत्र
४१ त एव युगपदधिकरणवचनः इतरेतरद्वंद्व इति शाब्दिकाः नापि क्रियान्तरत्वाधिकरणां पदार्थानां तेषां युग
पद्वचनं एकेनैकदोपस्थापनं तत्त्वं न घटता एकपदस्येतरपदार्थेन शक्त्यभावात् अन्यथैतरपदवैय
र्थ्यप्रसंगः अनेकार्थत्वेप्येकस्यैकत्रैनेकार्थपरत्वाभावात् नापि पदद्वयं मिलितं उभयोरुपस्थापकं मि
लितस्य मिलिते शक्त्यभावात् नापि द्वंद्वशक्तिरेव पदलक्षणायैवानेकार्थोपस्थितिसंभवात् अत ए
वांगवंगकलिंगशब्दात् द्वंद्वे बहुषु वर्त्तमानात्परस्य तद्राजस्याऽदेस्तद्राजस्य बहुषु तेनैवास्त्रियामित्यने
न लोपे अंगवंगकलिंगा इति भवति अन्यथा साहित्यलक्षणां विना तेषां प्रत्येकपदस्य बहुष्ववृत्त्यभावाद
लोपो न स्यात् घटौ घटा इत्यत्रापि घटसाहित्ये न घटत्वेन द्वित्वबहुवचनान्वययोग्यतेति तदुपस्थितये घ
टपदे साहित्यलक्षणा तदर्थप्रदर्शनार्थं द्वंद्वापवादकं सरूपाणामेकशेषानुशासनमपि ननूक्तं
सहभावविवक्षायां वृत्तिद्वंद्वैकशेषयोः क्रमेणार्थप्रतीतौ हि तस्या द्विवचनादिकं इति ननु स्वरू
पद्वयमेव साहित्यं अतिरिक्तस्याभावात् स्वरूपयोश्च धवपदादुपस्थितौ युगपद्वृत्तिद्वयविधः तो
न चाजहत्स्वार्थासाधारणरूपाभावात् एकक्रियान्वयित्वमेकान्वयप्रकारकत्वमपेक्षाबुद्धिविशे
षविषयत्वादिकं द्वित्वाद्यन्यायात्सर्वमविद्यमानमप्रतीतं च धवखदिरावितिहि प्रतीतिः नन्वरूपांत
रेण न च धवपदस्य खदिरेस्यार्थसंबंधो लक्षणाबीजमस्तीति चेत् साहित्यं हि तुल्यधार
तासावधातूपनीतफलानुकूलसजातीयविजातीयव्यापारप्रचयस्यैकरूपस्तुल्यः संबंधः द्वं
द्वेन्योन्यसंबंधोप्ययमेव धवखदिरौ छिंदीत्यत्र छिंदानुकूलो यावान्व्यापारः स तयोस्तुल्य एव

भासतेव अतः स्वर्गकामादौ पदानां सहत्वेनानुप्रवेशोपि न द्विवचनापत्तिरेकत्वविरोधो वा अत्रान्यधारकता
त् दंपत्योरेकरूपसजातीयविजातीयव्यापारप्रचयसंबंधरूपसाहित्याभावात् एवं छिद्रानुरूप्यं व्या ल:
पारत्वेनसाहित्यरूपेण प्राक्लक्ष्यसाधारणो नाजहत्स्वार्थलक्षणया धवपदानुपस्थितेर्धवखदिररूपे
विभक्त्यर्थद्वित्वान्वयः धवपदार्थस्य खदिरेण संबंधोपि तत्त्व्यधारत्वमेव न चास्य लक्ष्यत्वान्न संबंधस्व
रूपत्वमिति वाच्यं अजहत्स्वार्थाया हि येन रूपेण लक्ष्यता स एव संबंधः यथा छत्रिकेकपदयोः छत्रिघ
टितसमूहवर्त्तित्वं दण्डपदयोस्तत्कर्तृत्वं च लक्ष्यमेव संबंधः न चैवं खदिरपदवैयर्थ्यं लक्षणीयपदानुप
योगादिति वाच्यं खदिरपदं विना न नियततया खदिरोपस्थितिः अतः साहित्याश्रयद्वितीयविशेष
ज्ञापनाय तस्यापेक्षितत्वं अन्यथा लक्षणाविरहेण धववैयर्थ्यप्रसंगात् अत एवाग्नीषोमीये अग्नी
षोमौ देवते इति द्वित्वान्वयबलादेव साहित्यावस्थयोः सापेक्षयोर्देवतात्वे द्वंद्वे अग्निपदं लक्षकमा
पद्यते द्वितीयपदं साहित्यनिरूपकतया कांक्षितसमर्पकं मुख्यमेव उभयोर्मुख्यार्थत्वे हि
त्वभावात् अन्येतु द्वितीयपदेपि लक्षणा समभिव्याहृतविभक्त्यर्थान्वयानुरोधात् अन्यथा
समभिव्याहारभंगापत्तेः पदार्थगतस्वार्थबोधिका हि विभक्तिः न च समासपदमन्यपदत्ति समस्य
मानपदानां समासे शक्त्यभावात् तेन धवपदार्थमात्रं खदिरपदार्थानुगतं च द्वित्वं तत्रेण विभक्तिराह
तो धवपदवत्खदिरपदेपीतरसंबंधावस्थार्थपरता प्रातिपदिकार्थेतरपदार्थान्वयस्य विभक्त्य
र्थगर्भत्वात् उभयपदार्थगतं एव द्वित्वकर्मत्वे विभक्तिराह न च द्वयोः सहितावस्थार्थपरत्वे धवखदिरं स्व
दिरद्वयं च वाक्यार्थे न्वीयेत न त्वेको धवः खदिरश्चेति अन्तर्भावापत्तिरिति वाच्यं पदद्वये न हि तयोरेक
मेव साहित्यं लक्ष्यते तच्चानयोर्लक्ष्यैव वृत्ति अपरे तु द्वितीयपदं फलतो नुवादकं यथा न्वितामिधाने ।

एकंपदंअत्तएवसमुच्चयेत्वाचयेचतयोःसाहित्यानवगमाद्विवचनवहुवचनेनवाधःद्वः यद्यपिवार्थ
मात्रेद्वंद्वानुशासनंतथापियत्रान्योन्यसाहित्यान्वयार्थंकइतरपदार्थान्वयस्तत्रसमासःसाधु
स्तेनेतरेतरयोगसमाहारयोस्तथाभावात्समासः समुच्चयेऽन्वाचयेचनतथाऽसंबंधु एकैकस्याः
क्रियान्वयात् एवंधवखदिरंछिंधीत्यादौसमुच्चयेनल्यवदसंबंधयोःक्रियान्वयधीःपश्चात्
तयोरेकरूपसजातीयविजातीयव्यापारप्रचययोगित्वंसाहित्यंचकारादवगम्यते क्रियाभेदे
चाचयः यथैधानाहर्तुंवनंव्रजशाकंग्रप्यानेष्यसीति श्रौण्ठ्याम्बष्ठेतिद्वंद्वसमासार्थवाक्यमेव
साहित्यंपरमनेनतस्फोरितंद्विवचनवहुवचनयोरेवतद्व्यंजकत्वात् यत्तद्वित्वान्वयार्थेन
दन्वययोग्यार्थोपनयनं अपेक्षाबुद्धिविषयत्वावस्थायाद्वित्वान्वयस्त्यपेक्षाबुद्धिविषयत्वाव
स्थत्वार्थपरमात्सइदमेवचसाहित्यं नत्वेकक्रियान्वयःतस्याविभक्त्यैवबोधितत्वात् एकक्रि
यान्वयभावेपिचद्वित्वान्वयदर्शनादिति नत्रअपेक्षाबुद्धिविशेषविषयत्वार्थमप्येकउपाधिरवश्यं
वाच्यइतितस्यैवलक्षणायायुक्तत्वात् लाघवात् नचाविनालक्षणांअन्यसंबंधस्यसतःसापेक्ष
स्यक्रियान्वयोपिविभक्त्याबोधतइति अत्रोच्यते एकस्यत्यागरूपपदद्वयतस्तत्रतयास्वत्वार्थ
योरेकदास्मृतिसंभवादनेकस्मृत्यर्थंनसाहित्येलक्षणा एकैकमात्रगोचरसंस्कारद्वयाद्विपदयो
स्तदर्थयोश्चैकास्मृतिरित्यनुभवासिद्धं प्रत्येकेंद्रियसंयोगात्समूहालंबनमिवअन्यथाद्वंद्वेनल
क्षणानवातयानेकस्मृतिः पदयोस्तदर्थयोश्चैकस्मृत्यभावात् एवंचपदद्वयादुपस्थितेधवख
दिरादिस्वरूपेविभक्त्याद्वित्वान्वयोबोध्यते यथेंद्रियसंनिकृष्टेज्ञानेवाधवखदिरादिस्वरूपेप्रत्य
क्षेणाद्वित्वंबोध्यते [illegible]रूपातिरिक्तंतल्यघटत्वादिकंसाहित्यमस्तिज्ञायतेवा तथावि
न्यत्रतयोःस्व

तथा
र्थपविलक्षणारूपे द्वित्वं बोध्यते उभयोर्द्वित्वान्वयबोधकत्वे विशेषाभावात् ननु योग्यतावच्छेदकरूपे
णोपस्थिते इतरपदादन्वयबोधः साहित्याश्रयत्वेन च धवखदिरौ तथा न प्रत्येकं छिद्रेतरत्ववि
शिष्टघटपदस्य लक्षणौ वेत्तिचेत् न उपस्थितेयोग्येऽन्वयबोधेऽधिकस्य गुरुत्वात् घटपदादपि
योग्यस्यान्वयो बोध्यते न तु छिद्रेतरत्वेनेत्युक्तं स्यादेतत् पदद्वयान्नयस्य प्राक्तया एकपदासत्तेने
तरपदार्थस्य विभक्त्यर्थस्य वान्वयबोधो न स्यात् इतरपदार्थे इतरपदानां नामार्थे विभक्तीनां स्वा
र्थान्वयबोधकत्वमिति व्युत्पत्तेर्बाधेश्च अनेकं च न पदार्थो नापि नामार्थः मिलितपदद्वये पदत्व
नामत्वयोरभावात् अतो द्वित्वान्वययोग्यस्य पदार्थनामार्थं निर्वाहाय घटद्वपदे साहित्यलक्षणेति
तत्र पदार्थत्वं हि वृत्त्या पदोपस्थाप्यत्वं पदतात्पर्यविषयत्वं वा अस्ति च घटद्वपदस्यानेकमुपस्था
प्यं तत्र तात्पर्यं च तन्निर्वाहश्चानेकैकस्य तिघारालक्षणाया पदेन वा स्वस्य प्रशक्त्या पदाभ्यां वेति न कश्चि
द्विशेषः एकपदोपस्थाप्यत्वं च न पदार्थत्वं गौरवात् एवं नामार्थत्वमपि तत्तात्पर्यविषयत्वमेव
अथ पदार्थतावच्छेदकावच्छिन्ने विभक्तेः स्वार्थान्वयबोधकत्वं अतो मिलितेतदवच्छिन्नत्वं नामि
लितवृत्तिपदार्थतावच्छेदके लक्षणां विनेतिचेत् धवखदिरस्वरूपद्वयस्य प्रत्येकं तदवच्छिन्नत्वमेव
मेलकं च न स्वरूपद्वयातिरिक्तं प्रत्येकस्यायोग्यत्वात् न द्वित्वान्वयः तथापि यादृशो द्वित्वान्वयस्ता
दृशो न तदवच्छिन्नस्तदवच्छिन्ने च न द्वित्वान्वय इति चेत् न स्वरूपद्वयातिरिक्तस्य तादृशपदार्थस्या
भावात् वस्तुतः समभिव्याहृतपदार्थे विभक्त्यर्थान्वय इति व्युत्पत्तिः लाघवात् न तु पदार्थताव
च्छेदकावच्छिन्ने गौरवात् ननु विभक्तेः पदार्थतावच्छेदकधर्मव्याप्यसंख्याबोधकत्वं घटादन्यत्र
तथा व्युत्पत्तेरिति उभयगतपदार्थतावच्छेदकसाहित्यलक्षणेति चेत् पदार्थतावच्छेदकधर्मसमा

त॰चि॰म॰ नाधिकरणस्वार्थबोधकत्वेन विभक्तिव्युत्पत्तिर्लाघवात् ननु सामानाधिकरण्ये नियमं दोषोपि त्रिविंशतिगौर प्रा॰वि॰
९५ वात् नन्वेवं च घटावानयघटं चेत्यत्र घटत्वसमानाधिकरणद्वित्वसमभिव्याहृते पटे -- न साद्यान्वयबो
91 धः स्यादिति चेत् विभक्तीनां योग्यतादिसत्त्वे स्वार्थगतस्वार्थबोधकत्वव्युत्पत्तेर्न च घटावित्यत्र घटपदं प्र
कृतिः धव---वित्यत्र धवपदं व्यवहितमपि विभक्तिसमभिव्याहृतमेव तदंतर्भावेनैव समासस्य प्रा
तिपदिकत्वात् विभक्त्यंतर्भावेनैव नामार्थस्य क्रियान्वयित्वात् विभक्तेरेकपदार्थमात्रगतसंख्याभिधा
यकत्वं नानापदार्थगतसंख्यान्वयाबोधकत्वं चेति चेत् न आद्ये एकमात्रपदयोर्व्युत्पत्त्यात्वाधिकत्वात्
द्वितीये न्वयाबोधकत्वे योग्यताविरहस्यो याधित्वात् न चैकधर्मावच्छेदकं विना यदि स्वरूपद्वये द्वित्वा
न्वयः तदा धवं च खदिरं चेत्यत्र वाक्यभेदः स्यात् द्वित्वविशिष्टैकार्थाप्रतिपादकत्वादिति वाच्यं आन
यनान्वितद्वित्वविशिष्टैकार्थबोधकत्वात् धवखदिरावितिन वाक्यं क्रियायाः प्रत्येकमन्वये वाक्यभेद
इत्यपि न लक्षणापत्तेपि प्रत्येकमेव क्रियान्वयित्वात् गमनादिक्रियायाव्यासज्यवृत्त्यभावात्
न द्वाजानां तु प्रत्येकं तेनैव व कृत्स्नवर्त्मा नान्यस्य मोदे लोपो भवति तेनैव न द्वाजान्ते नैवेति वचनात्
न चैकबोधकात् अत एवांगानां अपत्यानि बहूनि राजानो वा अंगा इत्युदाहरणं अंगानामपत्यं रा
जेति आंग इति प्रत्युदाहरणं वृत्तिकारो दर्शयति स्म तस्मान्नानापदादुपस्थिते ऽनेकत्र द्वित्वान्वय इति ना
नेकोपस्थितस्य पर्यसाहित्य लक्षणा अत एव च द्वैकलंकः सज्जने हरिदत्ताविका प्रालक्ष्मीः कमलेषु चंचला
प्रखाप्रसादः स धनेषु सर्वदा यशो विधातुः कथयंति खंडितमित्यादावेकैकस्य त्वात्रूढ नानाप
दजनितैकस्मर्तिविषये प्रकलंकादिषु व कृत्वान्वयबोधः मेलकोपस्थापकस्य द्वंद्वस्य तत्राभावात्
न त्वकल्पने मानाभावात् एकवचनांतनां वाक्ये ऽनन्वयप्रसंगाच्च नन्वेवं धवखदिरौ छिंधीत्यत्र

तयोः छिदानुकूलव्यापारवत्त्वं साहित्यं न प्रतीयते चेति चेन्न द्वित्वान्वययोग्यधात्वर्थं तत्र प्रतीयत एव ननु
वि तरं चैत्रमैत्रौ क्रियाभेदेन संभूय छिदानुकूलसजातीयविजातीयव्यापारप्रकारकक्रियान्वयबोधे तात्पर्यं ते
न च यत्र तुल्य एव संबन्धो धवखदिरे चत्वो छिनत्ति यथा धवं छिनत्ति खदिरं चेति समुच्चये न चैवं द्वन्द्वसमाना
र्थं तत्समुच्चयेऽपि समासः स्यादिति वाच्यं द्वन्द्वे युगपदुपस्थितेः द्वये एकदा क्रियान्वयबोधे तात्पर्यं तेन
न तत्र समासः समुच्चये क्रमेणोपस्थितेः क्रमेण क्रियान्वयबोधे तात्पर्यमित्यसमासः अत्रावये
यं वदन्ति यदि तुल्यव्यापारत्वेन साहित्येन द्वयोरुपस्थितिः यदा पर्वतश्च तदा तुल्यव्यापारो सहितो
वा गच्छत इति धीः स्यात् न त्वेवं मैत्रादीनि पदार्थतावच्छेदकरूपेण पदार्थैर्विभक्तेः क्रियापदस
मान्वयबोधकत्वव्युत्पत्तेः व्यापेक्ष यथा दधिमुपघातकत्वेन काकादेरितरपदार्थान्वयः सहिता
वस्य चैत्रमैत्रत्वेनोपस्थितौ घटस्यैकं द्वित्वान्वयानुपपत्तिरिति द्वयाविरोधश्च अपि च चैत्रमैत्रौ
गच्छत इत्यत्र गमनस्य व्यासज्यवृत्तित्वाभावात् चैत्रत्वेन गगनान्वयार्थं चैत्रपदात् चैत्रत्वेन द्वि
त्वान्वयार्थं मैत्रसाहित्यं चैत्रत्वेनोपस्थितौ युगपद्वृत्तिद्वयविरोधः साहित्यावस्थे गमनकर्तृत्वाभा
वात् आख्यातार्थसंख्यान्वयोऽपि न साहित्यावस्थे न च साहित्यत्वेन पदार्थैकदेशे चैत्रमैत्रे च धात्व
र्थगमनान्वय इति वाच्यं सहितो गच्छतीति धीप्रसंगात् न च धात्वर्थगमने आख्यातार्थद्वित्वा
न्वयः सामानाधिकरण्यभंगप्रसंगात् सुबन्ततिङन्तयोरेकसंख्याभिधायकत्वात् एवं गर्गा भु
ंजत इत्यत्र भोजनस्यैककर्तृकत्वानियमात् अनेककर्तृकं भोजनं न संभवतीति [illegible] इत्यत्र गर्ग तं
त्वेनोपस्थिते ऽनेकत्र सप्रति दुः र्थबहुत्वान्वयः ननु साहित्यत्वेनोपस्थिते यद्यपि तत्रापि धात्वर्थभोज
नगतं बहुत्वमाख्यातेनोच्यते इति तन्न तिङन्तसुबन्तयोः सामानाधिकरण्यानुपपत्तेः भोजना

त॰चि॰म॰ ९२ नां साहित्येनानुपस्थितेश्च यदा चानुगतरूपं विनैवैकैकपदात्तत्तस्य शक्त्योपस्थितेष्वेकत्र योग्य शा॰वि
तयाघटितत्वघटकत्वान्वयः तदा स्तुवंतित्यादौ तत्संख्यान्वयः प्रातिपदिकार्थे भवतीति नैते दोषाः यत्तु सा
92 हित्यं नोभयानुगतं तत्त्व्यापारादिकं तेन रूपेण धवखदिरयोर्विभक्तिधात्वर्थान्वयाप्रतीतेः किंतु
प्रत्येकं विलक्षणं स्वरूपद्वयमेव प्रत्येकान्वयभाग्यस्मादेव भवति हि द्वयाद्न्य एकः धवो न धवखदि
रौ तौ वनं धव इत्यनुभवात् तथा चैकमात्रवाचकेन द्वयमशक्यं लक्ष्यत इति न तत्र द्वयविरोधः
धवपदस्य च स्वार्थनिरूपणत्वमेव लक्ष्ये स्वरूपद्वये संबंधः एकनिरूपणत्वाद्द्वयस्य अनुगतधर्मं वि
नापि धवपदादनेकोपस्थितिः ध्रुवपदादिव चतुर्दशानां योग्यतया विभक्त्यर्थस्य स्वरूपद्वये
धात्वर्थस्य च प्रत्येकमन्वय इति तन्न उक्तरीत्या हि स्वस्वशक्त्या नानापदजनितैकस्मृतिवि
षयेऽनेकत्वघटितान्वयबोधसंभवात् तत्तदर्थसाहित्यलक्षणा घटौ घटा इत्यत्र घटितत्वघटकत्वा
न्वययोग्यानेकोपस्थितिः शक्तित एव तत्र वृत्त्या घटपदात्तत्संभवतीति तत्र दर्थलक्षणा य
था ग्रहं संमार्ष्टीत्यत्र ग्रहपदात्तत्र वृत्त्योपस्थितानेकग्रहे संमार्गान्वयः तर्हि तत्रानेकग्रह
स्वरूपमात्रज्ञानवदिहापि अनेकघटस्वरूपधीः स्यात् न तु तत्तद्द्वयांसाहित्यावस्थात्वधीरिति चेत्त
तां विनापि घटितत्वघटकत्वान्वययोग्योपस्थितेः साहित्यावस्थात्वेनानेकस्य घटितत्वघटकत्वान्वययोग्यतेति
चेत्त प्रकृतत्तदुपस्थितानेकत्वेनैव तद्योग्यत्वात् लाघवात् भवत्वनेकत्वघटितान्वयबोधस्तथा साहित्य
धीस्तल्लक्षणां विना न स्यादिति चेत्त विभक्त्यर्थधात्वर्थव्यापारान्वयबोधात् पूर्वमनेकत्वतुल्य
रत्वस्याप्रतीतेः किं चैवं न विभक्त्यर्थघटितत्वघटकत्वान्वयानुपपत्त्या लक्षणा किंतु साहित्यप्रतीत्य
नुरोधात् तथैवमपि धात्वनेव तत्तत्तद्व्यापारवत्त्वस्य बोधनात् तदन्वयबोधात्पूर्वं तत्प्रतीत्य

सिद्धेः समाहारेत्तु पाणिपादं पंचमूलीत्यादौ तावद्बहुत्वैकधर्माभिधानं लक्षणायैव तदेकत्वादेकव-
चनं तदाकुःशाद्धिकाः समाहरणं समाहारो नेकस्यैकीकरणं एको धर्म इति यावत् सचैको धर्मः से-
नावनादावि वद्वित्वबहुत्वसंख्यापेक्षाबुद्धिविषयत्वं वा विरूपैकशेषेप्युपितरावित्यत्रैकस्यापि द्व-
यर्थभावात् अगत्यापितृपदे जनकद्वंपत्यैलक्षणा विभक्त्युपनीतं द्वित्वं विरूपयोरेव मातापि-
त्रोरवगम्यते सरूपस्यापितृद्वयस्याभावात् द्वयस्यैवैकं प्रत्यजनकत्वात् श्वश्रुरावित्यत्र श्वशुरपदे
पत्नीजनकद्वंपत्यैलक्षणा पत्नीजनकद्वित्वं चोक्तन्यायात् पत्नीमातापित्रोरेव ब्राह्मणावानयेत्य-
त्र दंपतिहृज्ञाप्रकरणे मानानंतराद्ब्राह्मणाब्राह्मणीपरत्वावगमे पुमान् स्त्रियेतिविरूपैकशेषत्वाद्ब्रा-
ह्मणपदे स्त्रीपुंसलक्षणैव अनन्यगतिकत्वात् पुल्लिंगत्वं तु पदार्थस्यैकदेशागतमसन्नुच्यते स्त्रीपरत्वात्ता-
नेवब्राह्मणपदेन तत्त्वबत्याः पुंद्वयमेवोच्यते नतु स्त्रीपुंसौ सरूपैकशेषापेक्षया विरूपैकशेषस्य लाक्ष-
णिकत्वेन जघन्यत्वात् यदिव सरूपैकशेषेपि लक्षणा तदाप्यौकारांतपदात्पद्वितीयबहुद्वौद्वितीया पुं
पेक्षायां वक्तव्यो धास्यपुंसकत्वात् लिंगानुरोधात् द्वीवर्थकल्पने मानाभावात् पुंद्वयमेवावग-
म्यते नतु स्त्रीपुंसौ शिवौ नमस्कुर्यादित्यत्र नमस्यापि शिवांतराभावात् विरूपैकशेषएवत्यगत्या शिवप-
देन शिवश्च शिवश्च लक्षणायोच्यते भ्रातरौ पुत्रावित्यत्रापि मानांतरान् स्त्रीपरत्वज्ञाने भ्रातृपुत्रौ स्वसृ-
त दुहितृभ्यामिति विरूपैकशेषात् भ्रातृपदेन भ्रातृस्वसारौ पुत्रपदेन च पुत्रदुहितरौ लक्ष्येते स्त्रीपरत्वाज्ञाने हि
च तत्र तत्त्वोक्तपुत्रभ्रातृद्वयं पुत्रद्वयमेवोच्यते नन्वेवं द्वौ मेषसाजावग्नीनादध्यायात्तामित्य-
त्रापौकानां नवसानपदोत्तरद्वितीयपुंबहुद्वौद्वितीयापेक्षायां तत्यदवो धास्यपुंसकत्वात् ताव-
द्यर्थकल्पने बहुत्वभावात् पुंद्वयबहुद्वौ पुंशब्दयविधिराधाने स्यात् बसान्त पदानां तत्र बहुत्यापि स्त्रीपुं-
सयोस्तीनां संभवात् न[illegible] पुमान् स्त्रियेति विरूपैकशेषो भेदः यत्रानुमानानंतरान्ती परत्वधी
चैवं

का

त॰चि॰म॰ ९३ स्त्वसस्वे द्वितीयस्य प्रातिपदिकार्थत्वात् उभयसमवेतद्वित्वस्य पुंस्त्वेपि संभव इति भिन्नत्वान्न तत्र संख्या धा॰वि॰
भिधाने विरूपैकशेषसंभवात् एतल्लिङ्गयाउपनायकाभावात् द्वितीयत्वेन स्त्रिया अप्राप्तत्वात् वसा
नप्रदस्योक्त उक्तत्वात्तदुपस्थापकत्वाभावात् सरूपैकशेषेणैवस्यात् मैवं द्वौ मेषसानावित्यत्र य॥
त्कर्त्तव्यं तद नयासहेति विधिनान्यथा धाने सहत्वेन अन्यापत्त्यैव पुंसः सद्वितीयत्वात् ननु प्राप्ते
पुमन्तरेणावाक्यभेदापत्तेः पुंस्त्वं तु विभक्त्यानामार्थ गवामेवान्वयते ननु नामार्थैकदेशाम
तं अन्यसहितावस्य पुमर्थस्यैव नामार्थत्वादिति आख्यातस्य यत्नवाचकत्वादेवनतरेरद्योग
छतीत्यादौ आख्याते व्यापारलक्षणा तथाहि आख्यातस्य पचतीत्यादौ यत्नो वाच्यः पचतीपाकंक
रोतीत्यादि यत्नार्थककरोतिना सर्वाख्यातविवरणात् बहुद्रव्यवहारादिवत्तद्बाधकाभावे विवरणाद
पि व्युत्पत्तेः दंडादिसमासस्य विग्रहेण विवरणो विग्रहार्थे विनष्टक्ते रन्यलभ्यत्वात् किं करोतीति
यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थत्वं विना अनुपपत्तेरित्याचार्याः अत्र वदंति आख्यातस्य करोते
श्चैनयत्नार्थत्वे रथो गच्छति जानाति यतते निद्रातीत्यत्र धात्वर्थानुकूलयत्नाभावेप्याख्यातप्रयो॥
गात् गमनं करोतीति करोतिनानत्राख्यातविवरणाच्च तत्र व्यापारस्य करोत्यर्थत्वेवेतनेपि तथा
नचतत्राख्यातकरोत्योर्गौणत्वं मुख्ये बाधकाभावात् अत एव प्रश्नोत्तरयोर्न यत्नार्थत्वं किंतु
कृञः क्रियावाचित्वमेव तेन किं करोतीति क्रियामात्रप्रश्ने पचति गच्छतीति क्रियाविशेषणोत्तर॥
मपि समंजसं भवति अथ क्रियाजन्यतावच्छेदकविशेषोपि यत्नजन्यता तन्यत्वाभ्यां घटं कुर्योः कृतीकृतव्य
वहारात् तत्र तत्र धात्वर्थ्युत्पन्नकर्तृपदस्य कृत्याश्रयवाचकत्वाच्च कृञो यत्नार्थत्वं क्रियामात्रार्थत्वेकृ
ञः क्रियाश्रयः कर्तृपदार्थः स्यात् तथा च कारकमात्रे गतिप्रसंगः एवं कृञो यत्नार्थत्वेनेन वाख्यातविव
रणात्तस्यापि यत्नोर्थः तदुच्यते कृताकृतविभागेन कर्तृरूपव्यवस्थया यत्न एव कृतिः पूर्वापरास्मि

नैव भावना सैवाख्यातार्थो भावनोच्यते इति चेन्न बीजेनांकुरः कृतः सुवर्णादिना सुखं कृतं बीज
मंकुरं करोतीति यत्नं विनापि व्यवहारात् कर्तृपदं च न यौगिकं तथा हि कृञो यत्नार्थत्वे तत्र च प्रकृ
त्यर्थत्वे कर्त्रर्थत्वे वा धातुप्रत्ययार्थयोः कृत्योः कृतिकर्त्रोर्वा परस्परमन्वयः कृतौ कृतिजन्यत्वत त
द्विषयत्वस्य चाभावात् कृतिविशिष्टस्य कृतिनिराकांक्षत्वाच्च एवं कृञः क्रियार्थत्वे तत्र च प्र
क्रियाश्रयवाचकत्वे तयोः परस्परमनन्वयः एवं तूभयदर्शनेन कर्तृपदं कर्मादिपदवत् रूढमे
व रूढिश्च कृत्याश्रये क्रियाश्रये वेत्यन्यदेतत् तथा च कर्तृत्वाकृतत्वविभागेन कर्तृरूपव्यवस्था त
यावन कृञो यत्नार्थत्वमिति किंचाख्यातस्य करोतेश्च न यत्नार्थत्वं याकाययत्नेनो पाकंक
दौ रोतीत्या यत्नद्वयस्य यत्नविषयकयत्नस्य चाप्रतीतेः प्रकृतिप्रत्ययार्थयोः सामान्येनान्व
यानुपपत्तेः पौनरुक्त्यात् एकत्वे वैविध्यस्यबाद दोषाच्च ननु प्रकृतेस्तदर्थत्वेपि प्रत्ययस्य
तदर्थत्वं न दोषाय एको द्वौ बहवः पचिषतीत्यत्र व्यभिचारात् यत्तु द्वितीयसंख्येशादि
कल्पनवदिहापि द्वितीययत्नकल्पनमिति तन्न द्वितीयसंख्येच्छायत्नाभावात् वस्तुतस्तु
प्रत्येकं सामर्थ्यावधृतौ संभेद तूभयोरुपस्थितेरेव प्रपकत्वे प्रेक्षस्यानन्वये प्पदोषात्
पाकाययत्नेन पाकं कुर्यादित्यत्र कृत्यर्थकाख्याते त्वयापि तथैवांगीकारादिति चेत्
न एको द्वौ बहव इत्यत्र नामार्थस्य विभक्त्युपनीतसंख्यान्वयावगमयोग्यत्वात् लडादे
र्न सामर्थ्यानवधारणा लिङ्प्रवेतेन्यत्र कृतो सामर्थ्यावधारणाच्च अथ यत्नार्थकधा
तुं प्रत्याख्यातस्य यत्नार्थकत्वेन यत्नन्यत्रनानन्वयः अचेतने चाख्यातप्रयोगे गोरा
एव न च रत्यन्तरेणापि प्रयोगसंभवे शक्तिकल्पना युक्ता यद्वा कूलयत्ने प्रवृत्तं पदं त
देकदेशोनुकूलमात्रे प्रयुज्यते विशुद्धिमात्रपुरस्कृत्य प्राह्मणो श्रोत्रियपदवत् अ

चैत्रेणतु मध्यमपुरुषोत्तमपुरुषौ न भवत एवोपपदयोर्युष्मदस्मदोश्चैत्रानर्थत्वात् भवतु
वा गौणा एव लोकस्यापर्यनुयोज्यत्वादिति चेन्न अचेतने आख्यातस्य मुख्यत्वेकाभावात् बाध
गौणत्वाभावात् तस्मादाख्यातस्यानुकूलत्वेन व्यापारो वाच्य इति भाट्टाः अचेतनाचेत
नयोर्धात्वर्थानुकूलव्यापारस्य सत्त्वादाख्यातप्रयोगो मुख्य एव नचैवं पच्यधिश्रयणेपि पच
तीति स्यात् [illegible]द्वारा श्रयणस्य पाकानुकूलव्यापारत्वादिति वाच्यं तत्र प्रयत्नविशे
षस्यैवानुकूलव्यापारविशेषस्य वाच्यत्वात् अन्यथा यत्नवाच्यत्वे तण्डुलानुकूलयत्नवति
पचतीति स्यात् एवमचेतनेपि करोतिनाख्यातविवरणात् करोत्यर्थोपि व्यापारविशेष
एव कथं तर्हि चैत्रः पचतीति पाकानुकूलयत्नवत्प्रतीतिः आक्षेपादिति चेन्नाख्यातार्थेन
व्यापारेण संख्यया वा यत्नाक्षेपात् तयोः प्रयत्नं विनापि सत्त्वात् नापि कर्तृत्वमात्र
स्याकर्तृत्वात् यत्नवत्त्वस्य कर्तृत्वे आख्यातेन तदभिधाने यत्नस्याभिधानात् नापि
धात्वर्थमात्रेण तस्य प्रयत्नं विनापि सत्त्वात् नापि यत्नो धात्वर्थः क्रियायास्तत्फलस्य वा
धातुवाच्यत्वात् अन्यथा पाक इत्यत्रापि यत्नानुभवप्रसंगात् इति चेन्न धात्वर्थविशे
षेण पाकादिना यत्नाक्षेपात् तस्य प्रयत्नं विनाऽनुपपत्तेः अपि पचतीत्यस्य पाकयत्न
वानिति विवरणात् यत्नार्थतेति चेत्तर्हि कर्त्रर्थतापि स्यात् नहि पाकयत्न इत्येव विवर
णं पचतीतीत्यस्य तात्पर्यविवरणं तत् तत्राक्षेपेणापि निर्वहतीति चेत्तुल्यं यत्नेपि कथं त
र्हि रथो गच्छतीति विपत्ते व्योमेति भावनानुभव इति चेन्न कथंचित् भावनाया धात्वर्थान्वययो
ग्यत्वेन तथापि तत्र गौणत्वाभ्युपगमादिति उच्यते चैत्रः पचतीत्यत्र पाकानुकूलयत्नानु

भवा यत्न एवाख्यातार्थः लाघवात् न त्वनुकूलो व्यापारः यत्नत्वापेक्षया व्यापारत्वस्योपा
धित्वेन गुरुत्वात् न चाचेतनेपि आख्यातस्य मुख्यत्वार्थमनुगतो व्यापारः पदशक्यः अ
ख्यातत्वसंभवेत्यागायोगादिति वाच्यं शक्तिग्राहकेण प्रमाणेन लघुनि शक्तिपरिच्छेदात्
अचेतने प्रयोगस्य ह त्वंतरेणापि संभवात् मुख्यत्वार्थं शक्तिकल्पने वक्तृत्वं न रोछेदः
एतेन व्यापारवाचकाख्यातस्य यत्नसाध्यार्थकपच्यादिधातूपसंधाने सव्यापारविशेषप
त्वोपस्थापकत्वमिति निरस्तं लाघवेन यत्नस्यैव शक्यत्वात् ननु यत्नो नाख्यातार्थः पा
कत्वेन पाकस्य यत्नसाध्यत्वानुमित्या यत्नलाभादित्युक्तं इति चेन्न चैत्रः पचतीत्यत्र चैत्रः पाकानुकूल
वर्तमानयत्नवानित्यन्वयितेन च पाकस्य वर्तमानयत्नेन व्याप्तिरस्ति अतीतानागते व्यभिचारात् न च धात्व
र्थेनानुमिते यत्ने आख्यातेन वर्तमानत्वान्वयबोधः संभवति यत्नस्यापदार्थत्वात् स्वार्थव्यापारस्य
वर्तमानत्वबोधनेनाख्यातस्य पर्यवसितत्वाच्च अप्यचैत्रः पाकानुकूलवर्तमानत्वव्यापारवानि
ति शाब्दबोधानंतरं चैत्रः पाकानुकूलवर्तमानयत्नवान् चेतनत्वे सति पाकानुकूलवर्तमानव्या
पारवत्वान्मैत्रवत् अनुमानं विना च पाकयत्ने वर्तमानत्वानवगमात् न स्य यत्ने शक्तिमित्यत्र आदि ख्या
निचेन्न यत्ना-वकालेपि तज्जन्यव्यापारस्य वर्तमानतया व्यभिचारात् किं च व्यापारस्य वाच्य
त्वे तल्लिंगकं वर्तमानयत्नानुमानमिति कल्पनात् -यत्नवाच्यत्वे लाघवात् न चाचेतने
प्याख्यातस्य व्यापारवाचकत्वावधारणात् एवं कल्प्यते इति युक्तं गौणान्यया शक्तिभ्र
मेण वा तत्राख्यातार्थव्यापारावगमोपपत्तेः यत्नाविगमदशायां तज्जन्यव्यापारकाले भ
वतीत्यत्र वर्तमानव्यापाराभिधानमाख्यातेन लक्षणया यथा रथो गच्छतीत्यत्र ... तोन्य
त्यत्रा

 लभ्यत्वात्तदनुरोधेन व्यापारे शक्तिः अन्यथा तत्त्वापि यत्नकाले पचतीति न स्यात् तस्माल्लडाख्या
९५ तं यत्नवाचकं आख्यातत्वात् लिङाख्यातवत् तर्कप्रोक्त एव एतेन कलानुकूलो व्यापा-
95 रो धात्वर्थः आख्यातवाच्या संख्यैव तेन चैत्रः पचति रथो गच्छति इत्यत्र चैत्ररथयो धात्व
र्थानुकूलव्यापारवत्त्वप्रतीतेर्मुख्य एव प्रयोगः पचतीत्यत्र यत्नलाभो धात्वर्थेनाक्षेपात् वि
क्लित्यनुकूलव्यापारस्य यत्नं विनानुपपत्तेरिति गुरुमतमपास्तं पचतीत्यस्य पाकानुकूलय
त्नवर्त्तमानत्वस्याक्षेपात् अलाभेनाख्यातार्थकत्वात् यत्नरत्नकोशकारोक्तं धात्वर्थो
व्यापारः आख्यातार्थ उत्पादना सा चोत्पादकता सैव भावना पचतीत्यादौ पाकमुत्पा
दयतीति विवरणात् धात्वर्थोत्पादकता वचेतनाचेतनयोरिति सर्वत्राख्यातप्रयोगो
मुख्य एव यत्नते जानातीत्यादावपि यत्नं ज्ञानमुत्पादयतीत्यर्थात् ननु व्यापारो यत्नो
वाख्यातार्थः यतन इत्यादौ मुख्यत्वे सति गौणत्वस्यान्याय्यत्वात् आख्यातार्थविवरणे
करोत्यर्थो प्युत्पादकनैव पाकं करोत्यादौ करोत्यर्थस्योत्पाद[illegible]तीति विवरणात् घटं क तीᐩ यः
रोतीत्यत्र कृञर्थघटोत्पत्तिरेवावगम्यते अत एव किं करोतीति सामान्योत्पादना प्रश्ने
पचतीति पाकोत्पादनाविशेषेणोत्तरमपि समञ्जसं चैत्र उत्पादयतीत्यत्र धात्वर्थ एवोत्पादनाचै
त्रेणान्वेति आख्यातार्थ उत्पादनात्वनन्वित्वेवोत्पत्तेरुत्पत्त्यभावात् वस्तुतस्तूत्पादयती
(आक्यार्थ) त्यत्र [illegible] एवोत्पादना अतोनुत्पादनार्थधातूत्तरवर्त्तिन आख्यातस्यानन्यलभ्यतयो
त्पादनावाच्या पचतीत्यादौ यत्नलाभः पाकादिनाधात्वर्थेनाक्षेपात् न तूत्पादनामात्रेण
व्यभिचारादिति तदप्यत एव निरस्तं पचतीत्यत्र यत्नप्रतीतेर्यत्न एवाख्यातार्थो लाघ

वात् ननूत्पादनानुकूलयत्नाधिकयोगौरवात् पाकानुकूलत्ववर्तमानयत्नस्याख्यातेपादिनाप्रत्ता
भाच्च वस्तुतस्तु चैत्रो जानातीच्छति यतत इत्यत्र ज्ञानादिमत्त्वं चैत्रस्य प्रतीयते ननूत्पादक
त्वं च चेतने ज्ञानोत्पादके शब्दलिंगादौ जानातीत्यादिप्रयोगस्याभावात् घटं जानातीत्यु
क्ते घटज्ञानवानचेतनेऽपि संप्रयोगापत्तेश्च अचेतनस्यापि ज्ञानोत्पादकत्वात् शब्दादिकं ज्ञापय
तीति वानुभवे च जानातीति तस्माल्लाघवात्पचति पक्ष्यत्यपाक्षीदित्यत्रातीतानागतवर्तमा
नयत्नप्रतीतेश्च यत्न आख्यातवाच्यस्तेन यत्नस्य वर्तमानत्वादिकमाख्यातेनाभिधीयते
प्रकारान्तरेण तदलाभात् जानातीच्छति यततेति प्रतीत्यत्र धात्वर्थ एव यत्नादिश्चैत्रेणान्वेति
यत्नादिमांश्चैत्र इत्यनुभवात् धात्वर्थे च यत्नादौ नाख्यातार्थयत्नान्वयः यत्नादिविषय
कयत्नस्याभावात् रथो गच्छतीत्यत्राख्याते व्यापारलक्षणा तेन गत्यनुकूलव्यापारवत्त्व
मात्रं रथस्य प्रतीयते अथ पाकानुकूलैककृतिकाले पचतीतिवत् कृतेरप्यर्थे निमग्नेनेरनु
त्पादेवमध्येऽप्यपाक्षीत्पक्ष्यतीति च स्यात् न च ध्वंसपदवत् कृतिप्रचयस्य प्रागभावात्प्रचय
स्य ध्वंसे प्रागभावे वा पाक्षीत्पक्ष्यतीति प्रयोगः जातीयकृत्यभावस्यासत्त्वादिति चेन्न प्राग
भावप्रध्वंसयोः कृतिविशेषप्रतियोगिकत्वेन कृतिकालेऽपि सत्त्वात् तयोर्गर्भितवाच्यं
एवं हि पचतीति न स्यादेव एकदा कृतिप्रचयस्यासत्त्वात् अथ यन्न भविष्यतोः कृत्यभा
वनिरूपणं कृतिकाले च कृत्यभावो नास्ति प्रतियोगजातीयकृत्यभावस्यासत्त्वादिति चेन्न
प्रागभावप्रध्वंसयोः कृतिविशेषप्रतियोगित्वेन कृतिकालेऽपि सत्त्वात् तयोः सकलकृतिप्रतियो
गिकत्वासंभवात् ननु फलायोगव्यवच्छिन्ना कृतिः शक्यार्थः अत एव पाकानुकूलतंडुलक्रयकालेप

न॰ चि॰ म॰ पचतीति न प्रयोगः एवं चरमकृतिकाले पचतीति तत्प्रागभावकाले पक्ष्यतीति तत्र ध्वंसकाले चापाक्षीदिति श्री॰ वि॰
८६ इत्यप्रयोगः तत्पूर्वं पक्ष्यतीति गौणा एवेति चेत्तर्हि मध्येऽपि पक्ष्यतीति स्यात् तदा चरमकृतेरना
96 गतत्वात् एवं व्यापारप्रचयस्यारब्धान्तापत्तेर्धात्वर्थत्वे वा मध्ये पक्ष्यत्यपाक्षीदिति स्यात् उच्य
ते पचत्यारब्धान्तवाच्ये प्रचये एकैकस्य वर्तमानव्यवहारनिमित्तत्वं तच्चावर्त्ती ध्वंसः प्रागभावे भू
भूतभविष्यद्व्यवहारः नन्तु वर्तमानव्यवहारनिमित्तकिंचिदभावात् चेन्न नाचेतनयोर्भोजन
गमादौ तथैव प्रयोगात् प्रयोगे सति निमित्तानुसरणात् धातोरारब्धान्तस्य वा पाकानुकूल
व्यापारवाचकत्वादिभिरप्यनन्यगतिकतया तथैव स्वीकारः स्यादेतत् चैत्रस्तंडुलं पच
ति चैत्रेण पच्यन्ते तंडुला इत्यत्र कर्त्तरि कर्मणि चाख्यातार्थसंख्यान्वयात् कर्मणि क्वापि च यत्न र्क
इव लकारवाच्यो न तेन वाच्यवगमिति संख्येति नियमो माविष्यातिश्चन्यथा ह्यनुसंख्येयमात्रा
न्वये नियमो न स्यादिति वैयाकरणाः तन्न कर्तृगतसंख्या यत्राख्यातं तत्र कर्ता प्रदनयः प्रती
यत इति तदनुपपत्तेः कर्तृगतैव संख्याख्यातवाच्येति चेत्कर्त्ता कवाच्य इति तुल्यं यत्र कर्तृगता
संख्या प्रतीयत इति चेन्न अन्योन्याश्रयात् कर्तृवाच्यत्वे तद्गतसंख्याधीस्तद्गतसंख्याप्रतीत्यार
त्या च तद्वाच्यतेति यत्राख्यातेन कर्तृविवक्षा तत्र कर्ता वाच्य इति चेन्न यत्र कर्तृगतसंख्या
वा विवक्षा तत्र सा वाच्येति तुल्यं एवं कर्मण्यपि न शंकां किंतु तद्गतसंख्यैव कर्तृकर्मणी लकारवा
च्ये इत्यस्यायमर्थः तद्गतसंख्या वाच्येति संप्रदायस्तु संख्येयमात्रसाकांक्षायाः संख्याभा
वनान्वयिनैवान्वेति एकपदोपात्तत्वप्रत्यासत्तेः भावना च व्यापारत्वेन शुद्धं प्रातिपदिकार्थ
साकांक्षा नतिनत्तु कर्तृकर्मादि द्वितीयादिना तस्य व्यापारवत्त्वेनोपस्थितेः अत एवकर्मा

नैव

पितव्यापारमाकांक्षति अतः प्रथमान्ते दृष्टे भावनान्वयः प्रातिपदिकार्थस्यापि क्रियान्व-
यार्थव्यापाराकांक्षत्वात् अन्यथा चैत्रस्तंडुलं पचतीत्यत्र कर्त्ता चैत्रेण पच्यत इत्यत्र क
र्मतया तत्रैव भावनान्वय इति संख्यान्वयोपि तत्रैव तदुक्तं यदर्थं भावनानुधावति तत्तत्संख्या
प्रतीतिः स्यादिति स्यादेतत् चैत्रस्तंडुलं पचतीत्यत्र भावनान्वयः चैत्रे संभवति आश्रयत्वा
त् चैत्रेण तंडुलः पच्यत इत्यत्र भावनान्वयस्तंडुलस्य न विषयतया यत्नस्य विक्लित्यनुकूल-
व्यापारविषयत्वात् विषयत्वेनान्वये वा तंडुलं पचतीत्यत्रापि तंडुलस्य विषयत्वेन भावनान्व
य इति तत्रैव संख्या स्यात् नाश्रयतया तत्रावृत्तेः चैत्रेपि न यत्नान्वयः तृतीयार्थवत्त्वे
नावरुद्धत्वात् इत्यनन्वितैव तत्र भावना अचेतनेव भावनान्वयाभावात् कथं संख्यान्वयानि
यम इति न यत्नविशेष्ये संख्यान्वयात् चैत्रस्तंडुलं पचतीत्यत्र तंडुलस्य कर्मत्वेनान्वयात् तंडुलवृ
त्तिफलजनकव्यापारजनकयत्नाश्रयश्चैत्र इति प्रतीयत इति स एव विशेष्यः चैत्रेण पच्य
ते तंडुल इत्यत्र चैत्रवृत्तियत्नजन्यव्यापारजन्यफलाश्रयस्तंडुलः प्रतीयत इति यत्नस्य परं
परत्वात्तंडुल एव विशेष्यः एवं च यद्यप्युभयत्र चैत्रः कर्त्ता तंडुलः कर्म तथापि यत्र विशेष्ये तत्सं
ख्यान्वयः अचेतनेपि रथो ग्रामं गच्छतीत्यत्र ग्रामवृत्तिफलजनकव्यापाराश्रयो रथः प्र
तीयते रथेन गम्यते ग्राम इत्यत्र रथवृत्तिव्यापारजन्यफलाश्रयो ग्राम इत्यत्रापि विशेष्ये-
संख्यान्वयः न चैवं यत्नस्य व्यापारस्य च विशेष्यत्वेन संख्यान्वये नियामकमननुगतमिति वा
च्यं आख्यातार्थतात्पर्यविषयस्य विशेष्ये संख्यान्वयात् स च यत्नो व्यापारो वा चैत्रेण प-
च्यत इत्यत्र चैत्रो न भावनाविशेष्यः तृतीयार्थावरुद्धत्वात् कर्मवत्तत्र तस्य यतो धात्वर्थ

त॰ चि॰ म॰ एवम्भावनाविशेष्यः फलत्वाद्विषयत्वाद्वेति तत्र संख्यान्वयः द्विबहुवचनयोस्तत्रासाधुत्वमेव तदुक्तं पा॰ वि॰
९७ दे आपलभ्ये संख्येयेनाभिधानस्य कल्पना संख्येयमात्रताभेधिसाकांक्षेरागाद्वा वास्थितिरितीदमेव चकर्तुःक
र्मणाख्यातोपलभ्यत्वं यद्भावनाविशेष्यत्वे सति प्रथमान्तोपस्थाप्यत्वं नतु संख्यालिंगकानुमितिविषयत्वं
97 अनुमित्यासंख्येयमात्रगतत्वेन संख्या प्रतीयते: ननु नामार्थे भावनान्वये पि तत्संख्यान्वयः
प्रथमोपस्थितसंख्यान्वयेन तस्य निराकांक्षत्वात् नच प्रथमान्तसंख्यावाचिका किंतु प्रयोगसाधु
रितिवाच्यं चैत्रः धानीराजेत्यत्रैकत्वादप्येकत्वप्रतीतेः अन्यथा प्रथमोपस्थितसंख्यया कर्तृ
कर्मान्वये संख्या न तिङर्थ इत्यपि कल्प्येति चेन्न एकैव हि संख्या प्रथमाख्याताभ्यामभिधीयते सा
मानाधिकरण्यानुरोधात् यथा चैत्रो दंडीत्यत्र अन्यथा त्वन्मते प्याख्यातेन चैत्रसंख्याभि
धानात्प्रथमावाच्यसंख्यान्वयश्चैत्रे न स्यात् ओदनकामः पचेतेत्यत्र तथाप्येषैव रीतिरि
ष्टांतथा तत्र कर्तृवाच्यत्वादिति वक्ष्यते अथ कर्ताख्यातवाच्यः चैत्रः पचतीति सामा
नाधिकरण्यात् अन्यथा नामाख्यातयोर्भिन्नप्रवृत्तिनिमित्तकयोरप्येकत्रवृत्त्यभावे समा पा४
नाधिकरण्यं न स्यादिति चेन्न नीलः घटश्चैत्रः पचति पच्यते तंडुलः इत्यादौ नामाख्या
तयोर्वा एकसंख्यावाचकत्वमेव भिन्नाख्यं सामानाधिकरण्यं न तु भिन्नप्रवृत्तिनिमित्तस्यैक
त्रार्थे वृत्तिर्गौरवात् ओदनकामः पचेतेत्यादौ व्यभिचाराच्च विध्याख्यातस्य हि कृतिसा
तस्य नाम सामानाधिकरण्यं तयोरेकसंख्याभिधायकत्वात् नन्वेककर्तृवाचकत्वेन
तत्रापि कर्तृवाच्यत्वे तस्येष्टसाधनत्वबोधने प्रवृत्तिस्तस्यासाध्यत्वात् अयोग्यत
याकर्तारं विहाय कृतिविषये पाके पाकविषयकृतौ वेष्टसाधनतान्वये कर्तरि नत्वमादप्र

तीतेष्वनाभिधेयत्वं पचतीत्यस्य पाकयत्नवानिति विवरणात् कर्त्ता वाच्य इति चे
न्न द्वंद्वादिसमासस्य विग्रहेण विवरणेऽपि विग्रहार्थे प्राप्तप्रभावेन व्यभिचारात् क
र्त्तुरन्यलभ्यत्वेनावाच्यत्वाच्चेति विवरणस्य तात्पर्यविषयताज्ञापकत्वात् कर्तृशक्तिम
मन्वलंबाख्यस्तत्तः पचतीत्यत्र यत्नवत्तः शाब्दत्वे धात्वर्थस्य विषयत्वेन ताध्यत्वे
न वा कृत्याद्यन्वयो न स्यादिति रवपदार्थविशेषणतयोपस्थितौ पदार्थैकदेशत्वात् पदा
र्थस्यानन्वयात् राजपुरुषमानयेत्यत्र राज इवानयने पदार्थैकदेशान्वयस्य व्युत्प
त्तिसिद्धत्वात् यत्नस्याश्रयान्वितत्वेनोपस्थितस्यैव तेन नाकांक्षत्वात् पाकयत्नवत्तो
रत्नपेच यत्नयत्ताध्यः पाकः पाकजनको यत्नवानिति वाधीः स्यात् नेतत्पाकस्य तयोर्वि
षयविषयिभावधीः पाकाकर्त्रेत्यत्रापि न पाकस्य कृतावन्वयधीः कृतेरवपदार्थत्वा
त् किं तु कृत्याश्रयः पाकजनक इति प्रतीतिः तत्र त एवापचत्यपि पाचकप्रयोगात् तण्डुलः ।
कृतियोग्यता वाच्येति निरस्तं पाकस्य कृतावन्वयप्रसंगादिति पाचकपदं गौणमेव
ननु कर्तृकर्मणी लकारवाच्ये तेनाभिधीयते कर्त्तरि कर्मणि चानभिहिताधिकारीया
कर्तृकर्मविभक्तिर्न भवति किं तु प्रथमैव लकारेणानयोरनभिधाने चैत्रेण पचति ।
तंडुलः चैत्रः पच्यत ओदनमित्याद्यपि स्यादिति चेन्न कर्तृकर्मगतसंख्याभिधाना
नभिधानाभ्यामेवाभिहितानभिहितकार्योपपत्तेः तादृशप्रयोगस्यासाधुत्वाच्च सा
धुत्वे हि सत्यनुशासनं नाह्यनुशासनेनान्वयेन साधुत्वं प्रामाणिकेषु साधुत्वापत्तेः ननी
नास्ति रूपभ्रष्टत्वार्थगतसंख्याभिधायकत्वं तिङः प्रथमान्तपदार्थगतसंख्यावो

 धकत्वमिति व्युत्पत्तिरेव व्युत्पत्तिं अत तद्भाववत्त्वं तच्च फलोन्नेयं प्रथमान्तपदार्थः कर्ता कर्म
 वा अत एव चैत्रेण सुप्यत इत्यत्र प्रथमान्तपदाभावान्न संख्यान्वयो न वा धात्वर्थे संख्यान्व
 यः स्वापस्यैकत्वबहुत्वेऽपि द्विवचनबहुवचनयोरभावात् सुप्यत इत्येव प्रयोगात् अत एव
स्वापमात्रावगमात् आख्यातार्थयत्नसंख्ययोरनन्वये आख्यातं प्रयोगमात्रे साधु इति
क्तं विना धातोः केवलस्यासाधुत्वात् अतो न संख्यानुरोधेन कर्तृकर्मणि लकारवाच्याव
यं तु ब्रूमः चैत्रेण पच्यन्ते तण्डुला रथेन गम्यते ग्राम इत्यत्र तण्डुलग्रामौ कर्मणि प्रतीयते आ
ख्यातयोः परसमवेतक्रियाफलशालित्वं कर्मत्वं तच्चाख्यातवाच्यमेव तण्डुलं पचतीत्यत्र
द्वितीयादित्यतः कर्मत्वाभावात् तस्मात्कर्मत्ववत्कर्मत्वमपि लकारवाच्यं तत्र कर्मणोः कर्तृ
एव कर्मणोरन्यत[illegible]लाभादिति धात्वर्थः फलमिति मण्डनाचार्याः तथाहि पच्यर्थो विक्लित्तिर्ला
घवात् न तु तत्फलको व्यापारः अधःसंतापनादिः गौरवात् गमेरुत्तरसंयोगः पतेरधःसं
योगः त्यजेर्विभागोऽर्थः न तु तत्फलजनकस्पन्दः हन्तेरपि मरणमर्थः न तु तत्फलको व्यापारः
खड्गाभिघातादिः गौरवात् यजत्यर्थोऽपि देवतोद्देश्यकत्यागफलं स्वत्वध्वंस एव जुहोत्यर्थ
त्यागफलप्रक्षेपः ददात्यर्थः संप्रदानस्वीकारपूर्वकत्यागफलं स्वस्वत्वध्वंसः परस्वत्वं वा न तु
न तु तत्फलकत्यागो गौरवात् न चैवं व्यापारविगमे फलदशायां पचति गच्छति ददातीत्यादिप्र
योगः स्यात् न त्वपाक्षीदित्यादिः व्यापारकाले च पचतीत्यादि न स्यादिति वाच्यं धात्वर्था
नुकूलव्यापारवर्तमानत्वमाख्यातार्थः तेन व्यापारकाले पचतीत्यादि न व्यापारविगमे न च
स्पन्दजन्यसंयोगविभागाश्रयत्वेनाकाशो गच्छति पतति त्यजतीति स्यात्ताविजप्रयत्नवत्त्वस्य कर्तृत्वात्

वनस्यात् संयोगाद्यभावादिति वाच्यं व्यापारवति व्यापारकाले आरब्धात् प्रयोगात् नन्वेवं
धात्वर्थत्वेन फलं क्रिया तथा च तंडुलं पचतीत्यादौ तंडुलादेः कर्मत्वं न स्यात् विक्लित्यादिरूपक्रि
यात्रयफलशालित्वाभावादिति चेत् न परसमवेतव्यापारफलशालित्वं कर्मत्वं स च व्यापारो धात्वर्थ आरब्धा
नान्यो वेत्युभयथापि परसमवेतव्यापारकत्वशालित्वं तंडुलादेः कर्मत्वं विक्लित्यनुकूलाद्व्यापारकाले प प्रालि=
को वर्तते इत्यत्र पाकपदे व्यापारलक्षणा लाघवेन विक्लित्तेः पाकत्वात् जानाति इच्छति यतते वियतति
स्रुतीत्यादौ ज्ञानेच्छाप्रयत्नसत्तागतिनिवृत्तिरेव धात्वर्थः न त्यागादि फलं न वा तदनुकूलो व्या
पारः स्नानादिफलमात्रप्रतीतेरिति अत्रोच्यते स्वर्गकामः पचेतेत्यत्र विधिप्रत्ययेन धात्वर्थे प्रव
त्यर्थं कृतिसाध्यत्वमिष्टसाधनत्वं च बोध्यते न च फले विक्लित्यादावोदनसाधनत्वं न वा फले प्रव
त्तिः संभवति उपायमकृत्वा फलस्य साक्षात्कृत्या साधयितुमशक्यत्वात् उपायकृतिसाध्यमेव
हि फलं ननु तदन्यकृतिसाध्यं उपायकृतिरेव तत्सिद्धिः अधःसंतापनादेः कृतिसाध्येष्टसाध
नत्वं विना विक्लित्यर्थमप्रवृत्तेश्च उपाय एवाधःसंतापनादिर्व्यापारः प्रवृत्तिविषयत्वात् कृ
तिसाध्यत्वेनेष्टसाधनत्वेन च विधिप्रत्ययेन बोधनात् इति फलानुकूलो व्यापार एव धात्वर्थः अथो
पायस्य कृतिसाध्यत्वज्ञानं प्रवर्तकमिति सत्यं किंतु विधिबोधितफलकृतिसाध्यत्वेन तदुपाय
कृतिसाध्यत्वमाक्षिप्यते तेन विना तदनुपपत्तेरिति चेत् न व्यवहारात् प्रवृत्तिजनकज्ञाने विधि
प्रत्ययस्य शक्तिग्रहात् प्रवृत्तिसाक्षादनुपपादकाविषयत्वात् कल्पनायाः एवं पचिगमियजिजुहोति
ददातीनामपि व्यापार एव वाच्यः फले प्रवृत्त्यसंभवात् तत्र पच्यर्थोऽधःसंतापनमेव न तु रूपा
रसगंधपरावृत्तिफलाविनाभूतं संतापने वजातिविशेषो वा रूपादिपरावृत्तिजनकतावच्छेदकोऽव

त॰चि॰म॰ ९९ एवं वाच्यः अन्यथा फलार्थमधः संतापनेऽप्रवृत्तेः अपारस्याधस्संतापनवाच्यत्वेऽपि विशेषस्याव ष धा॰वि॰
श्यं वाच्यत्वात् पच्यर्थे च फलं न विशेषणं न वोपलक्षणं लोकेऽधः संतापनविशेषस्यरूपा
दिपराहत्यापि शारीराव्याकृत्यभावात् वेदेऽधः संतापनमात्रं पाकपदार्थः कपालज्ञ पर्ययेत्या
दौ फलाभावात् न तत्त्वोपलक्षणं रूपादिपराहृत्ययोग्याधः संतापने पाकपदार्थः योग्यता
संतापने ह्यत्राद्वाव्याप्तिगमेः स्पन्दविशेष एव वाच्यः ननु परसंयोगजनकत्वेन स्पन्द
वाच्यता सर्वस्पन्दसामान्याद्वेनव्याकृत्यभावात् स्पन्दे च विशेषः संयोगविभागजनकतावच्छे
दकः सर्वसिद्ध एव त्यजेश्च कर्ममात्रं शक्यं ननु पूर्वदेशविभागफलकर्मत्वेन शक्यत्वं सर्वक
र्मगामित्वाद्वेनव्यावृत्त्यभावात् त्यजतीति प्रयोगे च न बुद्धिनिमित्तं पतत्यपि विहिकर्म
विशेष एव गुरुत्वासमवायिकारणप्रयोगाधः संयोगफलजनकः फलं तु विशेषपरि र्म
चायकमात्रं यजति ददाति जुहोतीनामिदं न ममेत्यादि न तत्संकल्पविशेषसहभाग एव वाच्यः
प्रो संकल्पे च विशेषस्तु न तद्विशेषकृतः तत्फलविशेषस्तु न कतावच्छेदको मानसप्रत्यक्षसिद्ध
एव ननु तत्फलजनकसंकल्पविशेषे शक्तिः गौरवात् देवतोद्देश्यकस्वत्वध्वंसफल
कत्यागत्वं संप्रदानस्वीकारपूर्वकस्वस्वत्वध्वंसपरस्वत्वापत्तिफलजनकत्यागत्वं देव
तोद्देश्यकप्रक्षेपफलत्यागत्वं च न तत्संकल्पविशेषः परिचायकमात्रमिति ॥ उपसर्गा
स्तु द्योतकाः न वाचकाः द्योतकत्वं च धातोरर्थविशेषे तात्पर्यकत्वं तदुपसंधाने न तत्प्र
तीतिः ननु धात्वर्थाभिधायकत्वं द्योतकत्वमापत्तेः ननु प्रयत्नतीत्यादौ प्रकर्षस्याविजयन
इदादावनिप्रायस्य अङ्गच्छतीत्यादावाभिमुख्यसामीप्ययोः प्रतीतावुपसर्गान्वयव्यति
भा

देकोनुविधानात्वदांशस्वदत्रापिशक्तिः नचप्रतिष्ठतिइत्यत्रगतिधीर्नस्यात् उपशब्दस्यप्रकर्षवाचि
त्वेनातिशयेनागमनागमनार्थत्वाद्यीवसंगादिति वाच्यं तत्र उपशब्दस्य धात्वर्थाविवक्षार्थत्वात्
तद्गमनमेव धातोरिव न स्यात्पुनः नेकार्थत्वात् नच धातोः सार्थकत्वं कृप्रमतत्त्वानेकार्थ
तायुक्ता उपसर्गेत्तु नैवमिति वाच्यं धातूनां वकृत्वात्प्रकर्षवाचित्वंगौरवात् किंतुप्रश
ब्दस्यैकस्योत्तितस्यापि सार्थकत्वात् धातोरनेकार्थत्वंकल्पनं तदमियुक्तैर्नोपसर्गस्येति चे
त् नहि धातोर्नानार्थत्वे उपसर्गानुविधानमप्यविशेषेन स्यात् अत्तादिपदे [illegible] अदर्श नेषां=
नात् उपसर्गस्यापि शक्तत्वे धात्वनुविधानं न स्यादिति चेत् न साधुत्वार्थं तत्रतदनुविधा
नंतेन विनाप्रयोगाभावात् ननुशक्तौ धातोस्तु शक्तावेव तदपेक्षेति वैशम्यं अभ्यप्रज
यत्यभ्यागच्छतीत्यादौ सामान्यवाचकाद्धातोरेव प्रकर्षसामीप्यादिविशिष्टस्य विशेषस्योपस्थि
तिः तात्पर्यग्राहकत्वमात्रमुपसर्गाणामिति चेत् न प्रकर्षादेर्विशेषस्याशक्यत्वेन तत्र
लक्षणायां युगपद्वृत्तिद्वयापत्तेः एतेनाभ्यागच्छतीत्यादि सामीप्यादिविशिष्टधात्वर्थप्र
तीतेर्वाचकत्वमुपसर्गाणां प्रतिष्ठत इत्यादौ धातोरेव गमनार्थत्वे तात्पर्यग्राहकत्वं प्रपा
दः अन्यथा धातूपसर्गार्थयोर्विरोधे नान्वयानुपपत्तेः एवंयत्र धातूपसर्गयोर्विरोधो धात
द्योतकत्वमन्यत्र वाचकत्वमिति मतमपास्तं आगमनविरोधिगमनस्यैव प्रशब्दार्थत्वात्
अत्रोच्यते आख्यातस्य धात्वर्थेन सह स्वार्थान्वयबोधकत्वमतः प्रतिष्ठत इत्यत्र गमनंधा
त्वर्थ एव प्रशब्दार्थत्वेभावनान्वयो न स्यात् प्रकृतिप्रत्यययोः संभूयान्वयबोधकत्वनि
यमात् एवंचशोनगस्यात्वेनगमने शक्तिरिति प्रशब्दः शक्यतावच्छेदको न शक्तमंशमिकी
इत्यो

त॰चि॰म॰ शक्तिरेव द्योतकत्वं प्रकर्षाभिप्रायव्यवसायाभिप्रायादेरुपसर्गवाच्यत्वेपि तद्विशिष्टधात्वर्थान्वयः सं शा॰वि॰ १॰
१०० भवत्येव भावनायाः उदनं पचतीत्यत्रोदनविषयकपाकान्वयवदिति यद्यपि तथापि उ
100 पसर्गस्य शक्यतावच्छेदकत्वं न शक्यत्वं गौरवात् तथा च प्रोजयतीत्यत्र प्रकृष्टजये शक्तिः
एवं हि प्रकृष्टविशेष्यशक्तेर्विशेषणविषयत्वमात्रं कल्प्यते अन्यथान्यशक्त्यंतरमेव न च
नैवं जिधर्वप्रत्वेनतत्रैव शक्तिरस्तीति वाच्यं धात्ववाच्यत्वे भावनानन्वयप्रसंगात् प्रतिष्ठ
तइत्यत्रोपसर्गस्य शक्त्यवच्छेदकत्वमात्रकल्पनाच्च अथवा प्रतिष्ठत इत्यत्र विरोधित्व
गायाधात्वोर्गम्यतेऽस्थितिः तात्पर्यग्राहकः प्रशब्दः अनन्यलभ्यस्य शब्दार्थत्वा
त् प्रजयतीत्यादावपि विशेष्यवाचकस्य धातोर्विशिष्टेलक्षणा विशेष्याद्विशिष्टस्या
न्यत्वात् शब्देस्तात्पर्यग्राहकत्वं न हि शक्तिं विनापि धातुनः प्रजयतीति संभवेत्कल्पनमर्ह
अनन्यलभ्यस्य शब्दार्थत्वात् व्यतिसइत्यादौ तु प्रकृष्टजो धातुरेवार्थप्रत्यायकः धा
तुलोपसंज्ञा न स्तत्रार्थ प्रजयतीत्यभावादितिकृतं प्रसक्तानुप्रसक्त्या स्यादेतत् तथापि सं
केतग्रहे चेष्टाज्ञोपयत्नुमकाष्ठवत् सापि प्रमाणान्तरमतश्चत्वारि न प्रमाणानीति चेत् उ
च्यते शब्देन चेष्टायां संकेतग्रहाद्यवृद्धस्तत्रतूपयोगिनी चेष्टा पिवत् शब्द एव प्रमा लि
णामर्थेलक्षणत्वात् ननु एवं कथमेतउमूकस्य व्यवहारः तस्य शब्दास्मरणादिति चेत् अत्युत्प
न्नत्वाच्चेष्टायां तस्य शब्देन न संकेतग्रहो न मानान्तरेणोत्ति समयाग्रहाद्यवत् चेष्टार्पितं प्रति
कुंठैव व्यवहारस्तु एतउमूकस्य पदे तद्विषयामम प्रवृत्तिर्निवृत्तिर्वा एतस्याभिप्रेतामवतीत्तदा
मामुद्दिश्य यामेतां चेष्टां करोतीत्यन्वयव्यतिरेकाभ्यां व्याप्तिग्रहात्तया गमिर्वा पमनुमाय

प्रवृत्तिनिवृत्ती कथं कुशाभिप्रायादिवकरिष्यन्त्यादेः न च कृतसमयापि चेष्टा अभिप्रायानुमापि
का स्यात् किं शब्दस्मरणेनेति वाच्यं अविनाभावाभावात् न चैवं शब्दस्याभिप्रायानुमानादेव प्रवृत्त्या
द्युपस्थितिवाच्यं शब्दादेव प्रत्येमीत्यनुव्यवसायात्तदनुभावकत्वे स्थिते तदनुकूलशक्तिकल्पनात्
एडमूकादौ अनुमानाभावात्प्रवृत्तेरन्यथानुपपत्तेः एवमन्यत्रापि शब्दः प्रयोजकत्वे स्थिते तद्वा
देव चेष्टायामनुभावकत्वं संभवतीति न सा पृथक् प्रमाणं अपि वा स्मरयन्तु चेष्टा पदार्थानेवन
तु शाब्दं तस्यापि सा न प्रमाणं द्व्यंगुलीकरणो यात्रां करिष्यतीत्यादिका तु त्वन्वयधीप्रयो
जकाभिप्रायं स्मारयन्ती प्रमाणमेव न शंखध्वनौ यात्रां करिष्यतीम शंखध्वनिवत् तथा च वि
भक्तिरनुकारकेषु प्रातिपदिकार्थप्रधाना क्रियाख्यातानयनादिस्वरूपप्रधाना तथा च गौरश्व
पुरुषः इत्यादिपदैरिव स्यात्तेषु पदार्थेषु स्मारितेषु परस्परमन्वयायोगः प्रातिपदिकार्थक
र्मत्वादेरानयनादिस्मृतौ अतीतानागतवर्तमानत्वस्य चान्वयप्रकारस्यानुपस्थितेः पदैकदे शा
विभक्तिविशेषबद्धे चैकदेशाविशेषात् प्रकरणादिविशेषे बोधकर्मत्वादिवर्तमानत्वादिस्मृति
नियमः इति चेन्न कर्मत्वाद्यप्रतीतेस्तदुपस्थापकत्वे चैकदेशाभावात् प्रकरणाद्यस्तु वि
षयविशेषे शाब्दबोधे नियमयन्ति न त्वन्वयप्रकारकर्मत्वादौ कालविशेषे वा प्रवर्तयन्ति:
अन्यथा गौरश्व इत्यादावपि प्रकरणादिभिः कर्मत्वाद्युन्नीयविवक्षितार्थावसायः स्या
त् नहि चेष्टाकलापे प्रकरणादयः कारकविशेषावगमे क्षमते न तु पदकदंबकः इत्याकृतिनि
यमः तथा च कालसंख्याकर्मत्वादिप्रातिपदिकविभक्त्यादिसमभिव्याहारवैयर्थ्यप्रसंगः
कथं तर्हि ततोऽर्थव्यवहारः संशयप्रतिभयोरन्यतरस्मात् शब्दस्मारितशब्दानामपि

त॰चि॰श॰ कर्मत्वाद्यन्वयप्रकारोपस्थापकविभक्त्यादेरभावात् कथमन्वयबोधकत्वमितिचेत् न विभक्त्या श॰वि॰

११ दिमत्तामेव शब्दानां स्मरणात् शब्दमात्रेण संकेताग्रहात् न चापभ्रंशात्कथं वाक्यार्थधीः

१०१ अन्वयप्रकारोपस्थापकविभक्त्यादेरभावात् नच साधुशब्दस्मरणादिति वाच्यं साधुश

ब्दसंकेत्याविरहिणामपि तामरसाणामर्थप्रत्ययात् साधुपदमात्रस्मरणेपि कर्मत्वाद्युपस्था

पकविभक्त्यादेरभावाच्चेतिचेत् न यथाहि पदार्थशक्तत्वेन ज्ञातादपभ्रंशात् पदार्थो

पस्थितिः यथा विभक्त्यर्थकर्मत्वादिशक्तत्वेन ज्ञातादपभ्रंशैकदेशात् लत्वणत्वाद्यभिज्ञात्

कर्मत्वाद्युपस्थितिः अथ साधुशब्देऽन्वयप्रकारकविभक्त्यादेः सहकारित्वं न त्वेतस्यां

किंतु तात्पर्यग्राहकमात्रं सहकारीतिचेत् न समयाधीनप्रवृत्तिकमात्रं प्रतितत्सह

कारित्वात् तद्विशेषशब्दस्य गुरुत्वादिति न साधुस्मारणांतरं ऐतिह्यं चाप्तोक्तत्वेन शब्दे

वांतर्भूतं अर्थापत्त्यनुपलब्धोस्तु यथायथमंतर्भावः प्रागेव चिंतितः अतः सिद्धं चत्वारि प्र

माणानीत्युपरम्यते धीराः कुशाग्रमतयो भवंतः प्रणम्य मौलौ निधाय करवारिरुहे सम

मीहे वाणीयमर्थरहितापि विशृंखलापि सानुग्रहेण हृदयेन विलोकनीया गच्छतः स्ख

लनं क्वापि भवत्येव प्रमादतः हसंति दुर्जनास्तत्र समादधति सज्जनाः इति श्री महामहोपा

ध्यायश्रीगंगेश्वरविरचिते तत्त्वचिंतामणौ शब्दविवेकस्तुरीयः परिच्छेदः समाप्तः

संवत् १८६२ माघवदि सप्तम्यां भौमवासरे व॰ १३ संपूर्णं समाप्तम् ॥ छ ॥ ० ॥ छ ॥

लि॰ साधुरामलिखारी मुलाजमसंदर श्री रघुनाथजी पुस्तकालया जंदू ॥ छ ॥ ० ॥

र॰ नं॰ १०

तत्वचिन्तामणि